Mahendra Singh
Delhi

स्थूलासु अप्सु तु अस्याप्तत्त्वस्य प्राधान्यादाप इति शब्देन व्यपदेशः क्रियते। सूक्ष्मस्याऽस्याप्तत्त्वस्योत्पत्तिस्तु लघुस्थिरोभयगुणवत्त्वात् प्राधान्येन प्रकृतेः सत्त्वतमोगुणाभ्यां स्वीक्रियते। यथा च सुश्रुतः "सत्वतमोबहुला आपः" इति।

पृथिवीतत्त्वम्—"अद्भ्यः पृथिवी" इति तैत्तिरीयवचनानुसारं "अद्भ्यो गन्धगुणा भूमिः" इत्येतन्मनोर्वाक्यानुसारं च प्रकृतिगतगन्धतन्मात्रसाहाय्यादद्भ्यः पृथिवीतत्त्वं समुत्पन्नम्। रसगुणात्मिकाभ्योऽद्भ्य एव प्रकृत्या संघातगुणः प्रकटीभवति। प्रकृतेः संघातगुण एव पृथिवीतत्त्वमस्तीति प्रतीयते। अस्मिन्संघातात्मके पृथिवीतत्त्वे समुत्पन्ने सर्वं स्थूलं मूर्तं च द्रव्यजातं समुत्पद्यते। संघात एव पृथिवीतत्त्वमस्तीति बृहदारण्यकेऽप्युक्तं "तद्यदपां शर आसीत् समहन्यत सा पृथिवी अभवत्" इति अर्थादपां शरभावो=गतिभावो=द्रवभाव एव संघातरूपेण परिणतः। स एव च पृथिवीतत्त्वमस्तीत्याशयः। संघातगुणात्मकमिदं पृथिवीतत्त्वं शब्द-स्पर्श-रूप-रस गन्धगुणं "तमोबहुला पृथ्वी" इति सुश्रुतवाक्यानुसारं तमोगुणविशिष्टं, चराचरगतस्य स्थिर-गुरु-स्थूल-इत्यादिसंघातात्मकभावानां मूलहेतुम्मन्यन्ते मनीषिणः।

पञ्चभूतानि—एवं च भूतिः=सत्ता=सा एषामस्तीति भूतानि=तत्त्वानि वा पृथिवी-अप्-तेजः-वायुः-आकाशाख्यानि पञ्चैव विधन्ते। एषामेव तत्त्वानां पञ्चीकरणेन सम्मिश्रणेन वा सर्वाणि द्रव्याण्युत्पद्यन्ते। पृथिवीतत्त्वस्य भूयस्त्वं च तेषु स्वीक्रियते। यथाह वाग्भट[1]:—

"पञ्चभूतात्मकं तत्तु क्ष्मामधिष्ठाय जायते।
अम्बुयोन्यग्निपवननभसां समवायतः
तन्निर्वृत्तिविशेषश्च व्यपदेशस्तु भूयसा।"

---

१ (सू० ९)

द्रवता-स्निग्धता-शैत्यादिगुणभूयस्त्वादिदमाप्यम्, उष्णता-तीक्ष्णता-पचन-दहनादिगुणातिशयात्तैजसम्, लघुता-चलता-रूक्षतादिगुणातिरेकादेतद्वायवीयमिति तु व्यपदेशस्तत्तत्प्राधान्याल्लाक्षणिकः। वस्तुतस्तु सर्वाणि द्रव्याणि अन्योन्यानुप्रविष्टैरेभिः पञ्चभिस्तत्त्वैरेव निष्पन्नानि। उक्तं च सुश्रुतेन—

"अन्योन्यानुप्रविष्टानि सर्वाण्येतानि निर्दिशेत्
स्वे स्वे द्रव्येतु सर्वेषां व्यक्तं लक्षणमिष्यते।"

अस्माकं शरीराणि पाञ्चभौतिकानि यथोक्तं सुश्रुतेन "पञ्चभूतशरीरिसमवायः पुरुष" इति। किंच प्रश्नोपनिषदि अपि "कत्येव देवाः प्राणं विधारयन्ते। तस्मै स होवाच, आकाशो ह वा एष देवो वायुरग्निरापः पृथिवी चेन्द्रियाणि च" इति। शरीरिणः शरीरस्थपञ्चभूतान्युपवर्णयता बृहदारण्यकेनाऽप्युदीरितम् "यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति एष त आत्मा अन्तर्याम्यमृतः। यस्यापः शरीरं योऽपोऽन्तरो यमयति एष त आत्मा अन्तर्याम्यमृतः। यस्याग्निः शरीरं योऽग्निमन्तरो यमयति एष त आत्मा अन्तर्याम्यमृतः। यस्य वायुः शरीरं यो वायुमन्तरो यमयति एष त आत्मा अन्तर्याम्यमृतः। यस्याकाशः शरीरं य आकाशमन्तरो यमयति एष त आत्मा अन्तर्याम्यमृतः। यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि भूतान्यन्तरो यमयति एष त आत्मा अन्तर्याम्यमृतः" इति। एतेषां पञ्चभूतानां साहाय्येनैव एष आत्मा शरीरिरूपेण लोचनगोचरो भवति। कठोपनिषदि च श्रूयते "या प्राणेन संभवति अदितिर्देवतामयी गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायत" एषु सर्वेषु वाक्येषु पृथिव्यादि-

१ (शा० १) २ (२) ३ (३।७) ४ (२।६)

शब्दैः सूक्ष्मभूतान्येव गृह्यन्तेन स्थूलपृथिव्यादीनि । एतद्भू-मण्डलान्तर्गतेषु प्राणिषु पृथिवीतत्त्वस्य भूयस्त्वमिव सूर्यादि-मण्डलान्तर्गतेषु अग्न्यादीनां भूयस्त्वमङ्गीक्रियते कैश्चिन्म-नीषिभिः। शरीरप्रलये च शरीराद्गते वा शरीरिणि शरीर-मिदं पञ्चत्वमाप्नोतीत्युच्यते। शरीरगताः सर्वे पञ्चभूतांशा-स्तदा पञ्चभूतरूपतामङ्गीकुर्वन्ति । एवमेव सर्गस्यान्ते निसर्गगताः सर्वेऽपि भूतविकारा पञ्चभूतरूपतामेवोपयान्ति। भूतान्यपि पुनः "मही संलीयते तोये तोयं संलीयते रवौ। रविः संलीयते वायौ वायुर्नभसि लीयते" इत्युक्तक्रमेण आकाश-रूपतामवाप्नुवन्ति।

वैज्ञानिकानामणुरपि पाञ्चभौतिकः—भारतीयदार्शनि-कानाम्मते वैज्ञानिकानां 'एटम' इत्याख्योऽणुरपि पाञ्चभौतिक एवाभिमतः। तथाच सुवर्ण–ताम्र–रजत–वङ्ग–पारद–गन्धक–उद्रजन–ओषजनप्रभृतीनां द्विनवतिसंख्यकानां रसायन-शास्त्रप्रतिपादित "एलिमेन्ट" इत्याख्यमूलद्रव्याणां पञ्च-भूतनिष्पन्नत्वमेव तैः स्वीक्रियते। सुवर्णताम्रादीनां परमा-णुषु पाञ्चभौतिकेषु आकाशादिपञ्चभूतमात्रावैषम्यादेव परस्परं गुणवैषम्यं प्रभाववैषम्यं वा संजायते। तथाच रजतं शीतं स्निग्धं गुरुगुणं, वङ्गं तु तद्विपरीतं उष्णं रूक्षं लघुगुणं च। रजतवङ्गयोरेष गुणविपर्ययश्च स्वस्वपरमाणौ पञ्चभूतानां मात्रान्यूनाधिक्यमेव सूचयति । वैज्ञानिका अपि साम्प्रतं सुवर्णताम्रादीनां 'एलिमेन्ट' संज्ञकानां मूलतत्वानां 'एटम' इत्याख्यान् रसाणूनभेद्यान्नैव मन्यन्ते। तेषाम्मते एतेषां मूल-तत्त्वानामणवोऽपि अतिसूक्ष्मेण मध्यस्थितेनैकेन "घनविद्यु-त्पिण्डेन" तं परितश्च सूर्यमभितो ग्रहोपग्रहैरिव परिभ्रमद्भि-र्बहुभिस्ततोऽपि सूक्ष्मतरैः "ऋणविद्युत्पिण्डैश्च" विनिर्मिताः सन्ति । सर्वेषां मूलद्रव्याणामणव एषामुभयविधपिण्डानां

संख्या[1]भेदेन विन्यास[2]भेदेन च परस्परं विभिद्यन्ते । समानोपादाना अपि मूलद्रव्याणामणवः 'घन' 'ऋण' विद्युत्पिण्डयोः संख्यादिभेदेन परस्परं विषमाः संजायन्ते । प्राच्यविदुषां प्रतीच्यवैज्ञानिकानाञ्च परस्परमेतावानेव भेदो यत् प्राच्यास्तु सुवर्णादिद्विनवतिसंख्यकानां मूलद्रव्याणां परमाणून् पञ्चभूतसमवायेनोत्पन्नान् मन्यन्ते प्रतीच्यास्तु तेषामेव परमाणून्द्विविधाभ्यां विद्युत्पिण्डाभ्यामुत्पन्नान् स्वीकुर्वन्ति । परमाणुगत 'घन' विद्युत्पिण्डस्य 'ऋण' विद्युत्पिण्डानां चान्तराले वैज्ञानिकैराकाशस्तु स्वीक्रियत एव । विद्युत्पिण्डानामेतेषां गतिमयत्वात्परमाणौ वायुतत्त्वमप्यस्तीत्यनुमीयते । नवीनवैज्ञानिकाभिमतेऽस्मिन्परमाणौ तेजःप्रभृतीनां त्रयाणामन्येषामस्तित्वं सम्प्रातियावत्तु साधयितुं दुःशकम् । इत्थं च यावन्मात्रपदार्थानां परमाणुषु पाञ्चभौतिकत्वमव्यभिचरत्सु तद्घटकभूतमात्राणां वैषम्यव्यपायेऽन्यतमस्य पारदादेर्धातोरन्यस्मिन्सुवर्णादौ परिणामो न बालबुद्धिचापल्यमात्रम् । एवं च कृत्रिमसुवर्णादिनिर्माणं[3] नासंभवं प्रतीयते ।

शक्ति–गुण–द्रव्याणामभेदः—शब्दगुणवत्त्वमाकाशत्वम्, शब्दस्पर्शगुणवत्त्वं गतिमत्त्वं वा वायुत्वम्, शब्दस्पर्शरूपगुणवत्त्वं उष्णतीक्ष्णगुणवत्त्वं वा तेजस्त्वम्, शब्दस्पर्शरूपरसगुणवत्त्वमप्त्वम्, शब्दस्पर्शरूपरसगन्धगुणवत्त्वं संघातगुणवत्त्वं वा पृथिवीत्वमित्युच्यते चेत्तर्हि इमानि भूतानि गुणात्मकान्येव द्रव्यात्मकानि वा? अस्मिन् पञ्चभूतविचारप्रसंगे च गुणद्रव्ययोर्भेदो वाऽभेदो वेति शङ्का स्वभावतः समुत्पद्यते । किञ्च वैज्ञानिकैस्तु तेजसः शक्तिमात्रत्वमेवाभ्युपगम्य-

---

1. Number. 2. Disposition.
3. Transmutation of metals.

ते न द्रव्यत्वम् । वायुभूतस्यापि शक्तित्वमेव प्रतीयते न द्रव्यत्वमित्यपि प्रष्टुं शक्यते। अत्र तावदेतावदेव समाधानं कर्तुं शक्यं यत् सूक्ष्मतमानां तत्त्वानां स्वरूपविमर्शप्रसङ्गे इदं द्रव्यात्मकं शक्त्यात्मकं गुणात्मकं वेति विवेको नैव कर्तुं पार्यते। सत्त्वरजस्तमांसि महदहंकारशब्दस्पर्शरूपरसगन्धपञ्चतन्मात्राणि एकादशेन्द्रियाणि च शक्त्यात्मकानि गुणात्मकानि द्रव्यात्मकानि वेति कथं कथयितुं पार्येत। वैज्ञानिकानां 'एटम' इत्याख्यः परमाणुरपि यैः 'प्रोटोन' 'इलेक्ट्रोन' इत्याख्यैर्विद्युतिपण्डैर्निर्मीयते तेऽपि शक्तिरूपा द्रव्यरूपा वेति वैज्ञानिकैर्निश्चित्य नैव कथयितुं शक्यते। भारतीयदार्शनिकानां तु द्रव्यं शक्तेः रूपान्तरम्, शक्तिश्च द्रव्यस्य रूपान्तरम्, गुर्वादिगुणा द्रव्यमयाः, गुणद्रव्ययोरभेदश्चेत्ययमेव राद्धान्तः प्रतीयते । द्रव्यव्यतिरिक्तानि गुणादीन्यपि पदार्थान्तराणि न सन्ति प्रत्युत तानि तस्यैव 'विवर्ताः' इति शारीरिकभाष्ये समवायादिनिरसनावसरे विशकलय्य प्रतिपादितमाचार्यैः[1]। किंच "द्रव्यगुणकर्मसामान्यविशेषसमवायाः इति षडेव भावपदार्थाः, शक्तिर्नातिरिक्तः पदार्थः इति मुक्तावल्यादौ स्पष्टीकृतम् । एवं च सत्त्वरजस्तमांसि महदहंकारपञ्चतन्मात्राणीन्द्रियाणि पञ्चभूतानि निखिलप्रकृतिविकृतिभूतानि सूक्ष्मद्रव्यरूपाण्येव । नवीनवैज्ञानिका अपि साम्प्रतं शक्तिद्रव्ययोरभेदं शक्तिश्च द्रव्यरूपेण परिणमतीति मन्वानाः प्रतीयन्ते। द्रव्यं प्रथमतः शक्तिरूपेणैव तिष्ठति । द्रव्यस्य मूलपरमाणवो न केवलं द्रव्यरूपेण किन्तु नानाशक्तिरूपेष्वपि परिवर्तयितुं शक्यन्त इति तेषां मतम्[2]।

1. वेदान्त । २ । २ । 2. "Energy is as proton in form and now includes not electric charges alone but matter itself as one of its forms. So

द्रव्याणां गुणाः—एवं च अणोरारभ्य ब्रह्माण्डपर्यन्तं सर्वाणि द्रव्याणि भौतिकानि पाञ्चभौतिकानि वा। किमपि द्रव्यं शरीरे शरीरधातुषु वा यान्गुणान् प्रभावान्वा प्रदर्शयति तैर्गुणैः प्रभावैर्वा विनिश्चीयते यदिदमाप्यं तैजसं वायुप्रधानं वेति। ईदृशेषु शरीरधातुगुणेष्वसंख्येयेषु सत्स्वपि चरकेण प्रधानत्वाद्विंशतिगुणाः परिगणितास्तद्यथा द्रव्यं हि (१) गुरुगुणं लघुगुणं वा-गौरवोत्पादकं लाघवोत्पादकं वा (२) शीतगुणमुष्णगुणं वा-शरीरनिष्ठपचनदहनस्वेदनाऽऽदीनां शामकं तत्प्रवर्तकं वा (३) स्निग्धगुणं रूक्षगुणं वा-धातुनिष्ठस्नेहबलवर्णादिकारकं तद्विपरीतं स्नेहादिशोषकं वा (४) तीक्ष्णगुणं मन्दगुणं वा-शीघ्रमेव दहनपचनाद्युत्तेजकं तच्छामकं वा (५) स्थिरगुणं चलगुणं वा-स्थैर्यबलाद्युत्पादकं अस्थैर्य-अधैर्य-नैर्बल्यादिजनकं वा (६) मृदुगुणं कठिनगुणं वा-धातुषु स्वाभाविकमार्दवोत्पादकं काठिन्योत्पादकं वा (७) पिच्छिलगुणं विशदगुणं वा-शरीरावयवेषु पैच्छिल्यसंधानक्लेदजनकं पैच्छिल्यक्लेदादिशोषकं वा (८) श्लक्ष्णगुणं खरगुणं वा-श्लक्ष्णतोत्पादकं खरतोत्पादकं वा (९) सूक्ष्मगुणं स्थूलगुणं वा-सूक्ष्मभावोत्पादकं स्थूलभावोत्पादकं वा (१०) द्रवगुणं सान्द्रगुणं वा-स्रावकं बन्धकं वा भवितुमर्हति। विकाशित्व-आशुकारित्व-व्यवायित्वादयोऽन्येऽपि बहवो गुणा द्रव्येषूपदिश्यन्ते।

एवं च (१) गुरु-खर-कठिन-मन्द-स्थिर-विशद-सान्द्र-स्थूल-गन्ध-गुणाधिकानि; धातुषु उपचय-संघात-गौरव-स्थैर्यादिभावोत्पादकानि द्रव्याणि पृथिवितत्त्वबहुलान्यु-

---

that atom of matter might be turned into other forms of energy if only we knew how."

(Encyclo. Brit. Physics)

च्यन्ते। (२) द्रव-स्निग्ध-शीत-मन्द-मृदु-पिच्छिलत्व-रस-गुणोल्वणानि; उत्क्लेदन-स्नेहन-बन्धन-विष्यन्दन-प्रह्लादन-कराणि द्रव्याण्यप्तत्त्वप्रधानान्यभिधीयन्ते। (३) उष्ण-तीक्ष्ण-सूक्ष्म-लघु-रूक्ष-विशदत्व-रूप-गुणबहुलानि; दहन-पचन-दारण-तापन-प्रकाशन-प्रभा-वर्ण-कराणि द्रव्याणि अग्नि-तत्त्वाधिकान्याख्यायन्ते। (४) लघु-शीत-रूक्ष-खर-विशदत्व-सूक्ष्मत्व-स्पर्श-गुणोल्वणानि; शरीरधातुषु रौक्ष्य-लाघव-ग्लपन-वैशद्य-विचारण(विचालन)कराणि च द्रव्याणि वायुप्रधानानि कथ्यन्ते। (५) मृदु-लघु-सूक्ष्म-श्लक्ष्ण-व्यवायि-विविक्तत्व-शब्द-गुणबहुलानि; मार्दव-सौषिर्य-लाघव-कराणि आकाशतत्त्वाधिकान्युदीर्यन्ते।

वातपित्तकफानामपि पाञ्चभौतिकत्वम्—

यद्यपि रसरक्तादयः शरीरधारकत्वा"द्धातु"पद-वाच्याः सन्त्येव, पञ्चभूतानि तु पुनरेतेषां धातूनामपि धारकत्वाच्छरीरशास्त्रे "धातव" इत्युच्यन्ते। शरीरस्थमाकाशतत्त्वं तु निष्क्रियं सौषिर्यकारकमेव। पृथिवीतत्त्वं च सर्वशरीरगतस्थूलसंघातकारणम्। वस्तुतस्तु एतस्य संघातस्य धारकाणि तु शेषाणि त्रीणि वायु-अग्नि-अप्तत्त्वान्येव। एतानि यथा सर्वं बाह्यं जगद्धारयन्ति तथा-ध्यात्म-शरीरगतसर्वभावानपि। उक्तं च सुश्रुते[1] "विसर्गादानविक्षेपैः सोमसूर्यानिला यथा। धारयन्ति जगद्देहं कफ-पित्तानिलास्तथा" यथाऽप्तत्त्वमग्नितत्त्वं वायुतत्त्वं चेति त्रीणि तत्त्वानि सर्वं जगद्धारयन्ति तथाऽप्तत्त्वमेव कफरूपेण, अग्नि-तत्त्वं पित्तरूपेण, वायुतत्त्वं वातरूपेण प्राणिनां शरीराणि धारयन्ति। तान्येव त्रीणि तत्त्वानि शरीरान्तर्गतानि "वात-पित्तकफ" नामभिर्व्यवह्रियन्ते। अतोऽयं नाममात्रभेद एव न वस्तुतत्त्वभेदः।

---

१. (सू० २१)

उक्तं चापि सुश्रुतेन यत् (१) "कफस्तु शरीरस्य उदककर्मणाऽनुग्रहं करोति" अप्तत्त्वस्य कर्मभिरनुगृह्णातीत्यर्थः। चरकोऽप्याह यत् "सोम एव शरीरे श्लेष्मान्तर्गतः कुपिताकुपितः शुभाशुभानि करोति" इति। (२) पित्तविषये च सुश्रुतेनाभ्युक्तम् यत्तत् "शरीरस्य अग्निकर्मणाऽनुग्रहं करोति" अग्नितत्त्वस्य दहनपचनादिकर्मभिरनुगृह्णातीति। तथैव च चरकः "अग्निरेव पित्तान्तर्गतः कुपिताकुपितः शुभाशुभानि करोति" इति। (३) शरीरवातस्तु वाय्वात्मैव। प्रकृतेर्वायुतत्त्वमेव शरीरे वातः सन् प्राणापानोदानसमानव्यानादिनामभिः स्थानभेदेन क्रियाभेदेन च बहुधा विभज्यते। एवं अप्तत्त्वाग्नितत्त्ववायुतत्त्वान्येव शरीरे " कफ पित्त वात " इति नामाभिरुदीर्यन्ते।

(१) अप्तत्त्वस्य यथाविसर्गे सृष्टिः सर्जनं वा कर्म तथा अप्तत्त्वात्मकस्य कफस्य शरीरदार्ढ्यं, धातूनामुपचयः, शरीरस्थिरत्वं, रोगशमत्वं रोगसहिष्णुत्वं वा, मनोबलसम्पादनं चेदं सर्वं शरीरसर्जनात्मकं देहनिर्माणात्मकं वा कर्माभिधीयते। (२) अग्नितत्त्वस्य यथा आदानं संहारो विनाशो वा कार्यं तथाध्यात्ममग्न्यात्मकस्य पित्तस्यापि अन्नधात्वादीनां पचनदहनादिकं रासायनिकविश्लेषणात्मकं रासायनिकपरिवर्तनात्मकं वा कार्यमुच्यते। (३) वायुतत्त्वस्य यथा गतिर्विक्षेपो वा कार्यं तथा वायुतत्त्वात्मकः शरीरान्तर्गतवातोऽपि सर्वचेष्टानाम्प्रवर्तको नियन्ता प्रणेता च मनसः सर्वेन्द्रियाणामुद्योजकश्चेष्टामात्रप्रवर्तकश्चाभिधीयते।

शरीरनिष्ठसोमतत्त्वापराख्यमप्तत्त्वमेव केवलं श्लेष्मा, सोमपृथिव्यात्मके द्वे अपि तत्त्वे वा श्लेष्मशब्देनाभिधीयेते

1. Anabolic functions. 2. Katabolic functions. 3. Biomotor functions.

इतीयमत्र विप्रतिपत्तिः। अत्रेदमेव समाधानं य"च्छ्लेष्मा सौम्यः" सोमगुणो वेति सोमगुणस्य प्राधान्यादप इति शास्त्रेषु व्यपदेशः कृतो दृश्यते। श्लेष्मणि गुरुस्थिरगुणौ गौरवस्थैर्योपचयजनकत्वं वा पृथिवीतत्त्वेन विना नैव संभवति। अतः श्लेष्मणः सौम्यपार्थिवत्वं सोमपृथिव्युभयात्मकत्वं वा प्रायेणाङ्गीक्रियते। शारीरिकवातस्य च कैश्चिदाकाशवाय्वभ्यामुत्पत्तिः स्वीक्रियते। "वियत्पवनजाताभ्यां वृद्धिमाप्नोति मारुतः" इति आकाशपवनाधिकैर्द्रव्यैस्तस्य वृद्धिरभ्युपेयते। तथापि तस्य केवलवाय्वात्मकत्वेऽङ्गीकृतेऽपि न कश्चिद्दोषः।

पञ्चभूतानीव शरीरे वातपित्तश्लेष्माणोऽतिसूक्ष्माः सन्ति। पञ्चभूतानीव च ते शरीरव्यापिनः (च० सू० २०) देहसंभवहेतवश्चाप्युक्ताः। अव्यापन्नास्ते देहरक्षणहेतवो व्यापन्नाश्च शरीरप्रलयहेतवः सम्पद्यन्ते (सु० सू० २१)। देहधारणकारणात्ते धातवः शरीरदूषणाच्च दोषा इत्युदीर्यन्ते। "मलानामतिसूक्ष्माणां दुर्लक्ष्यं लक्षयेत् क्षयम्" इत्यादिवाक्येन वाग्भटेन तेषामतिसूक्ष्मत्वं प्रतिपादितम्। शरीरावयवेषु यत्र यत्र यस्य दोषस्य विशेषेण कर्माणि लक्ष्यन्ते तत्र तत्र तस्य दोषस्य विशेषं स्थानमङ्गीक्रियते। (१) शरीरस्य सर्वेऽपि वातप्रधानकोष्ठा[2] वातप्रधानप्रदेशाश्च तस्य स्थानानि; रजोगुणात्मकाः सर्वेऽपि शारीरमानसाश्चलभावाश्च तस्य कर्माणि निर्दिश्यन्ते। आकाशपवनोल्वणैर्द्रव्यैस्तस्य वृद्धिः प्रकोपो वा तद्विपरीतं पृथिव्यप्तत्त्वाधिकैस्तेजस्तत्त्वाधिकैश्च द्रव्यैस्तस्योपशमो दृश्यते। (२) तेजस्तत्त्वात्मकस्य पित्तस्य तेजःप्रधानाः कोष्ठास्तेजःप्रधानाः प्रदेशाः, पचनदहनादिप्रवर्तकास्तेजोगुणाधिका द्रवा[3] विशेषस्थानानि, पचनात्मकाः सर्वेऽपि

१. (सू० ११) 2. cells.
3. Secretions, Enzymes etc.

शारीरमानसाभावाश्च तस्य कर्माण्युच्यन्ते। तेजस्तत्त्वाधिकानां द्रव्याणामतिसेवनात्तस्य वृद्धिः प्रकोपो वा, पृथिव्यम्बुवायुजैश्च द्रव्यैस्तस्योपशमोऽभ्युपेयते। (३) शरीरधातूनां पृथिव्यप्तत्त्वप्रधानाः कोष्ठास्तदुभयतत्त्वप्रधानाः प्रदेशास्तत्प्रधानाश्च द्रवास्तदात्मकस्य कफस्य विशेषस्थानान्युच्यन्ते। गौरव-स्थैर्य-धैर्य-स्नेहन-प्रभृतयस्तमोगुणाधिकाः सर्वेऽपि शारीरमानसाः स्थितिभावा रचनात्मकाः शरीररक्षणात्मका वा भावास्तस्य कर्माण्युच्यन्ते। आप्यैः पार्थिवैर्गुणैश्च द्रव्यैरतिसेवितैस्तस्य वृद्धिः प्रकोपो वा, तद्विपरीतमाकाशतेजोवाय्वधिकैश्च द्रव्यैस्तस्योपशमो भवति।

एकस्यैव गत्यात्मकस्य "वायुर्वाय्वात्मा" इति सुश्रुतवाक्यानुसारं च वाय्वात्मकस्य वातस्य स्थानभेदेन कार्यभेदेन च प्राणापानोदानसमानव्यानादिनामानि प्रदीयन्ते। एवमतिसूक्ष्मस्य तेजस्तत्त्वात्मकस्य पित्तस्य सोमतत्त्वात्मकस्य कफस्यापि स्थानकार्यभेदेन बहवो भेदा अभिधीयन्ते। एतेषां पृथक् पृथक् पञ्चविधत्वं यच्छास्त्रेषूक्तं तदुपलक्षणमात्रमेव। वस्तुतस्तु वातपित्तकफानां भेदा अपरिगणनीयाः। वातपित्तकफेषु अतिसूक्ष्मेषु सत्स्वपि शरीरे दृश्यमानेषु पित्ताधिष्ठानभूतेषु कफाधिष्ठानभूतेषु नानासूक्ष्मस्थूल द्रवेषु रसेषु स्रावेषु वा इदं पाचकं पित्तमयं श्लेषकः श्लेष्मेत्ययं प्रयोगस्तु लाक्षणिक एव। तथा च शरीरस्य सर्वेऽपि रसाः स्रावाः प्रदेशा वा वातगुणाधिकत्वाद्वातिकाः पित्तगुणाधिकत्वात्पैत्तिकाः श्लेष्मगुणाधिकत्वाच्छ्लैष्मिका इति त्रिविधा एव संभवन्ति। शरीरप्रकृतिविज्ञाने[1] शरीरविकृतिविज्ञाने[2] च एतेषां वातपित्तकफानां तद्भेदानां च बहुविधानि प्राकृतानि वैकृतानि वा कर्माणि वर्ण्यन्ते।

---

1. Physiology. 2. Pathology.

वातादिदोषाणां रोगकारणता उतजीवाणूनामपि ?

शारीरमानससर्वचेष्टामूलभूते वाते, सर्वपचनात्मकप्रक्रियामूलभूते पित्ते, निखिलरचनात्मककर्मणां कारणभूते कफे च समावस्थायामवस्थिते परस्परमविरोधिरूपेणावस्थिते वा शरीरं स्वस्थमित्यभिधीयते। एकस्यापि वैषम्यवृद्धे क्षीणे-वा शेषदोषयोर्विरोधिभूते वा तत्प्रकोपलक्षणेषु समुत्पन्नेषु वा शरीरमस्वस्थमित्युच्यते। तथाचोक्तम् "रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता" इति। एकस्यैव दोषस्य विषमीभूतस्य प्रकुपितस्य वा स्थानभेदाद्रूपभेदाच्च नानाविधा व्याधयः परिकल्प्यन्ते। यथा चाह चरकः "स एव कुपितो दोषः समुत्थानविशेषतः। स्थानान्तरगतश्चैव जनयत्यामयान् बहून्" इति। यथा च सुश्रुतः "कुपितानां हि दोषाणां शरीरे परिधावताम्। यत्र संगः स्ववैगुण्यात् व्याधिस्तत्रोपजायते" इति। असात्म्येन्द्रियार्थसंयोग-प्रज्ञापराध-कालपरिणाम-जीवाणुप्रभृतिषु रोगकारणेषु सत्स्वपि दोषवैषम्यानुत्पत्तौ नैव रोगः संभवति। एतानि व्याधिहेतुभूतानि प्राग्दोषवैषम्यमुत्पाद्यैव रोगं जनयितुं शक्नुवन्ति। एतानि रोगाणां विप्रकृष्टकारणानि व्यभिचारिकारणानि वा। दोषप्रकोपस्य तु सन्निकृष्टकारणता प्रधानकारणता वा स्वीक्रियते। अतएव वाग्भटोऽप्याह "दोषा एव हि सर्वेषां रोगाणामेककारणम्" इति।

तद्विपरीतं पाश्चात्यचिकित्सकास्त्वाहुर्यज्जीवाणव एव रोगाणामेककारणमिति[1]। एवं च दोषाणां रोगकारणता

---

1. "Modern science has clearly shown that nearly all diseases directly or indirectly are caused by germs. It must be confessed that although in many instances these germs have been discovered, in other instances they are yet to

जीवाणूनां वा इत्ययमस्तिमहान्विवादास्पदो विषयः ।

आयुर्वेदे जीवाणूनां वर्णनम्—

ये भूतविषवाय्वग्निसम्प्रहारादिसंभवाः ।

नृणामागन्तवो रोगाः प्रज्ञा तेष्वपराध्यति ॥ इति चरकः ।

अत्र विषशब्देन जीवाणुविषाणामप्यागन्तुरोगकारणत्वं स्वीकृतम् । अथर्ववेदे बहुत्र जीवाणूनां वर्णनमुपलभ्यते । ते शरीरम्प्रविशन्ति व्याधिषु चोपलभ्यन्ते । सूर्यप्रकाशादिप्राकृतोपायैश्च ते निर्हरणीया इत्येतद्भावप्रदर्शका बहवो मन्त्राः पठ्यन्ते । तथाहि—

"अन्वान्त्र्यं शीर्षण्यमथो पार्ष्टेयं क्रिमीन्" ।

"ये क्रिमयः पर्वतेषु वनेष्वोषधीषु पशुष्वप्स्वन्तः ।

येऽस्माकं तन्वमाविविशुः सर्वं तद्धन्मि जनिम क्रिमीणाम्"॥

"यो अक्ष्यौ परिसर्पति यो नासे परिसर्पति ।

दतां यो मध्यं गच्छति तं क्रिमिं जम्भयामसि" ॥ इति ॥

क्रिमीणां नानाविधानि नामानि दृष्टादृष्टभेदेन च तानि द्विविधानीत्यपि श्रूयन्ते, तथाहि—

"दृष्टमदृष्टमतृहमथो कुरूरुमतृहम् ।

अल्गण्डून् सर्वाञ्छलुनान् क्रिमीन् वचसा जम्भयामसि"॥

उत पुरस्तात् सूर्य एति विश्वदृष्टो अदृष्टहा ।

दृष्टांश्च घ्नन् अदृष्टांश्च सर्वांश्च प्रमृणन् क्रिमीन् ॥"

"दृष्टश्च हन्यतां क्रिमिरुतादृष्टश्च हन्यताम्" ॥

"हतासो अस्य वेशसो हतासः परिवेशसः ।

अथो ये क्षुल्लका इव सर्वे ते क्रिमयो हताः" ॥

---

find; nevertheless their existence in the latter may be confidently postulated."

(Manson's Tropical diseases Introduction)

१. २ काण्ड । ५ । ६ । तथा ५ काण्ड । ५ ।

"इन्द्रस्य या मही दृषत् क्रिमेर्विश्वस्य तर्हणी ।
तया पिनष्मि सं क्रिमीन् दृषदा खल्वाँ इव ॥" इति ।

जीवाणूनामदृश्यत्वं प्रतिपादयन्सुश्रुतोऽप्याह (उत्तर.५४) "केशादाद्यास्त्वदृश्यास्ते" इति । वाग्भटस्तु (निदान. ७) जीवाणुशब्दं प्रयुञ्जानो रक्तवाहिशिरासु तेषां रोगोत्पादकत्वमप्यभ्युपजगाम । तथा च "रक्तवाहिशिरास्थाना रक्तजा जन्तवोऽणवः" इति । जीवाणूनां निःश्वासभोजनत्वगादिमार्गैः संक्रामकत्वमपि प्रतिपादितमायुर्वेदे । तथा चोक्तं सुश्रुतेन (निदान. ५)।

प्रसंगात् गात्रसंस्पर्शान्निःश्वासात्सहभोजनात् ।
सहशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात् ॥
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च ।
औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम् ॥

औपसर्गिकरोगा एव न केवलमुपवर्णिता अपितु वायुद्वारेण जलद्वारेण देशविशेषस्य दुष्प्रभावेण कालस्य दुष्प्रभावेण वा सकृदेव सर्वत्र प्रसरतां जनपदोद्ध्वंसकरोगाणामपि वर्णनं कृतश्चरकेण, यथा 'ये तु भावा जनपदमुद्ध्वंसयन्ति ते तु खल्विमे भावास्तद्यथा १ वायुः २ उदकं ३ देशः ४ काल इति" । वायुमार्गेण प्रसरद्भ्यो रोगेभ्यो जलमार्गेण प्रसरन्तो रोगा अधिकं दुष्परिहार्या, देशप्रभावेण प्रसरन्तस्तेभ्योऽधिकं भयंकराः,कालप्रभावाच्च जायमानास्तेभ्योऽपि भूयस्तरं घातका इत्यभिप्रेत्य चरकेणोक्तम् ।

"वाताज्जलं जलाद्देशं देशात्कालं स्वभावतः ।
विद्याद्दुष्परिहार्यत्वाद्गरीयस्तरमर्थवित्" ॥

जीवाणवो दोषप्रकोपमपेक्षन्ते—

इत्थं च रोगेषु जीवाणूनामुपस्थितिं, रोगाणां संक्रामकत्वं, जनपदोद्ध्वंसकत्वं च मन्वाना अप्यायुर्वेदीया इदमेव मन्यन्ते यन्मिथ्याहारा(भ्यां वा ऋतुदोषेण वा कालदोषेण वा

विहारा

बाल्यवार्धक्याद्यायुःस्वभावेन वा पितृपरम्परागतनैर्बल्यविशेषेण वा यदा शरीरे एकस्य द्वयोः सर्वेषां वा दोषाणां न्यूनो वाऽधिको वा प्रकोपः स्यात्तदा तत्परिणामरूपेण जीवाणवः शरीरमाक्रामन्ति स्वीयविषैश्च नानाविधानुपद्रवान् जनयन्ति। समेषु दोषेषु स्वस्थे च शरीरे विद्यमाना अपि जीवाणवो निरुपद्रवा इव तिष्ठन्ति। ते हि रोगोत्पादनार्थं दोषप्रकोपमपेक्षन्ते। दोषेषु प्रकुपितेष्वेव ते रोगोत्पादनसमर्था भवन्ति। तथाहि स्वस्थानामपि मुखे नासायां गलप्रदेशे च प्रतिश्यायजीवाणवः[1], श्लेष्मज्वरजीवाणवः[2], पूयजनकजीवाणवः[3], श्वासज्वरजीवाणवो[4] भूयस्तरां समुपलभ्यन्ते न च कञ्चनोपद्रवं जनयन्तः परिदृश्यन्ते। "डिप्थीरिया[5]" इत्याख्यस्य गलरोगस्यापि जीवाणवः केषांचित्स्वस्थानां गलप्रदेशे सम्प्राप्यन्ते। आन्त्रज्वरजीवाणवो[6] विषूचिकाजीवाणवोऽपि[7] कदाचित्स्वस्थानामान्त्रमलेष्ववलोक्यन्ते। यदा कस्मिंश्चिद्गृहे श्वासज्वर आन्त्रज्वरः प्रतिश्यायज्वरो वा प्रसरति तदा नूनं तस्य जीवाणवः सर्वेष्वपि गृहस्थितेषु संक्रामन्ति परीक्षकैश्च श्वासज्वरादिरुग्णसमीपस्थानां शुश्रूषकाणां गलान्त्रादिमलेषु श्वासज्वरादिजीवाणवः परिदृष्टाः। परं नैव दृश्यन्ते सर्वेऽपि पारिवारिका रोगिणः संजायमानाः। इत्थमेव यदा कस्मिंश्चिज्जनपदे आन्त्रज्वर–विषूचिका–श्लेष्मज्वर–डिप्थीरियाप्रभृतयो रोगाः संक्रामन्ति तदा नूनं तेषां जीवाणवः परःसहस्रेषु मनुष्येषु संक्रामन्ति, परं जनपदस्थितेष्वल्पसंख्यकेष्वेव ते रोगाः समुद्भवन्ति। तेष्वपि च केचिन्मृदु-

---

1. Micrococcus catarrhalis. 2. Influenza Bacilli. 3. Staphylococci. 4. Pneumococci. 5. Diphtheria. 6. Typhoid Bacilli. 7. Cholera Bacilli.

रूपेण केचिच्च तीव्ररूपेण दृश्यन्तेऽभिभूयमानाः ।

जीवाणुप्रवेशमात्रेण व्याधिर्नोत्पद्यते:—

एवं प्रतीयते यत्केवलं जीवाणुसंक्रमणमात्रेण व्याधिर्नोत्पत्तुमर्हति । यद्यपि जीवाणुपरीक्षकैर्निजपरीक्षणानि लघुप्राणिष्वेव क्रियन्ते न मनुष्येषु, तथापि तेषां परीक्षणानामयमेव परिणामो यत्प्रायेण स्वस्थपशूनां शरीरेषु जीवाणून्प्रवेश्य कृत्रिमविधिना रोगो नैव समुत्पादयितुं शक्यते । मुखद्वारेण प्राणिनामान्त्रेषु प्रवेशिता अपि प्रवाहिकाजीवाणवो[1] विषूचिकाजीवाणवश्च प्रवाहिकां विषूचिकां वा नैव जनयन्ति । कदाचित्तु मनुष्याणामान्त्रेषु प्रवेशिता विषूचिकाजीवाणवोऽपि निरुपद्रवास्तिष्ठन्ति । यदि शशादिकस्य कस्यचित्प्राणिनो रक्तवाहिशिरायां स्वल्पमात्रकाः पूयजनकजीवाणवः[2] प्रवेश्यन्ते तर्हि तस्य कश्चिदपि रोगो नैवोत्पद्यते । परं यदि तस्यैव हृदयमहाधमन्यां[3] हृदये वा रक्तमार्गस्य कस्मिंश्चिद्भागे वा शोथः[4] स्याज्जीवाणुप्रवेशनात्प्राक्कृत्रिमो वा शोथः समुत्पाद्येत तर्हि तच्छोथयुक्त एव प्रदेशे ते जीवाणवो रोहन्ति रोगं च जनयितुमर्हन्ति । एवं च जीवाणवोऽपि रोहणार्थं दोषप्रकोपमपेक्षमाणाः प्रतीयन्ते ।

रोगाणां जीवाणवोऽस्माकं नागरिके वायुमण्डले नागरिकभूमौ च प्रभूतमात्रायां विद्यन्ते । अस्माकं सर्वेषां नासा-गल-तालु-कण्ठ-मुखादिगत श्लेष्मकलासु त्वचि च सुतरामुपलभ्यन्ते । वयं परितो जीवाणुभिरभिव्याप्ताः स्म इत्यत्र नास्ति काचिदत्युक्तिः । यदि जीवाणुमात्रमेव रोगाणां प्रधानकारणमभविष्यत्तर्हि वयं सर्वेऽपि रुग्णा अभविष्याम । परं यथा मलिने चिरस्थिते विदग्ध एव जलाशये शैवलाख्यो

1. Dysentery Bacilli. 2. Staphylococci. 3. Aorta. 4. Inflammation.

वानस्पतिको जीवाणुः सम्प्ररोहति, यथा वा चिरस्थिते व्युषित एव क्षीरे दध्युत्पादका अम्लोत्पादका वा दधिजीवाणवः प्ररोहन्ति, विदग्धे पर्युषित एव गुडसम्मिश्रिते जले मद्योत्पादका जीवाणवः समुत्पद्यन्ते तथैव दोषदूषिते मलसंयुक्त एव वा शरीरे शरीरैकदेशे वा जीवाणवः सम्प्ररोहन्ति न निर्दोषे स्वस्थे वा। यथाह चरकः "देहिनं नहि निर्दोषं ज्वरः समुपसेवते" ज्वरशब्दश्चात्र "जीवाणुसंक्रमण"[1]स्योपलक्षणमात्रमेव। तथाहि यदा कफप्रकोपकभावानामतिसेवनात् शैत्यादृतुप्रभावादात्मनः कफप्रकृतिकत्वाद्वा रसादयः कफात्मका द्रवभावाः शरीरे प्रवर्धन्ते स च शरीरद्रवः सहजकारणादागन्तुकारणाद्वा निर्बलीभूतात्कस्माच्चिच्छरीरदेशाद्यथा नासागलकण्ठफुफ्फुसादिश्वासमार्गात्, आमाशयपक्वाशयमलाशयादेरन्नमार्गात्, वृक्कादिमूत्रमार्गात्, त्वचि स्वेदमार्गाद्वा मलरूपेण शरीराद्बहिर्विनिःसर्तुमारभते, कस्मिंश्चित्सन्धौ सर्वसंधिषु वा आमवातरूपेण संचीयते, सर्वशरीरावयवेभ्यो विनिःसरन् श्वयथुरूपेण त्वचि वा संचीयते, फुफ्फुसपर्यावरणकोषे[2] सद्रवपार्श्वशूलरूपेण[3], कोष्ठपर्यावरणकोषे[4] जलोदररूपेण, अण्डपर्यावरणकोषे[5] अण्डवृद्धिरूपेण वा संचीयते तदा यत्र यत्राऽप्यसौ मलरूपः कफद्रवः संचीयते तत्र तत्र कफप्रकोपजः शोथः समुत्पद्यते तत्तत्कफदोषदूषितेषु प्रदेशेषु च नानाविधा जीवाणवः प्रसरन्ति नानाविधांश्चोपद्रवाञ्जनयन्ति।

स्वस्थानामपि मनुष्याणां नासापश्चिमप्रदेशे[6] गलप्रदेशे गलायुग्रन्थ्योर्[7]दन्तमांसेषु वा पूयजनकजीवाणवश्चिरं निरुप-

---

1 Infection. 2. Pleural cavity. 3. Pleurisy with effusion. 4. Peritonium. 5. Tunica vaginalis. 6. Posterior Nares. 7. Tonsils.

द्रवा स्तिष्ठन्ति। यदा शरीरस्य कस्मिंश्चिदङ्गे यथा पित्ताशये[1], बृहदान्त्रश्लेष्मकलायामान्त्रपुच्छे[2] गर्भाशये अस्थिसंधिषु वा श्लेष्मप्रकोपककारणविशेषैः श्लैष्मिकः शोथः[3], पित्तप्रकोपककारणैः पैत्तिकः शोथो[4] वा स्यात्तदैते पूयजनकजीवाणवो[5] गलप्रदेशादुपसृत्य तांस्तान्दोषदूषितान्प्रदेशानाक्रमन्ति। पित्ताशये वान्त्रपुच्छे वा गर्भाशये वा संधिमध्यकोषेषु वा पूयमुत्पाद्य रोगाञ्जनयन्ति[6] इत्थमेव "आन्त्रिकजीवाणवोऽपि[7] सर्वेषामस्माकमान्त्रेषु निरुपद्रवरूपेण तिष्ठन्ति, परं यदा पित्ताशये बृहदान्त्रेषु वृक्कयोरान्त्रपुच्छे प्रसूताया गर्भाशये वा पैत्तिकः श्लैष्मिको वा प्रकोपः स्यात्तदा चिरान्मित्ररूपेण तिष्ठन्तोऽप्येते जीवाणवः शत्रुरूपेण परिणमन्त एतानाशयानुपसर्पन्ति। संधिकज्वरग्रस्तानामस्थिसन्धिष्वपि[8] कदाचित्पूयजनकजीवाणवः संदृश्यन्ते, ते च तत्र गलदन्तादिभ्य एवागच्छन्तीत्यनुमीयते।

सर्वेषां त्वचि पूयजनकजीवाणवो[9] भूयस्त्वेनोपलभ्यन्ते। आगन्तुकारणैः क्षतेषु समुत्पन्नेष्वपि न कञ्चनोपद्रवं जनयन्ति। येषां तु त्वचि वातकफयोः प्रकोपः स्यात्तेषां रोमकूपानुपसृत्य नानाविधाः पिडकाः[10] समुत्पादयन्ति। व्रणजनकाः पूयजीवाणवोऽप्यस्माकं[11] त्वचि विद्यन्ते। नच कञ्चनोपद्रवं दर्शयन्ति। परं यदाऽतिश्रमाद्वार्धक्यादन्यकारणेभ्यो वा निर्बलीभूते शरीरे वायोरतिप्रकोपः स्यात्तदा नखकण्टकादीनां संघर्षात्समुत्पन्ने

---

1. Gall bladder. 2. Appendix. 3. Catarrhal inflammation. 4. acute inflammation. 5 Staphylococci and streptococci. 6. Chole cystitis, appendicitis, metritis, and arthritis. 7. Bacillus coli. 8. Rheumatic fever. 9. Staphylococci. 10. Furuncles. 11. Streptococci.

साधारणे क्षतेऽपि ते वेगेन प्ररोहन्ति रसवाहिनीर्नाडीश्चोपसृत्य त्वचि महान्तं विसर्पशोथमुत्पादयन्ति । इतरजनेषु निरुपद्रवा इव विद्यमाना इम एव पूयजीवाणवः वातप्रकोपाभिभूतस्य मधुमेहरोगिणस्त्वचि स्वल्पकारणादेव पिडका व्रणादींश्चनयन्ति । योनिमार्गे योनिसमीपस्थायां त्वचि वा पूयजीवाणवः स्वाभाविका एव परं प्रसूतिकाले तेषां न कश्चनोपद्रवः संदृश्यते । परञ्चिररुग्णाया निर्बलकायाया जनन्याः कष्टप्रसवे यदा शरीरे त्रयाणां दोषाणां प्रकोपो भवति तदा त एव जीवाणवो योनिमार्गाद्गर्भाशयमुपसृत्य प्रसूतिज्वरसुलभाननेकानुपद्रवानुत्पादयन्ति । आन्त्रज्वरस्यान्तिमे भागेऽपि यदा शरीरे वातप्रकोपस्य प्राबल्यं भवति तदा एत एव पूयजीवाणवो रोगिणस्त्वचि विद्रधीनुत्पादयन्ति । ये च क्षयरोगजीवाणवोऽस्माकं नागरिके वायुमण्डले भूयस्त्वेनोपलभ्यन्ते ते नूनमस्माकं सर्वेषां शरीरं प्रविशन्ति परं केषाञ्चिद्दोषाभिभूतवक्षसामुरःक्षय आन्त्रक्षयो वा रोगो भवति न सर्वेषाम् । येषां भवति तेष्वपि केषाञ्चिन्मृदुरूपेण केषांञ्चिच्च तीव्ररूपेणेतीदं सर्वं वैषम्यं शरीरदोषकारणकमेव प्रतीयते न जीवाणुकारणकम् ।

प्रायेण जीवतां पुरुषाणां रुधिरे रोगजीवाणवो नैव प्रवर्धन्ते रक्तवाहिनीषु नाडीषु च न चिराय जीवन्ति । परं चिररुग्णस्यासन्नमृत्यो रुधिरेऽपि जीवाणवः समुपसर्पन्ति मृत्योरूर्ध्वं च रक्तवाहिनीषूपलभ्यन्ते । एतेन सिद्ध्यति यच्छरीराभ्यन्तरे स्थिताः शरीरस्य समीपे विद्यमाना जीवाणवः स्वस्थे देहे समेषु दोषेषु वा नैव प्ररोहन्ति । ते दोषाणां प्रकोपमेव प्रतीक्षन्ते । दोषैः प्रदूषितेषु मलिनेष्वेव धातुषु प्रवर्धन्ते । यदा स्व-

1. Lymphatics. 2. Erysipelas. 3. Staphylo and strepto cocci.

भावत एव सर्वेषां शरीरेषु दोषाणां प्रकोपो भवति। यथा वसन्ते श्लेष्मणः, प्रावृषि वायोः, शरदि च पित्तस्य, तदा शरीरे चिरप्रसुप्ता इव विद्यमाना जीवाणवः सचेष्टाः प्रबलाश्च संजायन्ते। एतेष्वेव सन्धिकालेषु संक्रामकरोगाः प्रायेण प्रसरन्ति। तथाहि वसन्ततौ जायमाना प्रतिश्यायकासश्लेष्मज्वररोमान्तिकाविस्फोटका जीवाणवः कफप्रकोपं, ग्रीष्मे प्रावृषि वा जायमाना आन्त्रज्वरविषूचिकाप्रवाहिकाप्रभृतीनां जीवाणवो वातप्रकोपं, शरदि च जायमानानां विषमज्वरान्त्रज्वरप्रभृतीनां जीवाणवः पित्तप्रकोपमपेक्षन्ते।

जीवाणवो बीजरूपा भूमिमपेक्षन्ते—

एतेन रोगाणां जीवाणवस्तु बीजरूपा इव प्रतीयन्ते। यथा बीजान्यनुकूले काले अनुकूलभूम्यामेव च प्ररोहन्ति प्रतिकूले काले प्रतिकूलभूम्यां च प्रसुप्तानीव तिष्ठन्ति तथा रोगाणां जीवाणवोऽप्यनुकूलभूम्यामेव प्रवर्धन्ते। आयुर्वेदीयास्तु रोगनिदानकाले भूमिदोषान्वेषणे चिकित्सावसरे च भूमेर्दोषपरिहारमेव विशेषेण कुर्वन्ति। दोषेषु प्रशान्तेषु विमलीभूतेषु च धातुषु प्रतिकूलामवस्थामवाप्य रोगजीवाणवः स्वयमेव प्रशाम्यन्ति विनश्यन्ति वा। यथा क्षयरोगप्रतिषेधाय तद्विनिवारणाय वा तज्जीवाणुहरैरौषधैर्धूमैरन्यैर्बाह्योपचारैर्वा न तथा साफल्यमवाप्यते यथा क्षीरघृतनवनीतादिपौष्टिकाहारैर्मृदुभिर्भ्रमणतैलविमर्दनादिव्यायामैर्वातादिदोषहरैर्बल्यैरौषधैर्मनोरञ्जकोपायैर्वा शरीरबलसम्पादनेन। ईदृशैरुपायैर्निर्दोषीकृतेषु श्वासमार्गेषु, स्वभावत एव वा निर्दोषेषु तेषु क्षयरोगजीवाणवो न चिराय जीवितुम्प्रभवन्ति।

जीवाणुभ्यः शरीरं परिरक्षितुं शरीरनिष्ठजीवाणून्वा विनिहन्तुमयमेव सर्वोत्तमोपायो यत् स्वस्थवृत्तोक्तैर्विधिभिर्वातपित्तकफानां स्वाभाविकं साम्यं परिरक्ष्येत विषमी-

भूतानां च तेषां पुनः शामकोपायैः साम्यत्वं सम्पाद्येत। प्रकृतिभूता हि वातपित्तकफाः शरीरस्थितिहेतवो विकृतिं गताश्च प्रलयहेतवः संजायन्ते। प्रकृतिस्थिता एते स्वयमेव जीवाणून् परिहरन्ति, विकृतिं गतेष्वेतेषु जीवाणुहरणार्थं प्रयुक्ता अस्माकं सर्वेऽपि कृत्रिमा उपाया अन्ततो निष्फला एव भवन्ति। दोषा हि शरीरस्य बलं, तेषु निर्बलेषु सत्सु कृत्रिमैर्जीवाणुहरोपायैरेव नैव कश्चिद्रोगिणं जीवयितुं क्षमते। वातस्तु शरीरस्य मुख्यं बलमस्त्येव। यथा च चरकः "वायुरायुर्बलं वायुः" इति। वायौ हि परिक्षीणे सर्वे जीवाणवः शरीरमनायासेनाक्रामन्ति। परं श्लेष्मा विशेषेण शरीरं जीवाणुभ्यः परिरक्षति तद्धि शरीरस्य महद्बलमस्ति। यथाचाह चरकः "प्राकृतस्तु बलं श्लेष्मा" इति। श्लेष्मणि प्रकृतिस्थिते जीवाणवः शरीरे नैव जीवितुं पारयन्ति। नासामुखकण्ठामाशयश्वासमार्गादिगतास्तत्तच्छ्लेष्मणैव ते विनिहन्यन्ते। तथा च श्लेष्मणि काचिद्रोगक्षमशक्तिः प्रतीयते यां च स्वीकुर्वता वाग्भटेनाप्युक्तम् "श्लेष्मा स्थिरत्वस्निग्धत्वसन्धिबन्धक्षमादिभिः" इति। विकृते मलीभूते वा श्लेष्मणि जीवाणवो भूयस्तरां प्रवर्धन्ते। तथा च नासादिगतश्लेष्मणः प्रकोपे नासादिषु जीवाणवः प्रचुरा भवन्ति।

ओजः शरीररक्षकं द्रव्यम्—

ओजस्तु शरीरे कश्चिच्छ्लैष्मिको रसः प्रतीयते यो हि शरीरं जीवाणुभ्योऽभिरक्षति। श्लेष्मणो रोगक्षमशक्तिस्तत्कारणकैव। चरकेण श्लेष्मण ओजसश्चाभेदं प्रतिपादयताभ्युक्तम्—

"प्राकृतस्तु बलं श्लेष्मा विकृतो मल उच्यते।
स चैवोजः स्मृतः काये स च पाप्मोपदिश्यते॥"

च०। सू०। १८।

सुश्रुतेनाप्योजः शरीरस्य बलमित्युक्तम् "रसादीनां

शुक्रान्तानां धातूनां यत्परं तेजस्तत्खलु ओजस्तदेव बलमित्युच्यते" (सु०। सू०।१५) इति। श्लेष्मणः सदृशा एव च तस्य गुणा उपवर्णितास्तथा च "ओजः सोमात्मकं स्निग्धं शुक्लं शीतं स्थिरं रसम्। विविक्तं मृदु मृत्स्नं च प्राणायतनमुत्तमम्" चरकोऽपि तस्य श्लेष्मणः सदृशानेव गुणानुपदिशन्नाह—

गुरु शीतं मृदुश्लक्ष्णं बहलं मधुरं स्थिरम्।
प्रसन्नं पिच्छिलं स्निग्धमोजो दशगुणं स्मृतम्॥

च.। चि.। १२॥

एतच्छ्लेष्मगुणं द्रव्यं जीवाणूंस्तद्विषाणि च हन्तीति नो विचारः। प्रायेण सर्वेऽपि जीवाणवस्तद्विषाणि वा उष्णतीक्ष्णसूक्ष्मादिगुणानि वातपित्तप्रकोपणानि च। मद्योत्पादकस्य जीवाणोर्विषभूतं मद्यं सर्वजीवाणुविषाणां प्रतिनिधिभूतं तत्सदृशं वा स्वीकर्तुं शक्यते। तस्य दशगुणाः चरकेण प्रतिपादितास्तद्यथा—

लघूष्णं तीक्ष्णसूक्ष्माम्लव्यवाय्याशुगमेव च।
रूक्षं विकाशि विशदं मद्यं दशगुणं स्मृतम्॥

मद्यस्यैते दशगुणा ओजसो दशगुणेभ्यः सर्वथा विपरीताः। एतेन मद्यादिसर्वजीवाणुजन्यविषाणामोजसो वैपरीत्यमनुमीयते। मद्यादिजीवाणुविषाणि वातपित्तगुणानि ओजश्च श्लेष्मगुणं तच्च सर्वाणि विषाण्यपहन्ति। जीवाणुविषाणां प्राबल्ये शरीरस्योजः क्षीयते, ओजसश्च प्राबल्ये जीवाणुविषाणि क्षीयन्ते। यदा "अभिघातात्क्षयात्कोपाच्छोकाद्ध्यानाच्छ्रमात्क्षुध। ओजः संक्षीयते ह्येभ्यः" इत्यादिसुश्रुतोक्तैरोजःक्षयकरैर्भावैरोजः संक्षीयते शरीरस्य बलं वाऽपहीयते तदा जीवाणवोऽपि शरीरे बद्धमूला उपद्रवकराश्च संजायन्ते। शरीरं रोगेभ्यः परिरक्षितुं रोगग्रस्तं शरीरं रोगे-

---

1. Yeast.

भ्यो विमोचयितुं वा जीवाणुहरी चिकित्सा कर्तव्या उत वातपित्तकफानामोजसो वा बलमभिवर्धयितव्यमित्यस्मिन्विकल्पे आयुर्वेदीया दोषसाम्यसम्पादनं प्रकुपितदोषप्रशमनं शरीरबलसंवर्धनं च बलवत्तरं मन्यन्ते, जीवाणुहरणं च ततो गौणतरं स्वीकुर्वन्ति।

कोऽयमोजोरस इति निश्चित्य न वक्तुं पार्यते। परीक्षणैः साधितं परीक्षकैर्यद्यदा जीवाणवो नासागलकण्ठश्वासमार्गादिषु शरीरस्रोतस्सु प्रविशन्ति तदा ते तदीयश्लैष्मिकद्रवैर्विनिहन्यन्ते। तथैव यदि केचिज्जीवाणवः स्वल्पमात्रायां कस्यांचिद्रक्तवाहिन्यां नाडयां प्रवेश्यन्ते तर्हि ते तत्र त्वरितमेव म्रियन्ते। तथैव रुधिरादाहृते रक्तमस्तुनि कूपीस्थिते यदि केचिज्जीवाणवो विनिक्षिप्यन्ते तेऽपि तत्र शीघ्रं म्रियमाणा अवलोक्यन्ते। सर्वशरीरद्रवभागान्तर्गतं द्रव्यमिदं "जीवाणुहरद्रव्यं[1]" मित्युच्यते। शरीरस्य श्लैष्मिककोष्ठेभ्यो यथा—श्वासवाह्यन्नवाहिस्रोतसां रक्तवाहिस्रोतसामन्तर्गताभ्यः श्लेष्मकलाभ्यो लसीकाग्रन्थिभ्यो[2] लसीकायुक्तावयवेभ्यस्त[3]स्योत्पत्तिः स्वीक्रियते। अनेन "जीवाणुहरद्रव्येण" सह ओजसः सादृश्यमनुमीयते। ओजोगुणश्च श्लेष्मा शरीरस्य बलं रोगक्षमशक्तिर्वेति सत्यमेव प्रतीयते। अतएव श्लेष्मादिदोषाणां समीकरणमेव रोगाणां विनिवारणस्य प्रधानोपाय इति आयुर्वेदीयानामभ्युपगमः।

जीवाणूनामागन्तुरोगकारणत्वम्—

निजरोगाणां दोषवैषम्यमेव प्रधानं कारणमागन्तुरोगाणां पुनर्जीवाणवोऽपि कारणम्। यथा सहसा मद्यादिविषस्यातिसेवनेन रोगः संजायते तथा जीवाणूनां तद्विषाणां वाऽति-

---

1. Bactericidal substance, opsonin etc.
2. Lymph glands. 3. Lymphatic tissues.

प्रसंगेन समधातोरपि मनुष्यस्य रोगः संभवति । तदायमागन्तुरोग इत्युच्यते । बुद्धेः प्रमादो मिथ्याज्ञानं प्रज्ञापराधो वा तस्य हेतुरङ्गीक्रियते । यथाह चरकः "ये भूतविषवाय्वग्निक्षतभङ्गादिसंभवाः। नृणामागन्तवो रोगाः प्रज्ञा तेष्वपराध्यति"। चि० । ५ । ७ । अत्र विषशब्देन मद्यादिसर्वजीवाणुविषाणां ग्रहणेन जीवाणुसंक्रमणकारणादुत्पन्ना आगन्तवो रोगास्तु मिथ्याज्ञानमूलका एवोक्ताः । अतएवाशिक्षितेष्वसभ्येषु देशेषु तादृशा आगन्तवो रोगा भूयस्त्वेन प्रसरन्ति । शिक्षितेषु सभ्येषु च देशेषु तादृशानामागन्तूनां रोगाणां नामापि न श्रूयते । विषमज्वरस्याप्यागन्तुत्वं प्रतिपादयता चरकेणोक्तम् 'आगन्तुरनुबन्धो हि प्रायशो विषमज्वरे' इति (ज्वर चि.)।

जीवाणवो मद्यादीनि जीवाणुविषाणि वा प्राक् दोषाणां वैषम्यमुत्पाद्यैव पश्चाद्रोगाञ्जनयन्ति न स्वातन्त्र्येण; नाविज्ञोभ्य शरीरदोषान्प्रभवन्ति ते रोगमुत्पादयितुम् । तथाच चरकः "आगन्तुर्हि व्यथापूर्वं समुत्पन्नो जघन्यं वातपित्तश्लेष्मणां वैषम्यमापादयति" (सू० २४) इति वैषम्यमुत्पाद्यैवागन्तुः रोगाञ्जनयति ।

रोगक्षमशक्तिः[1]—

आगन्तुरोगाणां कारणभूतानि जीवाणुविषाण्यपि क्रमेणोपयुक्तानि न रोगाय कल्पन्ते । यथा मद्यं क्रमेण परिशीलितं मात्रया संवर्ध्यमानं वा कालान्तरेण प्रभूतमात्रायामप्युपयुक्तं नोन्मादञ्जनयति तथा यदि जीवाणुविषस्य पूर्वं लघ्वी ततस्ततोऽपि गुर्वी पुनस्ततोऽपि गुर्वी मात्रा क्रमेण शरीरे प्रवेश्येत तर्हि कालान्तरे तद्विषस्य गुरुतरमात्रायाः प्रयोगेऽपि न दृश्यते कश्चनोपद्रवः । यः प्राङ्मद्यस्य स्वल्पामपि मात्रां सोढुं न क्षमते स एव क्रमशो मद्यपानात्काला-

---

1. Immunity.

न्तरे तस्य महतीं मात्रामपि विषहते। इत्थमेव यदि कश्चित्स्वशरीरे कस्यचिज्जीवाणोस्तद्विषस्य वा पूर्वं लघ्वीं ततश्च गुर्वीं मात्रां शरीरे प्रवेशयति तर्हि स तद्रोगजीवाणोस्तद्विषयस्य वा महतीं मात्रामपि सोढुं पारयति नच तेन रुग्णो भवति, भवति चेत्तस्य रोगस्य वेगो मृदुरेव भवति। इयमेव रोगक्षमशक्तिः। महामारीविषूचिकामसूरिकारोगान्प्रति रोगक्षमशक्तिं समुत्पादयितुं तत्तद्रोगविषाणां लघ्वी मात्रा शरीरे सम्प्रवेश्यते। उत्पन्नायां च तस्यां तत्तद्रोगस्य भयं विनिवर्तते। तावन्मात्रमेव जीवाणुविषमेकस्य रोगञ्जनयति नापरस्य इत्ययं भेदस्तु परस्परं तत्तद्रोगसहनशक्तेर्वैषम्यमेव प्रकटयति। येषामेकदा तादृशो रोगः संजायते तेषां तद्रोगसहनशक्तेरतिरेकात्पुनश्चिरकालाय स रोगो नैव दृश्यते।

असात्म्यता[1]—अन्ये तु असात्म्यतामेव जीवाणुविषजन्यानां रोगाणां कारणम्मन्यन्ते। असात्म्यन्नाम तद्यन्नोपशेते न वाऽनुकूलत्वेन तिष्ठति। यथाह चरकः "असात्म्यमिति तद्विद्याद्यन्न याति सहात्मताम्" (शा० १)। तच्च वातादिदोषाणां प्रकोपमुत्पाद्य रोगञ्जनयति। तथा च चरकः "असात्म्यसेविनां त्रयो दोषाः प्रकुपिताः शरीरमुपसर्पन्त उपघाताय उपपद्यन्ते इति (शा० ३)।

आयुर्वेदे असात्म्येन्द्रियार्थसंयोगादेव शरीरे सर्वे रोगाः समुत्पद्यमानाः स्वीक्रियन्ते। रोगजीवाणवस्तद्विषाणि वा नितान्तमस्माकमसात्म्यानि तैः सह संयोगे दोषाणां प्रकोपः स्वाभाविक एव। यथा च चरकः (शा० १) "यो भूतविषवातानामकालेनागतश्च यः। स्नेहशीतोष्णसंस्पर्शो मिथ्यायोगः स उच्यते" अत्र विषशब्देन जीवाणुविषाणामपि ग्रहणादसात्म्येन जीवाणुविषेण सह संयोगो मिथ्यायोगो दोषप्रकोपकश्च स्वीकृतः।

1. Idiopathy, Susceptibility, Anaphylaxis.

किन्तु यथा मद्यमसात्म्यमपि पूर्वं लघुतरमात्रया पुनश्च गुरुतरमात्रया सेव्यमानं सात्म्यतां भजते कालान्तरे चातिगुरुतरमात्रया सेव्यमानमपि तन्नोपद्रवाय कल्पते तथा नितान्तमसात्म्यानि जीवाणुविषाण्यपि पूर्वं लघुतरमात्रया पुनस्ततोऽपि गुरुतरमात्रया सेव्यमानानि सात्म्यानि निरुपद्रवाणि च संजायन्ते । यथा तु चरकेणोक्तं (विमान १) "सात्म्यमपि हि क्रमेणोपनिवर्त्यमानमदोषमल्पदोषं वा भवति" इति । तद्वदिदमपि सत्यं यदसात्म्यमपि क्रमेण सेव्यमानमदोषमल्पदोषं वा भवतीति ।

सात्म्यासात्म्यप्रसंगे चरकेण सात्म्यं प्रवरावरमध्यमभेदेन त्रिविधं विभक्तम् । मद्यादीनि यथाऽवरसात्म्यानि जीवाणुविषाण्यपि तथाऽस्माकमवरसात्म्यानि । अवरसात्म्यानां प्रवरसात्म्यं कथमुपपादयेदिति प्रश्ने चरकस्त्वाह "क्रमेण प्रवरमुपपादयेत्सात्म्यम्" इति । वर्तमानजीवाणुशास्त्रज्ञैरेकस्य कस्यचिज्जीवाणोर्विषद्रव्यं पूर्वं स्वल्पमात्रया पुनर्गुरुतरमात्रया रोगिणः शरीरे संप्रवेश्यते विरोधिनो रोगकारणभूतस्य जीवाणोश्च शरीरेण सह सात्म्यमुत्पाद्यते तेन अवरसात्म्योऽपि जीवाणुः प्रवरसात्म्यतामवाप्नोति ।

कस्याप्येकस्य जीवाणोर्विषं केषांचिदेव दोषान्प्रकोपयति न सर्वेषाम् । बहूनामध्ये कश्चिदागन्तुकारणभूतेन रोगजीवाणुनाऽभिभूयते अपरस्तु स्वस्थ एव तिष्ठतीत्यत्रेदमेव कारणं यन्न किमपि द्रव्यं सर्वेषां तुल्यत्वेन असात्म्यम् । असात्म्यता ह्यापेक्षिकी । प्रथमं तावत्सा प्रकृतिमपेक्षते । वातप्रकृतेः स्वल्पमपि वातप्रकोपकं द्रव्यं महतेऽपकाराय कल्पते । येषां स्वभावादेव श्वासमार्गे वातप्रकोपः स्याच्छ्वासमार्गान्तर्गतस्य श्वासनियामकस्य वातस्य[1] पैतृकी निर्बलता वा स्यात्तेषां स्वल्पेनापि कारणेन पुष्पपरागधान्यपराग-

1. Vagus.

प्राणित्वगादीनां गन्धघ्राणमात्रेण नासागलकण्ठान्तर्गतेन स्वल्पेनापि क्षोभककारणेन वा प्रावृषि शीतस्पर्शेन वा शीतद्रव्यपरिषेवणेन वा स्वल्पेनाजीर्णजन्यविषेण वा अयं श्वासनियामको वातः प्रकुप्यति[1] श्वासरोगस्य च वेगः समुत्पद्यते । यदेवान्येषां निर्दोषं तदेव तेषां दोषप्रकोपाय प्रभवति। एवमेव येषां प्रकृत्यैव त्वचि वातप्रकोपः स्यात्त्वच्यानां रक्तवाहिनीनां नियामकस्य व्यानाख्यस्य वातस्य[2] पितृपरम्परागतं नैर्बल्यं वा स्यात्तेषां क्षीरस्य दध्नः कुक्कुटाद्यण्डानां वा स्वल्पेनाप्यजीर्णजन्यविषेण सहसा त्वचि शीतपित्तस्य रक्तवर्णानि सकण्डूनि मण्डलान्युत्पद्यन्ते[3] । एवमेकस्य कृते निर्दोषमल्पदोषं वा द्रव्यं जीवाणुविषं वाऽपरस्य वातप्रकृतेर्वातोपद्रवकरं सम्पद्यते । एवमन्यजनेभ्यो निर्दोषमल्पदोषं वा पित्तप्रकोपकं कफप्रकोपकं वा द्रव्यं जीवाणुविषं वा पित्तप्रकृतये कफप्रकृतये वा नितान्तमसात्म्यमुपद्रवकरं च सन्दृश्यते । वातादेर्निजप्रकृतेरनुकूलगुणमसात्म्यं विपरीतगुणं च सात्म्यमिति । तथा च चरकः "दोषाणामामयानां च विपरीतगुणं गुणैः । सात्म्यमिच्छन्ति सात्म्यज्ञाश्चेष्टितं चाद्यमेव च" ॥ इति ।

असात्म्यता देशभेदेनाऽपि विभिद्यते । एकस्मिन्देशे ये जीवाणवो भूयस्त्वेनोपलभ्यन्ते ते हि तत्रत्यानां जनानां कृते किञ्चित्किञ्चित्सात्म्यतामुपगच्छन्ति न च तेषां त्वरितमुपद्रवकराणि भवन्ति नवागन्तुकानामसात्म्यत्वात्तान्येव शीघ्रं व्याधिञ्जनयन्ति । विषमज्वरबहुलेषु देशेषु निवसतां जनानां विषमज्वरो न तथा बलवान्शीघ्रकारी च भवति यथा बहिर्देशेभ्यः समागतानान्नवागन्तुकानां दृश्यते । क्षयरोगजीवाणवोऽपि चिरान्नगरेषु निवसतां तथा न बाधका भवन्ति यथा

1. Vagotonicity is produced. 2. Vasomotor. 3. Urticaria.

जन्मप्रभृतिग्रामवासिनामचिराच्च नगरं समाश्रितानाम् । महामारीप्रभृतीनामागन्तुरोगाणां जीवाणवो नवीनदेशमुपगताः प्राग्यथा बलवन्तो विध्वंसकराश्च भवन्ति कालान्तरेण तत्रत्यानां सात्म्यतामुपगता न तथा बलवन्तो दृश्यन्ते । शरीरे प्रविष्टः सर्वथानवीनो रोगजीवाणुः प्रागतिक्लेशकरो भवति शरीरे कृताधिष्ठानः स एव पुनरल्पबलः संजायते यतो हि रोगजीवाणौ तद्विषे वा सात्म्यमुपगते तद्बलमपहीयते । यस्यैकदा मसूरिकासदृश आगन्तुरोगः संजायते तं पुनः स रोगो नैव बाधते । यथा विषक्रिमिर्विषेण न निहन्यते । यथा वा मृन्निवासिनः कुक्कुटादयः पक्षिणो मृन्निवासिभिः स्तम्भरोगजीवाणुभिर्नाभिभूयन्ते । तथा वयमपि निजदेशे बाहुल्येनोपलभ्यमानैरतएव सात्म्यतामुपगतैस्तैस्तैर्जीवाणुभिर्नाभिभूयामहे । एवं च यथाऽसात्म्यता देशमपेक्षते तथा राशिमप्यपेक्षते । मद्यजनितोन्मादरोगो मद्यराशिमिव जीवाणुजनितरोगो जीवाणुराशिमपेक्षते । स एव च राशिरेकस्य रोगं जनयति नान्यस्य ।

अत्रायमभिसन्धिर्यन्निजरोगाणां तु दोषप्रकोप एव मूलकारणम् । तेषु दृश्यमाना जीवाणवस्तत्परिणामरूपा एव । महामारीमसूरिकाप्रभृतिष्वागन्तुरोगेषु तु जीवाणवोऽपि कारणम् । तेऽप्यसात्म्यत्वा"दसात्म्येन्द्रियार्थसंयोगो रोगकारण"मिति सिद्धान्तानुसारं दोषान्प्रकोपयन्ति रोगांश्च जनयन्ति । तेषामसात्म्यता च "प्रकृतिकरण(संस्कार)संयोगराशिदेशकालोपयोगसंस्थोपयोक्तृ" (च० वि० १) भेदाद्विभिद्यते । नितान्तविपरीतानां जीवाणूनां स्वयमेव क्रमेण सात्म्यत्वमुत्पद्यते, कृत्रिमविधिभिश्चापि तत्सात्म्यत्वमुत्पादयितुं शक्यत इति ।

I. Tetanus Bacilli. 2. Vaccine.

अन्तिमन्निवेदनम्—

अन्ते च—अस्मिन्गीर्वाणवाण्यात्मके संक्षिप्ते निबन्धे प्राचीनायुर्वेदस्य नवीनायुर्वेदेन सह सामञ्जस्यं प्रदर्शयितुं मया यत्किञ्चित्प्रयतितम्। तत्र संस्कृतभाषायां नूतनपारिभाषिकशब्दानामभावात् क्वचित्क्वचित्तात्पर्यस्य दुरूहत्वमपरिहार्यमेवेति क्षन्तव्यमार्यमिश्रैः। क्वचिच्च स्पष्टतायै द्वन्द्वादिसमासेष्वपि सन्ध्यभावः स्वीकृतः। वैज्ञानिकनिबन्धेषु भाषायाः साहिती चमत्कारः प्रायः प्राज्ञैर्न मृग्यत इति तदलाभे यथाकथञ्चित्सन्तोष्टव्यमुदाराशयैः प्रेक्षावद्भिः पाठकैः।

सम्प्रत्येव वाराणस्यां संयुक्तप्रान्तीयराजतन्त्रस्यैकेन प्रमुखेनाधिकारिणा प्राचीनस्यायुर्वेदशास्त्रस्यावैज्ञानिकत्वमुद्घोष्य अनधिकारचर्चया सह स्वकीयमायुर्वेदविज्ञानशून्यत्वं पक्षपातदूषितहृदयत्वं यथावदध्ययनेन विना सहसा सम्मतिप्रदानाच्च स्वकीयमवैज्ञानिकत्वमाविष्कृतम्। तत्र च नात्याश्चर्यम्। उक्तं च

'न वेत्ति यो यस्य गुणप्रकर्षं स तं सदा निन्दति नात्र चित्रम्।
यथा किराती करिकुम्भमुक्तां मुक्तां परित्यज्य बिभर्ति गुञ्जाम्'॥

परन्तु प्राचीनायुर्वेदस्यैव भेषजरत्नानि प्रत्यहं मुष्णन्तस्तानि स्वद्रव्यगुणशास्त्रे समावेशयन्तः प्राचीनायुर्वेदं पुनरवैज्ञानिकविरुदेन दूषयन्तो न लज्जन्ते साहसिका इति यत्सत्यमद्भुतम्। एतादृशानामेव कृते कृतिनामियं घोषणा—

'साहित्यपाथोनिधिमन्थनोत्थं कर्णाऽमृतं रक्षत हे कवीन्द्राः।
यत्तस्य दैत्या इव लुण्ठनाय काव्यार्थचौराः प्रगुणीभवन्ति'।

अथवा किमेषां ग्रीष्मदुर्धर्षे उष्णरश्मौ धूल्युद्धूलनप्रयत्नशालिनां प्रयासैः। उक्तंच—

'गृह्णन्तु सर्वे यदि वा यथेच्छं नास्ति क्षतिः क्वापि कवीश्वराणाम्।
रत्नेषु लुप्तेषु बहुस्वमर्त्यैरद्यापि रत्नाकर एव सिन्धुः।'

वैज्ञानिकम्मन्याः केचित्पाश्चात्या विपश्चितःस्वार्थवशादभिमानवशाद्वा प्राचीनायुर्वेदमधिक्षिपन्ति चेदधिक्षिपन्तु नाम। यत्तु केचिद्भारतीया अपि त्रिदोषसिद्धान्तं सम्यगननुशील्य आयुर्वेदमवैज्ञानिकत्वकलङ्कपङ्केनाकुलयन्ति तेषां दुर्ग्रहाणामुपशमाय अयमस्माकं लघीयान् प्रयत्नः।

निबन्धेऽस्मिन् भाषासंशोधनादिना गुरुकुलीयसाहित्योपाध्यायैः श्रीमद्भिर्वागीश्वरमहोदयैः संस्कृताध्यापकैर्भगीरथशास्त्रिभिश्च पत्राणां संशोधनेनयन्महत्साहाय्यम्प्रदत्तं तदर्थमनुगृहीतोस्मि तेषाम्।

काङ्गड़ी गुरुकुलम्
२८-१०-३५

इति निवेदयति
भिषजां वशंवदः
धर्मदत्तः।

विषय-सूचिका

क—प्रस्तावनान्तर्गतविषयाणां सूचिका

ख—त्रिदोषविषयाणां सूचिकाः

ग—त्रिदोषवाक्यसंग्रहान्तर्गतविषयाणां सूचिका

विषयाः	पृष्ठसंख्या
पित्तधातुः	७६
पित्तप्रकोपहेतवः	८३
पित्तप्रकोपलक्षणानि	८५
पित्तप्रकृतिः	६०
पित्तप्रकोपशामकचिकित्सा	६१
पित्तप्रकोपशामकद्रव्याणि	६७
श्लेष्मधातुः	१०१
श्लेष्मप्रकोपहेतवः	१०४
श्लेष्मलक्षणानि	१०६
श्लेष्मप्रकृतिः	११४
श्लेष्मप्रकोपशामकचिकित्सा	११६
श्लेष्मप्रकोपशामकद्रव्याणि	१२६
धातुरूपा वातपित्तश्लेष्माणः	१३२
दोषरूपा वातपित्तश्लेष्माणः	१३४
तेषां व्याधिजनकत्वम्	१४२
मलरूपा वातपित्तश्लेष्मणः	१४८
दोषाणां सामान्यश्चिकित्साक्रमः	१४६

This book, as far as its subject is concerned, is one of the best books to give the preliminary knowledge of the fundamental principles of आयुर्वेद.

त्रिदोषविमर्शः

महेन्द्रसिंह

पुस्तक

M.K. Arya
30-12-57.

Mahendra Singh
first year.

1st year

वातपित्तकफानां सामान्यपरिचयः।

शरीरसम्भवानामखिलानां स्वाभाविकास्वाभाविकीनां क्रियाणां निमित्तभूतानि त्रीणि भौतिकानि सूक्ष्मतत्त्वानीत्यायुर्वेदविदो वदन्ति । तेषां त्रयाणाम्मध्ये वातस्तावदप्रत्यक्षः पित्तकफयोस्तु केचिद् भेदा नूनं प्रत्यक्षीकर्तुं शक्यन्ते । नभोनभस्वद्भ्यां वातस्य, तनूनपातः पित्तस्य, पयःपृथिवीभ्यां कफस्य च समुत्पत्तिरभ्युपेयते । "कारणगुणपूर्वकाश्च कार्यगुणा" इति सिद्धान्तमनुरुन्धानाः शरीरस्थानां वातादीनां स्थूलपरिणामैर्लिङ्गभूतैरनुमिन्वते यत् कस्मात् कस्मात् भूताद्वातपित्तकफानां कतमस्योत्पत्तिरिति । कारणभूतानां भूतानामेव गुणाः कार्यत्वमापन्नेष्वेषु दरीदृश्यन्ते । तद्यथा पयः-पृथिव्योः स्निग्धत्वगुरुत्वस्थिरत्वशैत्यादयो गुणाः कफधातौ समुपलभ्यन्ते। स एव कफो गुणानेतान् शरीरे समुपजनयति । स एव च शरीरस्य स्थिरताया रचनाया वा हेतुभूतः । पित्ते चाग्नितत्त्वस्य तीक्ष्णता ऊष्मादयश्च गुणा भवन्ति । तेनैव चैते गुणा शरीरे समवेताः। पित्तमेव शरीरस्थस्योष्मणः, ऊष्मकारणभूतायाः पचनात्मकप्रक्रियाया वा हेतुः । वाते च नभोनभस्वतोः सूक्ष्मत्वचलत्वादयो गुणा भवन्ति । अतएव स एतान्गुणान् शरीरे समुपजनयति । स एव शरीरस्य सूक्ष्माणां चलभावानां निबन्धनम् ।

त्रिविधः क्रियाः शरीरे समुपलभ्यन्ते। तासां प्रथमा तावद्

विद्युन्मयी भौतिकी[1] क्रिया "वातिके" त्युच्यते। द्वितीया पचनात्मिका[2] रासायनिकी च क्रिया "पित्तात्मिका" क्रियेत्यभिधीयते। तृतीया रचनात्मिका रासायनिकी च क्रिया "श्लेष्मात्मिका" क्रियेत्युदीर्यते। शरीरस्य सूक्ष्मसूक्ष्मतमावयवेषु प्रतिक्षणं प्रवर्तमाना एता एव तिस्रः क्रियाः शरीरं धारयन्ति।

यथा दार्शनिकाः सत्वंरजस्तमश्चेति त्रीन् गुणान् चराचर–जगद्गतानां सर्वभावानां मूलहेतून् मन्यन्ते तथा आयुर्वेदीयाः वातपित्तकफानेव शरीरस्थानां सर्वभावानां मूलहेतून् स्वीकुर्वन्ति। तथा हि—यथा ते रजोगुणं जगद्गतायाश्चेष्टायाः समस्तायाश्च गतेर्मूलकारणमङ्गीकुर्वन्ति तथैव शारीरविशारदा रजोगुणात्मकं वातं वपुर्वर्तिन्या यावन्मात्रचेष्टाया निमित्तमुररीकुर्वन्ति। जगद्गतानां यावन्मात्रप्रकाशात्मकानां, तैजसानां भावानाञ्च मूलकारणं तत्त्वविद्भिः सत्वगुण इव, सत्वगुणात्मकं पित्तमेव शरीरगतानां प्रकाशोष्मतेजोमयानां पचन–निर्मलबुद्धि, मेधादीनां मूलहेतुः शरीरशास्त्रज्ञैर्मन्यते। यथा च ते तमोगुणं जगद्गतस्य स्थितिभावस्य स्थिरताया वा निदानं मन्यन्ते तथा ऽयुर्वेदीयास्तमोगुणात्मकं कफमेव शरीरावयवानां स्थितेः क्षमाशक्तेः[4], मनोगतायाः स्थिरताया धीरताया वा मूलहेतुमभ्युपगच्छन्ति। इत्थं सर्वेऽप्येते वातपित्तकफाः शरीरधारकत्वाद् "धातवः" इत्युच्यन्ते। एत एव पुनर्वैषम्यमापन्नाः शरीरदूषकत्वात् "दोषाः" इत्यभिधीयन्ते।

---

1. Physical activity. 2. Katabolic chemical activity. 3. Anabolie chemical activity. 4. Resisting Power.

अथ वातधातुः

एक एव वातः शरीरे बहुधा समुपलभ्यते । शरीरयन्त्रस्य सञ्चालकत्वात्, सर्वचेष्टानां प्रवर्तकत्वात् स शरीरस्य 'प्रवर्तिनी शक्ति'[1] रित्यभ्युपेयते । अयं ज्ञानेन्द्रियाणां विषयेषु सम्प्राप्तिं कारयति उपलब्धानिन्द्रियार्थांश्च मस्तिष्कं प्रत्यभिवहतीत्ययमेव शरीरस्य 'ज्ञानवाहिनी'[2] शक्तिरपि । पाचकाग्नेः प्रवर्तकत्वात्, स्वेदमूत्रपुरीषादिमलानां क्षेप्तृत्वाच्च अयमेव शरीरस्य 'अन्तःस्रावकशक्तिः' 'बहिःस्रावकशक्तिश्च'[3] । एष एव गात्रगतयोः पित्तकफयोः सकलक्रियाणां नियामकः, रसरक्तमांसादिधातूनां व्यूहकरः, श्वाससंस्थानवर्तिनो निश्वासोच्छ्वासादिक्रियाकलापस्य प्रवर्तकः, हृदयस्य संचालकः, रसरक्तादिद्रवाणां संवाहकश्च ।

एतेन निर्विवादमिदं यदयमेव शारीरिकीणामखिलानाम् 'अनैच्छिकीनां क्रियाणां[4] प्रवर्तिनी शक्ति'रिति । मांसपेशीभवानां नानाविधक्रियाणामानुलोम्येन कारयितेत्यस्मादयं वात एव 'क्रियानुलोमकशक्तिः'[5] ।

शिरःस्थिता वातकोष्ठाः[6] कटिस्थसुषुम्नान्तर्गतवातकोष्ठाः, इडापिंगलागता वातकोष्ठाः, उदरप्रदेश-वस्तिप्रदेशान्तरुपलभ्यमाना वातकोष्ठाः, नानाविधनाडीचक्राणि चास्य वातस्यो-

---

1. Motor force. 2. Sensory force. 3. Secretary and Excretary forces. 4. Involutary Nerve foree. 5. Coordinating Nerve force. 6. Nerve cells, Nuclei and ganglia, इडा पिंगला=दोनों Sympathetic trunks. सुषुम्ना=Spinal Cord, नाडीचक्र=Plexus.

द्धवस्थानानि केन्द्राणि वा स्वीक्रियन्ते । अनैच्छिकवातसंस्थानस्य तु केन्द्राण्युदरे पक्वाशयाभिधैरान्त्रैः[1] सम्बद्धानि समवलोक्यन्ते अतएव पक्वाशयो वातस्य विशेषस्थानमुच्यते ।

स्थानभेदात् व्यापारभेदाच्च स एव वातो बहुधाऽव्यपदिश्यमानः प्राणोदान-समानव्यानाऽपान-नागकृकल-कूर्म देवदत्त-धनञ्जयेत्यभिधानानि दधाति । तथाहि—(क) शिरोगतश्चित्त-बुद्धि-मस्तिष्केन्द्रियादीनां च नियामको वातः "प्राणः" इत्यभिधीयते । (ख) कण्ठोरःस्थानस्थितं वाक्प्रवर्तकं, समुचितश्वासप्रश्वासादिविधिना बलस्य वर्णस्यौजसश्चनिमित्त भूतं वायुं "उदानः" इत्याचक्षते । वायोर्वर्णोच्चारणं प्रतिकारणता भगवता पतञ्जलिनाऽपि प्रत्यपादि । तद्यथा "मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्" । (ग) आमाशयपक्वाशयनिविष्टः पाचकरसानां नियामकः, भुक्तान्नस्य विश्लेषकः, सारभूताद्रसान्मलस्य विवेचकश्च वातः "समानः" इत्युच्यते । अयमेव इडापिंगलयोः कतिपयवातकोष्ठेभ्यः समुत्पन्नायां कोष्ठाशयगामिन्यां[2] नाड्यां प्रचरति, आमाशय पक्वाशयास्थितेषु नाडीचक्रेषु च कृतावस्थानः पाकादिकं सम्पादयतीति संभाव्यते । (घ) रसवाहिनीषु रक्तवाहिनीषु च नाडीषु स्थित्वा रसरक्तादिसंचारकं, अनैच्छिक

---

1. "The chief centre of the Sympathetic System (its "Brain" So to speak) is found within the abdominal cavity, in close anatamical relation with the intestines which it supplies with Nerves." Savill's Clinical Medicine Page 334.
2. Splanchnic Nerve.

मांसपेशीरधिकृत्य पञ्चप्रकारकानैच्छिकगत्युत्पादकं, हृदयस्पन्दन-नाडीधमनादिनिदानं च वायुं "व्यान"[1] इत्याचक्षते। (ङ) कोष्ठस्य निम्नभागे स्थितो मल-मूत्र-शुक्रार्तव-गर्भादिनिष्क्रमणकारणभूतो वायुः "अपान" इत्युच्यते। त्रिकास्थ्नोऽभिमुखस्थितेषु इडापिङ्गलयोर्नाडीचक्रेषु, वस्तिगुहास्थितान्यनाडीचक्रेषु, वृक्क-मूत्राशय-गर्भाशय-मलाशय-अण्डप्रभृतीनां नाडीचक्रेषु च अनैच्छिकवातरूपेणायमेव तिष्ठतीति विमर्शनीयम्।

अथ पित्तधातुः।

पित्तं शरीरस्यान्तरग्निः। तस्य कर्म चाग्निकर्मेत्युच्यते। तच्च शरीरावयववर्तिनीनामाग्नेयीनां पचनात्मकरासायनिकक्रियाणां कारणम्। पाकश्चायं द्विविधः। आमाशय पक्वाशय गतपचनात्मकप्रक्रियां, रसरक्तमांसादिधात्ववयवान्तर्गतां पाचनप्रक्रियां च यथाक्रमं आहारपाको[2] धातुपाकश्चेति[3] परिभाषन्ते। आहारपाचकरसाः 'पाचकाग्नयो' धातूनां पाचकरसाश्च 'धात्वग्नयः' उच्यन्ते। उभये चैतेऽग्नयः स्वस्वक्षेत्रेषु प्रसादकिट्टौ परस्परं विश्लेषयन्ति। प्रसादाः शरीरांशभूताः शरीरे तिष्ठन्ति किट्टाश्च नानाविधमलरूपाः शरीराद्बहिर्निर्गच्छन्ति।

पाचकाग्निः—आमाशयपक्वाशय मध्यगतं, अन्नपानादिपाचकं, रसदोषमूत्रपुरीषादिविवेचकं, शरीरोष्मणश्च संस्थापकं पित्तं पाचकाग्निमाहुः। पक्वाशयवर्तिनी पित्तधरा नाम कला च तस्याधिष्ठानमभिहितम्। एतेन पाचकाग्निरूपेण पित्तेन किं विवक्षितमिति शृङ्गग्राहिकया

---

1. Sympathetic Nerve force. 2. Digestion. 3. Metabolism.

निर्देष्टुं न शक्यते । परं संभाव्यते यदयमेव पाचकाग्निः आमाशयादामाशयरसं, अग्न्याशयादग्न्याशयरसं, आन्त्रेभ्यश्चान्त्ररसं प्रवर्तयतीति । नवीनपरीक्षकैरपि परीक्ष्य प्रदर्शितं यत्सन्ति केचित्सूक्ष्मरसा एषामामाशयाद्युद्भूतानां पाचकरसानां नियामका इति । तेषां मते च भुक्तमात्र एवाहारद्रव्ये आमाशयात्समुत्पद्यते कश्चिदेकः सूक्ष्माऽऽमाशयरसो[1] योऽस्यामाशयस्यान्तःकलामुद्दीप्य तस्मादामाशयरसं प्रवर्तयति। पुनश्चास्मिन्नम्लरसयुक्ते भोजनद्रव्ये आमाशयाद्ग्रहण्याशयमधिगते ग्रहण्याशयस्यान्तःकलायां प्रभवति कश्चिदेको ग्रहण्याशयसूक्ष्मरसो[2] यो रुधिरमार्गेण अग्न्याशयमधिगत्य तस्मादग्न्याशयरसं प्रवर्तयति यो हि आमाशयक्लिन्नीभूतमाहारद्रव्यं ग्रहण्याशये पुनः सम्यक् परिपचति। आन्त्रगते चाहार द्रव्ये तस्मात्पुनरेकः आन्त्रीयसूक्ष्मरसः[3] समुत्पद्यते । सोऽयं मन्दीभूतमग्न्याशयरसमुद्दीप्य तं भूयोप्याहारपाचनसमर्थंविदधाति। एतानाहारपाचनप्रक्रियाया हेतुभूतान् सूक्ष्मरसान् समष्ट्या, एतेषां सूक्ष्मरसानां कारणभूतं कमप्यन्यं सूक्ष्मरसं वा प्राचीना 'पाचकपित्तं' आहुरिति विमर्शनीयम् ।

धात्वग्निः—पित्तमेव पुनः 'धात्वग्नि'रिति ब्रुवन्ति । धातूनां पाचकास्तद्गतप्रसादकिट्टविश्लेषकाश्च पित्तस्य केऽपि अवान्तरभेदा 'धात्वग्नयः' उपवर्णिताश्चरकादिभिः । एभिर्धात्वग्निभिः किं विवक्षितमिति निश्चयेन वक्तुं दुःशकम् । परं शरीरे समुपलभ्यन्ते केचित् धातुपाकनियामकाः तीक्ष्णगुणाः सूक्ष्मरसास्त एव धात्वग्नयः सन्तीति संभाव्यते । निदर्शनमात्रमेवैतेषा—

1. Gastrin. 2. Secretin. 3. Enterokinase.

मत्र करिष्यते। यकृदाशयादेकः सूक्ष्मरसः,[1] अग्न्याशयस्य विशिष्टभागाद्[2]प्येको ऽन्यः सूक्ष्मरसः[3] समुत्पद्यते। इमावुभावपि सूक्ष्मरसौ शरीरधात्ववयवेषु शर्करायाः पाकप्रक्रियां संचालयतः। अनयोरभावे क्षये वा शर्करायाः पाको विरमेत् क्षीयेत वा। इदमेव च बहुधा मधुमेहस्य निदानम्। एवमेव वृक्कोत्तरीयग्रन्थेः[4] अप्येकः तीक्ष्णगुणः सूक्ष्मरसः[5] समुत्पद्यते। यो हि रक्तसंचारं रक्तवाहिनीनां नाडीनां संकोचं प्रसारं च नियमयति। यत्र यत्र च धातुपाकस्याहारपाकस्य च प्रक्रिया प्रवर्तते तत्र अपेक्षितं रक्तमुपस्थापयति।

वृक्कोत्तरीयग्रन्थिश्चायं वातेन सुनियन्त्रितः प्रतीयते। तथाहि—अनैच्छिकवातसंस्थानान्तर्गतायाः कोष्ठगामिन्या वातनाड्या एका महती शाखा ग्रन्थिमेनं निविशती दृश्यते। यस्या नाड्याः क्षोभे सति अस्य ग्रन्थेः सूक्ष्मरसः प्रभूतमात्रायामुत्पद्यते रक्तवाहिनीर्नाडीश्च प्रसारयति। इत्थं पित्तेन संयुक्तो वातो दाह-रक्तिम-स्वेद-ऊष्मादीनि पित्तलक्षणान्युपजनयतीत्यायुर्वेदसिद्धान्तः संगच्छते। अतएव काम-क्रोध-संरंभ-आदीनां तीव्रैर्मानसिकैरावेशैरुत्तेजिते सति वाते यकृदाशय—अग्न्याशय—वृक्कोत्तरीयग्रन्थ्यादीनां सूक्ष्मरसा अपि प्रभूतमात्रायामुत्पद्यन्ते, यकृदाशयाच्छर्कराऽपि प्रचुरराशौ निर्गत्य शरीरधातुषु दाहं जनयति, येन मुखादिशरीरावयवेषु रक्तिम-दाह-

---

1. An Enzyme of the liver. 2. Islets of Langerhans. 3. Insulin or Pancreatic Hormone. 4. Suprarenal gland. 5. Adrenaline. 6. Splanchnic Nerve.

स्वेदादीनि पित्तप्रकोपलक्षणानि प्रत्यक्षमुपलक्षयन्ते ।

इत्थं शरीरधात्वन्तर्गतरासायनिकप्रक्रियायाः प्रवर्तका धातुपाकप्रवर्तका वा केचिदन्येऽपि सूक्ष्मरसाः संभाव्यन्ते । एते सर्वेऽपि धात्वग्नयः पित्तस्यावान्तरभेदाःप्रतीयन्ते ।

रञ्जकपित्तं रञ्जकाग्निर्वा :—

यकृत्प्लीह्नोः स्थितं पित्तविशेषं 'रंजकपित्तं' 'रञ्जकाग्निं' वाऽऽहुः । स च रसस्य रागकृदुक्तः । रसरक्तयोः परस्परमेतावानेव भेदो यद् रक्ते रक्तरञ्जकद्रव्यस्य, रक्ताणूनाञ्चोपस्थितिर्भवति। रसे तु तयोः सर्वथाप्यभावः । (क) एतयोः प्रथमं रक्तरञ्जकद्रव्यं तु सुतरां यकृति समुत्पद्यते। एतत्साधकानि च बहूनि प्रमाणान्युपलभ्यन्ते । तथाहि—यकृति समुत्पद्यमानस्य मलभूतपित्तस्य[3] रञ्जकं द्रव्यं[4] रक्तस्य रञ्जकद्रव्येण प्रायः सदृशमेव भवति । अत एव यदि रक्तस्य रञ्जकद्रव्यं सूचीयन्त्रस्य साहाय्येन यकृद्गामिन्यां कोष्ठमहाशिरायां[5] प्रवेशयामस्तर्हि मलभूतपित्ते तद्रञ्जकद्रव्यमुपचीयते । वस्तुतस्तु रक्तवाहिनीषु नाडीषु प्रतिक्षणं संचरतो रुधिरस्य क्षीणा रक्ताणवो यकृत्प्लीह्नोः संचीयन्ते। तत्र रक्ताणुनिष्ठरक्तरञ्जकद्रव्यस्य लोहांशा यकृदन्तर्गतशिराणां समीपस्थेषु कोष्ठेषु निधीयन्ते । अवशिष्टं च लोहांशविरहितं रक्तरञ्जकद्रव्यं[6] पित्तरञ्जकद्रव्यरूपेण यकृदाशयाद्बहिर्निर्गच्छति । यकृत्कोष्ठाश्च पुनस्तेन निहितेन लोहांशेन नवीनं रक्तरंजकद्रव्यमुत्पादयन्ति । केषाञ्चिदन्वीक्षकाणां

---

1. Haemoglobin. 2. Red corpuscles 3. Bile
4. Bilirubin. 5. Portal vein 6. Haematoidin

मतेनतु यकृति रक्तरंजकद्रव्येण सदृशं किमपि[1] द्रव्यं समुत्पद्यते यत्पुनः यकृदन्तर्गतसूक्ष्मरसविशेषस्य[2] साहाय्येन रक्तरञ्जक-द्रव्यत्वेन परिणमते। तस्य अपेक्षितोऽशो रक्ताणुषु व्ययी भवति अविशिष्टश्च पित्तेन साकं यकृदाशयान्निर्गच्छति। (ख) रक्ताणवः—गर्भस्थस्य मनुजशिशोः प्लीह्नि केषाञ्चिन्मनुष्येतरप्राणि-नामपि प्लीह्नि एते रुधिरस्था रक्ताणवः समुत्पद्यन्ते इति नात्र कश्चिदपि विद्वान् विप्रतिपद्यते। (ग) रक्तस्य तृतीयो मुख्योऽशः श्वेताणवः[3]। एतेपि मनुष्याणां मनुष्येतरप्राणिनां च प्लीह्नि समु-त्पद्यन्ते। छिन्ने हि प्लीह्नि शरीरे रक्ताणूनां रक्तरञ्जकद्रव्यस्य च मात्रा चिरकालाय नितरां संक्षीयते। एतेन प्रतीयते यत् रक्तनिर्माणप्रक्रियायां यकृत्प्लीह्नोरस्ति कश्चिन्महान् भाग इति।

अथ साधकपित्तम्— Reserve

आयुर्वेदशास्त्रे मानसिकभावानां उत्पत्तौ निमित्तमपि एकं विशिष्टं पित्तमेव स्वीक्रियते। शौर्यहर्षप्रसादा स्तद्विपरीताश्च भय, क्रोध, बुद्धिव्यामोहादयो मानसिकभावास्तस्य पित्तविशे-षस्य साहाय्येन समुत्पद्यन्ते। तच्च मानसिक भावानां साध-कत्वात् 'साधकपित्तं' इत्युच्यते। इत्थं मानसभावा अपि रासायनिकपरिवर्तन मूलका रासायनिकपचनप्रक्रियामूलका वा इति शास्त्राभ्युपगमः।

अथ आलोचकपित्तम्—

लोचनानि यद्रूपं विलोकयन्ति तस्यापि हेतुभूतः कश्चि

---

1. Prehaemoglobin. 2. An Hepatic Hormone.
3. White corpuscles.

त्पित्तविशेष एवाङ्गीक्रियते। स च आलोचकत्वात् 'आलोचक-पित्तं' इत्युच्यते। आधुनिकैः शरीरशास्त्रविशारदैरपि मन्यते यत् रूपप्रतीतिः नेत्रपाश्चिमपटलान्तर्गतरासायनिकप्राक्रिया-मूलिकैवेति। आयुर्वेदीयाः कदाचिदेतद्रासायनिकपरिवर्तनस्यमूलकारणभूतं द्रव्यविशेषमेवालोचकपित्तमाहु रिति सम्भाव्यते।

अथ भ्राजकपित्तम्—

त्वचि अप्येकं विशिष्टं पित्तं स्वीक्रियते। त्वचो भ्राजकत्वात् तद् भ्राजकपित्तमित्युच्यते। त्वचि समुपलभ्यमाना स्वाभाविकी प्रभा च तन्मूलिका अंगीक्रियते। त्वगन्तर्गतेषु स्वेदग्रन्थिषु वसास्रावकग्रान्थिषु अन्येषु च त्वग्भागेषु काचित्प्रधानतमा रासायनिकी क्रिया भवति यस्यां प्रकृतिस्थायामेव त्वचि प्राकृतिकी कान्तिः प्रभा मृदुता च समुत्पद्यते। कदाचिदस्याः प्रक्रियायाः प्रवर्तकः कश्चिदाग्नेयः सूक्ष्मरसः स्यात्तस्यैव च 'भ्राजक पित्तं' इत्याख्या।

इत्थं प्रतीयते यच्छरीर संभवानां निखिलानां पचनात्मक-रासायनिकप्रक्रियाणां मूलकारणभूतं तत्त्वं पित्तमित्याहुरायुर्वेदीयाः। शरीरगतनानाविध रासायनिकप्रक्रियाणां प्रवर्तकाश्च तेजोमया आग्नेया वा सूक्ष्मरसाः सूक्ष्मद्रवा वा पित्तस्यैवावान्तरभेदा इत्युच्यन्ते। पित्तं यद्यपि सर्व शरीरव्याप्तं तथापि यत्र यत्र पचनात्मकप्राक्रिया प्राधान्येन भवति तानि पित्तस्य विशेषस्थानान्युच्यन्ते यथा रुधिरम्–यकृत्–प्लीहा, आमाशयः, नेत्रं–मस्तिष्कं चेति।

---

1. Retina. 2. Hormones and Enzymes.

अथ कफ धातुः —

पचन, दहन, आदान, आदि क्रियाकारित्वात्पित्तमग्निना सूर्येण चोपमीयते। यदि कफव्यतिरिक्तं केवलं पित्तमेव शरीरेऽभविष्यत् तर्हि ध्रुवं तत्सर्वमपि देहमधक्ष्यत्। यतो हि 'स पित्ताग्निः यदा नेन्धनं युक्तं लभते तदा देहरसं हिनस्ति'। परन्तु पचनदहनादिना सहैव शरीरे रचनात्मकव्यापारा अपि प्रवर्तन्ते निखिलानां रचनात्मकव्यापाराणां[1] मूलकारणभूतं तत्वं 'कफः' इत्याहु रायुर्वेदीयाः। शरीरगतनानाविध रचनात्मक व्यापाराणां प्रवर्तकाश्च आप्याः सौम्याश्च सूक्ष्मरसाः सूक्ष्मद्रवा वा कफस्यैवावान्तरभेदा इत्युच्यन्ते। कफपित्ते मिथो विरोधिनी अपि अन्योऽन्यं प्रतिकुर्वाणे शरीरं धारयतः।

शरीरावयवानां श्लेषकत्वात् श्लेष्मैव शरीरमस्तिष्कयोरुभयोर्वृद्धेः कारणमुच्यते। प्रकृतिस्थो हि सोऽवयवेषु यथावत् दार्ढ्यं उपचयं, उत्साहं, शरीरेवृषतां, मस्तिष्के बुद्धिं च समुत्पादयति। अप्रकृतिस्थे तु सति तस्मिन् अवयवेषु शैथिल्यं, कार्श्यं, आलस्यं, शरीरे क्लीवता, मस्तिष्के च व्यामोह उपजायते।

श्लेष्मा हि शरीरस्य बलमुच्यते। स एव शरीरवर्तिन्याः क्षमाशक्ते रक्षकशक्तेर्वा कारणम्। साम्प्रतं वैज्ञानिकैः शरीरे काचित् विशिष्टा प्रतिरोधकशक्तिः[2] स्वीक्रियते। तेषां मते शरीरस्य रक्तलसीकादिद्रवेषु[3] स्वभावत एव तादृशं तत्त्व मस्ति यदागन्तून् व्याधीन् प्रतिरुणद्धि तेषामाक्रमणेभ्यश्च शरीरं

---

1. Anabolic Functions. 2. Immunity. 3. Plosma and Serum.

त्रायते । शरीरस्य केचित् कोष्ठविशेषाः[1] एतद् द्रव्यमुत्पाद्य रक्तलसीकादिवाहिनीषु नाडीषु विसृजन्ति । कस्यचित्संक्रामकरोगस्य आक्रमणकाले यदा तद्रोगजीवाणवा स्तेषां विषं वा शरीरे प्रविशति, चिकित्सकैर्वा कृत्रिमरोधकशक्त्युत्पादनार्थं[2] कस्यचिद्रोगस्य मृतजीवाणवस्तेषां[3] विषं वा विशिष्टमात्रया शरीरे प्रवेश्यते तदा शरीरगता एते विशिष्टकोष्ठास्तान् जीवाणून् तेषां विषं वा विनिहन्तुमेतच्छरीररक्षकतत्त्वं प्रभूतमात्राया मुत्पादयन्ति । अतएव आन्त्रज्वरादिरोग[4]ग्रस्तानां साध्यानां रोगिणां रक्तेऽस्य रक्षकद्रव्यस्य मात्रा साधारण जनस्य तन्मात्रा पेक्षया अत्यधिका समुपलभ्यते । अतएव च यदि काचनलिकास्थिते रोगिशरीरात् गृहीते रक्तमस्तुनि 'रोगपरीक्षाशाला' समुपचितानां आन्त्रज्वरजीवाणूनां निर्मितो द्रवो[5] निक्षिप्येत तर्हि एते जीवाणवः शीघ्रमेव म्रियन्ते । काचनलिकायास्तले च निक्षिप्ताः परि दृश्यन्ते । कफनैर्बल्या[?]द्धीयमाने चास्मिन् रक्षकद्रव्ये सन्निपातज्वरादिग्रस्ता रोगिणः कष्टसाध्या असाध्या वा जायन्ते । तेषामेव शरीरे यदि स्वस्थअश्वादिप्राणिनां शरीरादाहृतं रक्तमस्तु[6] प्रवेश्येत तर्हि त एव साध्याः सम्पद्यन्ते दृश्यन्ते च भेषजादिना सर्वथाऽप्यचिकित्स्यमाना विषमज्वरादिरोगग्रस्ताः कालेन सुखिनः संजायमानाः ।

---

1. cells. 2. Artificial Immunity. 3. Vaccine 4. Typhoid. 5. Emulsion of the Typhoi[d] Bacilli. 6. Normal Horse Serum. 7. 95[%] of the Merozoits are destroyed by th[e]

तेन अनुमीयते यत् शरीरव्यापाजीवाणवः शरीरे सञ्जायमानेन एतेन रक्षकद्रव्येणैव शनैः शनैः समूलमुन्मूल्यन्ते।

शरीररक्षकमिदं द्रव्य मन्वीक्षकैर्विविधनामभिरभिधीयते। आयुर्वेदीयैस्तत् 'ओजः' इति 'श्लेष्मद्रव्यविशेषः' इति वा व्यवह्रियते। चरकेणापि 'स चैवोजः स्मृतः काये' इति श्लेष्मणो विषये प्रतिपादितम् 'तन्नाशान्ना विनश्यति' इति चाभिहितम्। श्लेष्मद्रव्यमिदं निसर्गत एव रक्ते लसीकायां च भवति। तदभावे तु 'कृत्रिम-रोग निरोधकं' शक्त्युत्पादनार्थं उपयुज्यमानैः 'सीरम' 'वैक्सीन' इत्याख्यैः औषधैः शरीराभ्यन्तरं उत्पादिता अपि 'रोगनिरोधकपिण्डाः' रोगान् प्रति कर्तुं न पारयन्ति। चिकित्सकानां भैषज्यानि चास्य प्राकृतस्य श्लेष्मद्रव्यस्य साहाय्यमात्रमेव कुर्वन्ति। अस्याभावे क्षये वा ओषधयो निष्फला निर्वीर्या वा भवन्ति। अस्मिन् हि स्वाभाविके श्लेष्मणि निर्बले सति द्रागेव देहो रोगैरभिभूयते। परीक्षयच प्रदर्शितं परीक्षकैर्यद् गलाऽऽन्त्रादिगतश्लेष्माधिष्ठान-

---

Natural power of the body. The Mechanism of the destruction is by the production of Lysins in the Plasma."

Indian Medical Gazette

June 1930

1. Complement. Alexiu. or Bactericidal Substance or Agglutinins. 2. Immunity. 3. Antibodies.

भूतेषु लसीकाग्रन्थिषु रोगजनकजीवाणुविषादीनां विनाशिका काचिद् विशिष्टा शक्तिरस्तीति । रोगैर्निर्बलीभूतेषु, वृद्धेषु, चिन्ता-श्रम-स्त्रीप्रसङ्गाऽऽदिभिरतिश्रान्तेषु च जनेषु अस्य क्षयाद् अनायासेनैव संक्रामकरोगाणामाक्रमणं संजायते । अयमेव प्राकृतः श्लेष्मा वस्तुतः शरीरस्य बलमोजश्च ।

रसो लसीका[1] वा कफस्य प्रधानस्थानम् । शरीरपोषणाय सूक्ष्मरक्तवाहिनीभ्यः पृथग्भूय सकलावयवान्तःसंचारी रक्तस्य द्रवमयो भाग एव लसीकेत्युच्यते । अयमेव द्रवः सकलशरीरावयवान् स्नेहयति, रोपयति, पूरयति, संश्लेषयति, पोषयति, यत्र कुत्रापि शरीरावयवस्थितान् रोगजीवाणून् विषद्रव्याणि वा आदाय स्वमार्गवर्तिषु लसीकाग्रन्थिषु[2] प्रापय्य तत्रैव तान् विसृजति । तत्र चैते रोगजीवाणवो विषद्रव्याणि वा एषां श्लेष्माधिष्ठानभूतानां ग्रन्थीनां जीवाणुविनाशकशक्त्या विनाश्यन्ते । अस्यामेव लसीकायां बहवः श्वेताणवोऽपि भवन्ति ये ह्यागन्तून् जीवाणून् भक्षयित्वा विनाशयन्ति शरीरं च रोगेभ्यो रक्षन्ति।

तथाच लसीकान्तर्गतं शरीरस्य रक्षकं, पोषकं, अवष्टम्भकं, ओजः कारणं, इन्द्रियसन्तर्पणं, स्निग्धं शीतं च किमपि सूक्ष्मं तत्त्वान्तरमेव 'कफः' इति वदन्ति आयुर्वेदविशारदाः । केचित्तु लसीकामेव 'कफः' इति मन्यन्ते ।

नवीनैः शरीरपरीक्षकैरपि लसीकायां केचित् सूक्ष्मरसा आयुर्वेदीयानां 'कफ' वत् शरीरवृद्धयै पोषणाय च अत्यावश्यकत्वेन अंगीक्रियन्ते । तथाहि (क) कण्ठाग्रग्रन्थेः[3] उत्पन्न

---

1. Lymph. 2. Lymph glands. 3. Thyroed gland

लसीकायामुपलभ्यमानः कश्चिदेकः सूक्ष्मरसः शरीरवृद्धेः कारणमस्ति। शैशवबाल्यादिषु शरीरवृद्धिकालेषु अयं सूक्ष्मरसोऽधिकमात्रायामुत्पद्यते। ह्रासकाले वार्धक्ये तु तस्य रसस्तदुत्पादकग्रन्थिश्च क्रमशः क्षयमुपैति येन शरीरवृद्धिर्निरुध्यते। बालकेऽपि यदि ग्रन्थेरस्य रसो नोत्पद्येत तर्हि शरीरवृद्धिः बुद्धिवृद्धिर्वा नैव सम्भवेत्। (ख) वृक्कोत्तरीयग्रन्थेरावरणकोषात्[1] अप्येकः सूक्ष्मरसः समुत्पद्यते यो हि मस्तिष्कस्य जननेन्द्रियाणां च वृद्धिकारणम्। क्षीणे मन्दीभूते वाऽस्मिन् रसे बुद्ध्यभावान्मोहः, उत्साहध्वंसात् आलस्यं, वृषताविनाशात् क्लीवता च सम्पद्यते। (ग) मस्तिष्कग्रन्थेः[2] अग्रिमखण्डात् एको रसः समुत्पद्यते यस्याभावे शरीरपरिणाहो न वर्धते। तस्यैवातिशये तु परिणाहस्य अतिवृद्धिः संजायते। (घ) अण्डग्रन्थेः[3] शुक्रस्राविव्यतिरिक्त कोष्ठेभ्योऽपि कश्चित्सूक्ष्मरसः समुत्पद्यते यौवनसंभवानां परिवर्तनानां च मूलं भवति। तस्याभावे क्षये वा बाल्यादूर्ध्वमपि यौवनलक्षणानि न समुद्भवन्ति। (ङ) स्त्रीणां डिम्बग्रन्थेरेकस्मात् भागात्[4] एकः सूक्ष्मरसः समुत्पद्यते सच गर्भाशयस्य स्तन्यग्रन्थीनां च वृद्धेः कारणम्।

आयुर्वेदे तु कफ एव शरीरवृद्धेः कारणं स्वीक्रियते। शरीरावयवपोषकत्वात् एते सूक्ष्मरसा अपि कफस्यावान्तरभेदाः कफान्तर्गता एव वा स्युः।

केचित् कफभेदा आयुर्वेदे नाम निर्देशपुरस्सरमभिहिताः।

---

1. Suprarenal Cortex. 2. Pituitary gland. Anterior lobe. 3. Testicle. 4. Corpus Leuteum.

उरसि स्थितं शरीरस्यावलम्बनभूतं कंचन कफविशेषं 'अवलम्बकं,' जिह्वामूलकण्ठस्थं रसबोधनसहायकं कफविशेषं 'बोधकं' शिरसि स्थितं इन्द्रियाणां सन्तर्पणकारणं 'संतर्पकं,' आमाशयस्थं भोजनद्रव्यस्य क्लेदकारकं 'क्लेदकं,' सन्धिषु स्थितं च सन्धिश्लेषकत्वात् 'श्लेषककफं' उदीरयन्ति । एवमन्येऽपि संभवन्ति केचन कफभेदाः शरीरे। केचित्तु उरो-जिह्वा-शिर-आमाशय-सन्ध्यादिस्थितं प्रत्यक्षं लसीकाद्रवमेव 'कफ' इति स्वीकुर्वन्ति ।

अथ वातप्रकोपलक्षणानि—

वात एव शरीरस्य जीवनशक्तिः प्रेरकशक्तिर्मौलिकशक्तिश्चास्ति । क्षीणे च तस्मिन् शरीरं शरीराङ्गं वा निर्बलायते। सतीष्वपि रसरुधिरवाहिनीषु नाडीषु वातवाहिनी-नाडी क्षयमात्रेणैव तदङ्गं क्षीयते । अतएव नवीनशरीरशास्त्रविशारदैरपि वाते कश्चिन् मौलिकः शरीरपोषकप्रभावः स्वीक्रियते[1] । नैर्बल्यमित्येतत् एकाङ्गगतस्य सर्वाङ्गगतस्य वा वातप्रकोपस्य प्रधानतमम् लक्षणम् । निर्बले चाङ्गे पोषणस्याभावात् कार्श्य-लघुता—क्षीणता—शोष—सादाः[2] एतदादीन्यन्यानि च लक्षणानि समुत्पद्यन्ते। वार्धक्य सुलभो ह्रासोपि परिदृश्यते। चिरनिर्बलतायामङ्गे काष्ण्र्यमपि समुद्भवति । तथा च वृद्धावस्थायां वातप्रकोपजन्यस्वाभाविकनिर्बलतायां संजातायां

1. "Nerves exercise atrophic or Nutritive influence over the tissues and organs they Supply." Baettie 'General Pathology"
2. Degeneration.

हृदये, वृक्के, यकृति, अन्येषु चाङ्गेषु यत्र तत्र बहवः कृष्णवर्णा अणवः संचिता भवन्ति, शवच्छेदपरीक्षया च ते साक्षात्कर्तुं शक्यन्ते। बाल्ये युवावस्थायामपि रोगादिना वातप्रकोपे समुत्पन्ने त्वचि श्यावता श्यामता वा समुत्पद्यते यद्येकाङ्गे सर्वाङ्गे वा वातिकशक्तिः क्षीयेत तदीयकोष्ठेषु सादस्य प्रक्रिया च समारभेत तर्हि तत्र शैत्यमप्यनुभूयते। एवमेव खरता चापि वातशक्तिक्षयस्य आवश्यकं लक्षणमस्ति। वातप्रकोपकाले वार्धके शरीरस्थतरुणास्थीनि खराणि कठिनानि च संजायन्ते। रक्तवाहिन्योऽपि स्पर्शात् कठिना रजतनिर्मिततारसदृशा श्चानुभूयन्ते। तासां कठिनत्वात् हृदयमपि रक्तप्रेरणाय समधिकं श्रममपेक्षते अतिश्रमाच्च तत्पूर्वं वृहदाकारं, परतश्च शनैः शनैः कालेन निर्बलं शिथिलं च संजायते। हृदये च दुर्बले सति रक्तमधिकाधिकं पुप्फुसयोः संचीयते येन कासः संप्रवर्तते यश्च 'जराकासः' इत्यभिधीयते। इमानि खरताजन्यलक्षणानि वातप्रकोपप्रकर्षात् यौवनेपि सम्भवन्ति। त्वक्स्थिता चेदियं वातिका पोषकशक्तिः क्षीयेत तर्हि त्वगन्तर्वर्तिस्नेहग्रन्थीनां नैर्बल्यात् रूक्षता समुपजायते, केशाः शीर्यन्ते, नखाः परुषा भङ्गुराश्च जायन्ते।

शरीरगतमांसपेशीनां पोषणमपि वातेनैव नियन्त्रितम्। वातप्रकोपाच्च मांसपेशीनां नैर्बल्यम्, कार्श्यम्, आघातादयश्च संजायन्ते। मांसपेश्यन्तर्गतनानाविधगतयः चेष्टाश्च वाताधीनाः। अतएव वातप्रकोपाद् अङ्गेषु संकोचस्तम्भोद्वर्तावर्त-कम्पा-क्षेपा—कुञ्चन—खंजनादीन्यप्राकृतानि विषमाणि च

1. Calcification

लक्षणानि उत्पद्यन्ते । प्रतिक्षिप्तचेष्टाश्च[1] नियतप्रमाणाद् उपचीयन्ते अपचीयन्ते वा । आन्त्रस्थे वाते प्रकुपिते आन्त्रगतमांसपेशीषुस्तम्भोद्वर्तादय उत्पद्यन्ते मलबन्धाऽऽनाहशूलादयश्च रोगाः संजायन्ते । मूत्रमार्गे श्वासमार्गे च स्तम्भोद्वर्तादिषु सत्सु मूत्राघातः श्वासरोगादयश्च संभवन्ति ।

शरीरनिष्ठनानाविधसंज्ञा[2]—ज्ञानादयोऽपि वातनियन्त्रिता एव । अतएव वातप्रकोपे शूल-भेद–तोदादयोऽनेकविधाः विषमाः संज्ञाः समुत्पद्यन्ते । संज्ञाविषयाणां बाह्यस्पर्श-आकार-ताप-भार-कम्पनादीनामनुभूतिर्मन्दायते विनश्यति वा । घ्राण, नेत्र, त्वक्, कर्ण, जिह्वादिषु संज्ञाविनाशाच्च घ्राणनाश, तिमिररोग, स्पर्शनाश, बाधिर्य, वाक्संगमूकत्वमिन्मिनादयो रोगाः संजायन्ते । संज्ञाचेष्टादीनां व्याघाताच्च पक्षाघात, एकाङ्गघात, तन्द्रा, निद्रा, मोह, मूर्छादयो व्याधयः समुद्भवन्ति ।

आमाशयपक्वाशययोः प्रवर्तमाना आहारपाक-प्रक्रिया, धातुषु प्रवर्तमाना धातुपाक-प्रक्रिया शरीरपोषकप्रक्रिया च शरीरमूलभूतेन वातेन नियन्त्र्यते । अस्य वातस्यैव वैषम्यादुपर्युक्ता इमाः पाकप्रक्रिया विषमा भवन्ति । येन पक्वाशये, धातूनामवयवेषु च, आमरसोऽपूर्णपाकाज्जातानि कानिचित् विषभूतानिद्रव्याणि वा[3] समुत्पद्यन्ते । यानि धातूनामवयवेषु सन्धिषु कण्डरासु वा सञ्चितानि भूत्वा आमवातरोगस्य निदानानि भवन्ति ।

मस्तिष्कवर्तिनो मस्तिष्कपोषकवातस्य वैषम्ये सति मस्तिष्कनैर्बल्यात् मनोनैर्बल्याद्वा स्मृतिविभ्रम, निद्रानाश, शिरोभ्रम,

1. Reflexes. 2. Sensation. 3. Vrie acid etc.

दैन्य, प्रलाप, उन्माद, व्यामोह, विषाद, औदासीन्यादयो मानसिका उपद्रवाः समुत्पद्यन्ते ये च वातविकारजन्यत्वाद् आयुर्वेदे वातिकरोगा इत्युच्यन्ते ।

पित्तप्रकोपलक्षणानि—

रसरक्तादिधात्ववयवेषु प्रवर्तमानायाः पचनात्मकप्रक्रियायां[1] वैषम्यमेव 'पित्तस्य प्रकोपः' इत्युच्यते । तथाहि—पचनात्मकप्रक्रियायास्तीव्रत्वे ऊष्माधिक्य मुत्पद्यते । शरीरैकदेशे समुत्पन्नः समधिक ऊष्मा रसरक्तादिमार्गेण सर्वदेहे प्रसृतः सन् कृत्स्नदेहस्योष्माणं प्रवर्धयति । इदम् ऊष्माधिक्यमेव 'ज्वरः' इति ब्रुवते । शारीरग्रन्थयो[2] मांसपेश्यश्च ऊष्मोत्पत्तेर्विशेषाधिष्ठानानि । शारीरग्रन्थिषु पचनात्मकप्रक्रियाया नैरन्तर्येण प्रवृत्तेस्तेषु ऊष्मण उत्पत्तिः । तत्रापि च आमाशयपक्वाशयगतपाचकग्रन्थिषु तु तदुत्पत्तिस्ततोऽप्यधिकतरा । अत एव मिथ्याहारविहाराभ्यामामाशय-पक्वाशयगतपाचकग्रन्थिषु ऊष्मणः प्राचुर्ये सति सर्वशरीरोष्माऽपि प्रवर्धते, ज्वरश्च संजायते । पित्तप्रकोपलक्षणभूते ज्वरे सर्वशरीरधातुषु पचनात्मकप्रक्रिया सातिशयं प्रवर्तते, येन शरीरधातवोऽत्यल्पकालेनैव प्रभूतमात्रायां पच्यन्ते, क्षीयन्ते च, धातुपाकोत्पन्नमलाश्च[3] स्वेदमलमूत्रादिमार्गैरातितरां निर्गच्छन्ति । शारीरिकश्रमादिभिर्मांसपेशीष्वपि ऊष्मा समुत्पद्यते । अत एव कदाचिदतिश्रमादपि ज्वरो विलोक्यते ।

---

1. Katabolic Chemical activity. 2. Glands.
3. Urea, Uric acid etc.

यस्मिन्नङ्गे पचनात्मकप्रक्रिया विशेषेण प्रवर्तते तस्मिन् रक्तस्य संचयोऽपि विशेषेण भवति। अत एव आहारपाकव्यापृतेषु धातुपाकसम्बन्धिषु च शरीरग्रन्थिषु रुधिरमतिमात्रायामुपलभ्यते। रोगदशायामपि यत्र पचनात्मकप्रक्रिया प्रचुरा भवति तत्र रक्तं नितरामुपचीयते-येन तत्र रक्तिमा शोथश्चोत्पद्यते। शोथस्याधिक्ये पाकः पाकस्याधिक्ये च कोथः[1] संजायते। एतानि च पित्तप्रकोपलक्षणानीत्युच्यन्ते। एवमेव उष्णानां क्षोभशीलानां द्रव्याणामतिप्रयोगाद् आमाशयान्तःकलायां पचनात्मकप्रक्रिया प्रवर्धते येन तत्र रक्तिमा शोथादयश्च संजायन्ते। पाचकग्रन्थीनामुत्तेजनया क्षुधा, ऊष्माधिक्येन च पिपासाऽतितरां बाधते। अतोऽम्लपित्ताऽतिक्षुधाऽतिपिपासादयो रोगाः पित्तप्रकोपजा इत्युच्यन्ते। त्वचि पचनात्मक प्रक्रियाया आधिक्यात् स्वेदोऽतितरां प्रवर्तते। एवं च अतिस्वेदोऽपि पित्तप्रकोपजः।

रक्तेपि स्वभावतः पचनात्मकप्रक्रिया प्रवर्तते। रक्तस्य रक्तरंजकद्रव्यरूपोंऽशः पित्ताधिष्ठानयोर्यकृत्प्लीह्नोः प्रतिक्षणमेव 'लोहसहित' 'लोहविरहितयो'[2] र्द्वयोर्द्रव्ययोर्विभज्यते। इत्थं च रक्ताणूनां विभागात् समुत्पन्नं लोहविरहितं द्रव्यं मलभूतेन पित्तेन साकं यकृदाशयाद्बहिर्निर्गच्छति। अतएव पित्तप्रकोपे रुधिरवर्तिरक्तरंजकद्रव्यस्य, रक्ताणूनाञ्च, अतिमात्रायां पाकात् देहे पाण्डुता मलरूपपित्तस्याधिक्याद्रेचकत्वाच्च मले पीतवर्णता अतिसारश्च संजायते। मलरूपपित्ते समुपलभ्यमानः पीतवर्णः[3]

---

1. Gangrene. 2. Haematoidin. 3. Bilirubin.

रक्तद्वारेण विप्रसृत्य नेत्रयोः त्वचि मूत्रे च पीतवर्णतामुत्पादयति। अयमेव च विकारः 'कामला' इत्युच्यते। त्वक्स्थितश्चायं पीतवर्ण आतपप्रभावाद्धूसरः श्यामवर्णश्च संजायते येन मुखे व्यङ्ग-नीलिकाऽऽदयो रोगाः समुत्पद्यन्ते। इत्थं रक्तस्य विभागेन अतिपाकेन वा समुत्पन्नानि रक्तरंजकद्रव्यादीनि मूत्रेण सह निर्गच्छन्ति पित्तप्रकोपजन्यमेहांश्च जनयन्ति। मलभूतपित्तभागे शरीरविप्रसृते सति मुखजनितायां लालायां स्वेदेऽपि च तस्यांशः समुपलभ्यते येन मुखे तिक्तरसता, त्वचि पाकव्रणशोथादयश्च समुत्पद्यन्ते। पूर्ववर्णितायां रक्तातिपाकदशायां कदाचित्त्वङ्—मुख-नासा-गुदादिद्वारेण शरीराद्रुधिरमपि संप्रवर्तते। अयमेव तावत् रक्तपित्ताभिधेयो व्याधिः। अत्युत्पन्नस्य मलभूतपित्तस्य कश्चिदंशो रुधिरगतः सन् रक्तपित्तरोगकारणं भवतीति केचित् ब्रुवते। केचित् वृक्कोत्तरीयग्रन्थेरुत्पन्नस्य सूक्ष्मपित्तरसस्य वैषम्यमेव रक्तपित्तस्य कारणमाहुः। इत्थं पाण्डु—कामला—अतिसार-नीलमेह—कालमेह—रक्तमेह—रक्तपित्त—तिक्तरसतादीनि पित्तप्रकोपमेव विभावयन्ति।

उष्णतीक्ष्णादिगुणवतां द्रव्याणामुपयोगेन मस्तिष्केपचनात्मकप्रक्रियाया रक्तसंचयस्य चातिशयात् उन्माद-मूर्छादयः पित्तोपद्रवाः समुत्पद्यन्ते।

एतद्विपरीतं च शरीरस्थपचनात्मकप्रक्रियायाः क्षये तु पाचनाग्निर्नश्यति, शरीरोष्मा हीयते, शरीरस्य रक्तिमा, प्रभा, कान्तिश्च लुप्यते। वृक्कोत्तरीयग्रन्थ्युत्पन्नस्य पित्तरसस्य क्षयाच्च रक्तस्य स्वाभाविकम् उत्पीडनम्[1] अपचीयते। एतान्येव

1. Blood Pressure.

च क्षीणपित्तस्य लक्षणानि ।

कफप्रकोपलक्षणानिः—

गर्भवासावस्थायां शैशवे च शरीरे स्वाभाविकी रचनात्मिका प्रक्रिया विशेषेण प्रवर्तते । पचनात्मिका प्रक्रिया तु तदपेक्षया मन्दा भवति । अत एव तदा शरीराङ्गेषु शीघ्रमेव वृद्धिः संजायते । यौवने उभे अपि प्रक्रिये समानबले भवतो येन शरीरं प्रायशः समावस्थायामेव तिष्ठति । वार्धके पुनर्वातशक्तौ क्षीयमाणायां रचनात्मकप्रक्रियाया नैर्बल्याच्छरीरावयवेषु कार्श्यं, लघुता, नैर्बल्यं, जरालक्षणानि चोपलक्ष्यन्ते ।

शरीरे शरीरावयवेषु च रचनात्मकप्रक्रियाया वैषम्यं, रोगप्रतिरोधकशक्तेः ओजसः क्षयं च 'कफप्रकोपः' इत्याहुः । तथाहि—यदि शरीरे कस्यचिदङ्गस्योपरि समधिकः कार्यभारः समापतति तर्हि तस्याङ्गस्य वृद्धिरपि विशेषेण जायते । तथा संजातामप्राकृतवृद्धिश्च 'अतिवृद्धि[1]' इति निगदन्ति । इत्थमेव बहुधा हृदयेऽपि चिन्तादिभिर्निरन्तरसविशेषकार्यभाराऽऽक्रान्ते सति तस्मिन्नप्यतिवृद्धिः संजायते तच्च वृहदाकारं विलोक्यते, रोगश्चायं 'हृदयातिवृद्धिः' इत्युच्यते । मूत्रमार्गे मलमार्गे वा क्वचिन्निरन्तरं अंशतोऽवरुद्धे सति तदवरोधस्थानादूर्ध्वतने भागे स्वभावतः कार्यभाराऽतिशयाद् अतिवृद्धिः संजायते । अतिकार्यभारात्तस्मिन्नङ्गे रचनात्मकप्रक्रियाऽपि विशेषेण भवति । एवमेव क्वचिच्छरीरावयवेषूपलभ्यमाना निरुपयोगिनो निरुपद्रवाश्चार्बुदा यत्र तत्र अस्या रचनात्मकप्रक्रियाया आधिक्येनैव सम्पद्यन्ते कफार्बुदा[2]श्चेत्युच्यन्ते । किञ्च, रचना-

1. Hypertrophy 2. Benign tumours

त्मकप्रक्रियाया नियामकानां गलाग्रग्रन्थि[1], मस्तिष्कग्रन्थि[2] प्रभृति-ग्रन्थ्यन्तराणां विकारादपि केषुचिच्छरीरभागेषु अतिवृद्धिः सञ्जायते ।

अतिभोजनादिषु कफप्रकोपकारणेषु समुपस्थितेषु यदि रक्तस्य "लसीके"त्याख्यः पोषकद्रवोऽतिमात्रायां शरीरे शरीराङ्गे वा संचीयते तर्हि स सर्वशरीरद्वारेभ्यस्तस्मादेकस्मादेवाङ्गाद् वा मलरूपेण बहिर्निर्गन्तुमुपक्रमते । शरीरे गुरुताऽऽलस्या-दीनां च कारणं संजायते । शरीरनानाद्वारेभ्यो निर्गच्छन् स मलो "मलरूपकफः" इति व्यवह्रियते । तथा च महा-स्रोतसि अस्यैव मलरूपश्लेष्मणः संचये सति मुखमाधुर्य-अ-रुचि-वमन-उद्गार-तृषानाश-अतिसारादयः संजायन्ते । श्वास-मार्गे चाऽस्य संचये सति प्रतिश्यायगलग्रहकासादयः समुद्भ-वन्ति । नेत्रयोः सञ्चितेऽभिष्यन्दः समुत्पद्यते । रक्तमार्गेण वृक्कोपगते चास्मिन् मलरूपकफे लसीका—पिष्ट—अल्ब्यूमन-शर्करादयः पोषकरसान्तर्गताः सारभूताः पदार्था मूत्रेण सह शरीरान्निर्गच्छन्तः कफमेहाञ्जनयन्ति । त्वचि सञ्चिते अस्मिन् मलरूपकफे स्राववत्यः पिडिकाः-पामा-उदर्द-कोठादयः कफो-पद्रवजास्त्वग्रोगाः संभवन्ति । त्वगधोभागे स्थिते चास्मिन् श्वयथुरोगः सजायते त्वचि शैत्यं चोपलक्ष्यते । इत्थं शरीरपो-षकरसह्राससूचकाः, पोषकरसस्रावसूचका वा रोगाः कफ-रोगा इत्युच्यन्ते ।

कफप्रकोपेन साकमेव कफप्रकोपानन्तरं वा यदि सर्वस्मिन्

---

1 Thyroid. 2 Pituitary gland.

शरीरे कस्मिंश्चिच्छरीराङ्गे वा वातशक्तिर्हीयेत, वातस्य प्रकोपो वा स्यात्तर्हि सर्वस्मिञ्छरीरे तस्मिञ्छरीराङ्गे वा समुत्पन्नः कफोपद्रवाश्चिरस्थायी भवति नव तथा सुखेन साधयितुं शक्यते। सद्यः समुत्पन्नाः कफोपद्रवाः पित्तोपद्रवा वा सुखसाध्या भवन्ति, वातप्रकोपेण युक्ता तु पुनर्दुःखसाध्याः, प्रबलवातप्रकोपयुक्तास्त्वसाध्या एव। यतो हि शरीरस्थवातशक्तौ निर्बलायां सत्यां शरीरावयवेषु विद्यमाना पोषकरसग्राहिका शक्तिः क्षीयते, पोषकरसश्च मलरूपेण बहिर्निर्गच्छति शरीरञ्च सततं हीयते। सर्वशरीरस्थवातस्य प्रकोपाच्छरीरे शर्कराया व्ययो न भवति सा च मूत्रेण सह निर्गच्छन्ती मधुमेहं लक्षयति। एवं कफप्रकोपजनितो मधुमेहः सुखसाध्यो भवति, वाते तु प्रकुपिते स एव दुःसाध्यो याप्यो वा। कफप्रकोपजनित उदकमेहो बहुमेहो वा साध्यो वातप्रकोपजनितश्च स एव दुःसाध्यो भवति। वृक्कयोः कफशोथेनोत्पन्नः " अलब्यूमिनमेहः " सुखसाध्यस्तयोरेव वातेऽपि प्रकुपिते तेन कारणेन च वृक्कयोः जीर्णक्षीणयोश्च सतोः समुत्पन्नः 'अलब्यूमिन मेहोऽसाध्यप्राय एव। आमाशये कफप्रकोपादूर्ध्वं वातस्याऽपि प्रकोपे तेन च आमाशये निर्बले सति संजातोऽजीर्ण रोगो दुःखसाध्यतामुपैति। प्रतिश्याय–गलशोथ–कण्ठशोथ—कासादयः श्वासमार्गगता रोगाः कफप्रकोपजनिताः सुखसाध्याः। शरीरस्थे वाते पुनः प्रकुपिते सति त एव कष्टसाध्याः सन्तः उरःक्षयादिरोगहेतवः सम्पद्यन्ते। इत्थं वातप्रकोपजनिताः शरीरपोषकरसह्राससूचका मेदोवृद्धि–वसामेह–मधुमेह–अलब्यूमिनमेह–बहुमेह–उरःक्षयादयो रोगा दुःसाध्या असाध्या वा भवन्ति।

अथ शरीरस्थे कफधातौ क्षीणे सति शरीरस्य पोषणं हीयते। रूक्षता-लघुता-खरता-शैत्य-सन्धिशैथिल्य-निद्रानाश-स्मृतिनाशादयोऽन्ये वातोपद्रवाश्च समुत्पद्यन्ते।

अथ वात-पित्त-कफ "प्रकृति" विवेचनम्—

वातपित्तकफास्त्रयो दोषाः। तेषां स्वरूपं तत्प्रकोपलक्षणानि च प्राक् प्रतिपादितानि। एतानि प्रकोपलक्षणानि तावद्द्विविधानि। मिथ्याहारविहारादिभिर्हेतुभिरुत्पादितानि आगन्तुकानि कथ्यन्ते। तानि च शरीरोत्पन्नविकारसूचकानि भेषजैश्चिकित्स्यानि च। तान्येव लक्षणानि मातापित्रो रजोवीर्यवैशिष्ट्यात्संततौ जन्मना सहैव समुद्भूतानि सहजानि। क्वचिन्मृदूनि क्वचिन्मध्यानि क्वचित्तीव्राणि चानुभूयन्ते तत्तद्वपुषस्तत्तत्प्रकृतितां च सूचयन्ति। एतानि प्रायेण भेषजैरसाध्यानि। इत्थं च शरीराणां एकप्रकृतित्वं, द्वन्द्वप्रकृतित्वं, वातपित्तकफसन्निपात प्रकृतित्वं च संभवति।

वातप्रकृतिः[1]—

वात वातप्रकोपौ हि वपुषि यथाक्रमं बलाबलयोर्निदाने। वातप्रकोपजन्यनैर्बल्येन कलेवरे मांसमज्जोऽस्थ्यादीनां यथावत् पोषणाभावात् समुद्भवन्ति लक्षणानि "वातिकलक्षणानि" इत्युच्यन्ते। सहजानि च तानि तद्देहस्य वातप्रकृतितां प्रकटयन्ति।

वातप्रकृतेः शारीरिकलक्षणानि—वातप्रकृतेः पुरुषस्य त्वचि यथावत् पोषणाभावात् तत्र रूक्षता, पाणिपादवदना-

1 Nervous or sanguine Temperament.

दिषु नैसर्गिकमसृणताऽभावः, पारुष्यं, पादतलयोर्विपादिकाः, शिरसि रूक्षिका च लक्ष्यते। त्वग्वदेव नखा अपि खराः, भङ्गुराः, विरूपा, मूर्धमुखकचाश्च परुषाः स्थूला विरलाश्च भवन्ति। त्वगधोवर्तिन्या वसाया अल्पीयस्त्वात्तद्गतानां शिराणां कण्डराणां च उल्वणता, शरीरस्य प्रतनुता अस्थिमयता च, गात्रलाघवात्पुरुषस्य क्रीडन, प्लवन, धावन, नर्तन, दूराध्वगमनादिप्रवणता च विलोक्यते । अस्थिसन्धिषु पोषकश्लेष्मद्रवस्य अल्पीयस्त्वाद्गतिकाले सन्ध्यस्थीनि मिथो घृष्यन्ति चटचटाकुर्वन्ति च। अल्पीयसाऽपि कारणेन सकलकलेवरस्य अन्यतमावयवस्यैववा वातनाड्यस्तथा समुत्तेजिता जायन्ते यथा कर-चरण-जंघा-जघन-स्कन्ध-शिर-ओष्ठ-भ्रू-नेत्रादिषु यत्र तत्र स्वत एव कस्माच्चित्कारणलेशतोऽपि वा अङ्गविक्षेप-कम्पस्पन्द-स्फुरणादयः समुद्भवन्ति । शरीरे कृशता मांसपेशीषु अदृढ़ता, कण्ठस्वरे मन्द्रता, जठराग्नौ मन्दता, पुंस्त्ववैधुर्यात् सन्ततेर्न्यूनता च दरीदृश्यते। वपुर्यन्त्रस्य यत्किंचन निर्बलत्वात्तापमात्राया नियतमानादवहीनतया च शीतदेश-शीतकाल-शीतगुणकपदार्थाः प्रतिकूलास्तत्प्रतिकूलं उष्णदेश-उष्णकाल-उष्णगुणक-मधुर-कट्वम्ल-भोजनानि च तस्यानुकूलानि विलोक्यन्ते।

वातप्रकृतेर्मानसलक्षणानि—वातवाहिनीनां नाडीनां मस्तिष्कस्य च नैर्बल्यात् तत एव सुलभक्षोभतया च निद्रादारिद्र्यं, गगनोड्डयनादिस्वप्नदर्शनप्राचुर्यं, स्मृतिशक्तेरेकाग्रतायाश्च वैकल्य, मित्येतान्यन्यानि च लक्षणानि लक्ष्यन्ते । तद्यथा—वपुर्मनसोः किञ्चिदसामर्थ्यात्तेन च मनोवेगानां यथावदनिग्रहेण

धैर्यसहिष्णुत्वयोर्वैकल्यं, अल्पीयसापि क्षोभकारणेन विक्षुभ्य रभसकारित्वं, भयोद्वेगप्रसादविषादादिमनोविकाराणामाशु वशंवदत्वं, स्वीयकुसंस्कारसुसंस्कारवशात् बाह्यैः शोभनाशोभनभावैर्द्रुतप्रभावग्रहणशीलत्वं च । किञ्चात एव वातप्रकृतिकेषु पुरुषेषु ईश्वरभक्त-देशभक्त—त्यागि—तपस्वि—कवि प्रभृतीनां हृदयावेशवैशिष्ट्यजुषां प्राचुर्येणोपलम्भः। वातप्रकृतयः पुरुषा निसर्गादेव चञ्चलचित्ताः, अस्थिरकर्माणः, परिवर्तनशीलाः, अधृतयः, अस्थिरसौहार्दाः, अनियतवैराः, अनवस्थितमतयः, अस्थास्नुविश्वासाः, चलसिद्धान्ताः, अदृढचरित्राश्च भवन्ति । अतएव कदाचिदनेनास्थैर्येणैव ते व्यापारव्यवसायसौहार्दादिषु विफला अपि जायन्ते ।

पित्तप्रकृतिः –[1]

शरीरगतायाः पचनात्मकरासायनिकप्रक्रियायाः[2] निबन्धनं पित्तमेव । जन्मन एव नैसर्गिकी भूयसी च प्रवर्तमाना प्रक्रियेयं तत्तद्देहस्य पित्तप्रकृतितां प्रकटयति । पित्तप्रकृतिके पुरुषे पित्तजन्यपचनप्रक्रियायाः प्रकर्षात् समधिकोष्मोत्पत्तेः उष्णदेश-उष्णभोजनादि प्रातिकूल्यं शीतवीर्य–मधुर–कषायरस भोजनानुकूल्यं, पाचकपित्तप्राचुर्येण शरीरपरिमाणादधिकभोजनपानता तत्पाचनसामर्थ्यं च विलोक्यते । शरीरवर्तिपाकप्रक्रियाऽतिशयात् मलानां नियतमात्रापेक्षयाऽधिकोत्पत्तिः, यकृदाशयान्मलभूतस्य पित्तस्य आन्त्रेषु सविशेषागमनात् मलबन्धाभावः, स्वेदाऽधिक्याद् वपुषि गन्धविशेषोपलब्धिः,

1 Bilious Temperament. 2 Katabolic activities.

मलानां त्वगन्तःसंचयाद्देहे व्यंग, तिलक, मषक, पिडिकादयश्च दृश्यन्ते। त्वचि पीतिमा, गात्रे सुकुमारतामृदुते, रसनौष्ठनेत्राद्यन्तःकलासु रक्तिमा, केशेषु मृदुता, विरलता, कपिलता, खालित्य, पालित्यादयश्च प्रायेणोपलभ्यन्ते। पित्तप्रकृतिपुरुषो नापि कफप्रकृतिपुरुषवदतिपुष्टो नवा वातप्रकृतिकशरीरवदतिकृशः शुष्को वा प्रत्युत प्रायेण मध्यमपरिमाणो भवति। स मध्यस्वास्थ्यो मध्यबलो मध्यसहिष्णुत्वो मध्यपुंस्त्वसामर्थ्यश्च भवति।

पूर्वोक्त पचनात्मक रासायनिक प्रक्रियायाः प्रकर्षादेव तस्य मानसिकशक्तिष्वतिशयो जायते। अतएव पित्तप्रकृतिः पुरुषः प्रखरधिषणो, मेधावी, वाग्मी, शास्त्रविवादेषु परप्रधर्षकः, पण्डितश्च भवति। पित्तजन्यस्वभावतैक्ष्ण्यादेवातिमानी क्रोधनस्तीक्ष्णवचनोऽपि। वातप्रकृतिरिव न स परेभ्यो बिभेति न वोद्विजते। प्रतिपक्षेष्वतिप्रचण्डः भयभर्त्सनादिष्वप्रणतः, प्रणयिष्वतिप्रणयवानुदारहृदयश्च भवति।

कफप्रकृतिः।

शरीरस्य सूक्ष्मावयवानां रचनाया मूलकारणं कफः। रचनात्मकरासायनिकप्रक्रियाया हेतुभूतस्य अस्य कफस्य स्निग्धत्वगुरुत्वमन्दत्वस्थिरत्वादीनि लक्षणानि जन्मन एव सहजानि भूयस्त्वेन च समुपलभ्यमानानि तत्तद्देहस्य कफप्रकृतितां सूचयन्ति। कफप्रकृतेः पुरुषस्य पाणिपादवदनादिकृत्स्नावयवेषु स्निग्धत्वमृदुत्वसुकुमारत्वावदातवर्णत्वादि

1 Phlegmatic or lymphatic Temperament.

विलोक्यन्ते । त्वग्वदेव केशेषु नखेष्वपि मृदुत्वश्लक्ष्णत्वस्निग्धत्वानि, नेत्रयोर्धवलता च । किं च पोषण व्यापाराधिक्यात्, त्वचोऽधस्तात् मेदसः प्राचुर्याच्च वपुषि उपचयः, परिपूर्णता, सुविभक्ताङ्गत्वं प्रियदर्शनत्वं च । पोषणप्रकर्षादेव वातप्रकृतिकपुरुषविपरीतं तस्य स्वल्पाशित्वेऽपि स्थूलता, पीनता च । कफप्रकृतिपुरुषा धीरगम्भीरकण्ठनिर्घोषाः, विशालवक्षसः, आयतोन्नतललाटाः, प्रभूतशुक्रव्यवायापत्याः कफहेतुकक्षमाशक्त्यतिशयादोजोगुणवैशेष्याद्वा आगन्तुकरोगक्षुत्पिपासादिसहिष्णवः, कफहेतुकस्थिरत्वमन्दत्वाद्याधिक्याच्च अतिनिद्राः, मन्दचेष्टाऽऽहारविहाराः, स्वप्नेषु जलाशयजलविहाराद्याभासद्रष्टारश्च भवन्ति ।

कफकारणकस्थिरत्वमन्दत्वादि हेतोरेव शरीरवत्तेषां मनस्यपि सहिष्णुता विशेषेण भवति । अतएव ते निसर्गत एव मर्षणाः, सत्यपि हेतौ असुलभकामक्रोधलोभमोहाद्यावेगाः, व्यवहारे प्रायेण मधुरप्रकृतयः, प्रियभाषिणः, सत्स्वपि क्षोभेषु तद्गोपनपटवश्च भवन्ति । स्वभावे स्थिरतातिशयान्मन्दचेष्टत्वेऽपि दृढाध्यवसायतया स्वकीयव्यवसायोद्योगलक्ष्यादिसिद्धौ सफलाः स्थिरसौहृददौहृदाश्च भवन्ति । वातप्रकृतिकपुरुषवत्तात्कालिकक्षोभमनाविष्कुर्वन्तः कालान्तरेऽपि वैरं निर्यातयन्ति । कफप्रकृतयः, कमनीयाकृतयः, भव्यरूपाः पुरुषा यद्येकत्र महानुभावा महात्मानश्च भवन्ति तर्ह्यपरत्र तेषाम्मध्ये केचित् परमकपटपटवो दाम्भिका अपि । कफप्रकृतयः स्वभावत एव धीरगम्भीरा बाल्येऽपि अतरलाः कैशोरके तारुण्येऽपि च क्रीडनकूर्दननर्तनगानपरिहासाद्यरुचयो विलोक्यन्ते ।

त्रिदोषसंग्रहः

प्रकृतितत्वानि गुणभाषाश्च ।

पञ्चविंशति तत्वानि भवन्तीत्याह—

सर्वभूतानां कारणमकारणं सत्वरजस्तमोलक्षणमष्टरूपमखिलस्य जगतः संभवहेतुरव्यक्तं नाम । तदेकं बहूनां क्षेत्रज्ञानामधिष्ठानं समुद्र इवोदकानां भावानाम् ।

तस्मादव्यक्तान्महानुत्पद्यते तल्लिङ्ग एव । तल्लिङ्गाच्च महत स्तल्लिङ्ग एवहङ्कार उत्पद्यते । स च त्रिविधो वैकारिक स्तैजसो भूतादिरिति । तत्र वैकारिकादहङ्कारात्तैजस सहायात् तल्लक्षणान्येवेकादशेन्द्रियाण्युत्पद्यन्ते । तद्यथा । श्रोत्र त्वक् चक्षु जिह्वा घ्राण वाक् हस्तोपस्थ पायु पाद मनांसीति । तत्र पूर्वाणि पञ्च बुद्धीन्द्रियाणि । इतराणि पञ्च कर्मेन्द्रियाणि । उभयात्मकं मनः ।

भूतादेरपि तैजस सहायात् तल्लक्षणान्येव पञ्चतन्मात्राण्युत्पद्यन्ते तद्यथा शब्द तन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति । तेषां विशेषाः शब्द स्पर्श रूप रस गन्धास्तेभ्यो भूतानि व्योमानिलानलजलोर्व्यः । एवमेषा तत्वचतुर्विंशतिर्व्याख्याता ।

अव्यक्तं महानहङ्कारः पञ्चतन्मात्राणि चेत्यष्टौ प्रकृतयः । शेषाः षोडष विकाराः ।

तत्र सर्व एव अचेतन एष वर्गः । पुरुषः पञ्चविंशतितमः स च कार्यकारणसंयुक्तश्चेतयिता भवति । सत्यप्यचैतन्ये प्रधानस्य पुरुषकैवल्यार्थं प्रवृत्तिमुपदिशन्ति ।

अतऊर्ध्वं प्रकृतिपुरुषयोः साधर्म्य वैधर्म्यं व्याख्यास्यामः ।

तद्यथा उभावप्यनादी, उभावप्यनन्तौ, उभावप्यलिङ्गौ, उभावपि नित्यौ, उभावप्यपरौ, उभौ च सर्वगताविति । एका तु प्रकृति रचेतना त्रिगुणा बीजधर्मिणी प्रसवधर्मिण्यमध्यस्थधर्मिणी चेति । बहवस्तु पुरुषा श्चेतनावन्तोऽगुणा अबीजधर्मिणोऽप्रसव धर्मिणो मध्यस्थ धर्मिणश्चेति ।

तत्र कारणानुरूपं कार्यमिति कृत्वा सर्व एवैते विशेषाः सत्वरजस्तमो मयाः भवन्ति ।

तन्मयान्येव भूतानि तद्गुणान्येव चादिशेत्
तैश्च तल्लक्षणः कृत्स्नो भूतग्रामो व्यजन्यत ।
तस्योपयोगोऽभिहितश्चिकित्सां प्रति सर्वदा
भूतेभ्यो हि परं यस्मान्नास्ति चिन्ता चिकित्सते ॥

भौतिकानि चेन्द्रियाण्यायुर्वेदे वर्ण्यन्ते तथेन्द्रियार्थाः ।

इन्द्रियेणेन्द्रियार्थन्तु स्वं स्वं गृह्णाति मानवः ।
नियतं तुलय योनित्वान्नान्येनान्यमिति स्थितिः ॥

न च आयुर्वेदशास्त्रेषूपदिश्यन्ते सर्वगताः क्षेत्रज्ञाः नित्याश्च । आयुर्वेदशास्त्रेष्वसर्वगताः क्षेत्रज्ञा नित्याश्च तिर्यग् योनि मानुष देवेषु संचरन्ति धर्माधर्मनिमित्तं त एतेऽनुमानग्राह्याः परमसूक्ष्माश्चेतनावन्तः शाश्वता लोहितरेतसः सन्निपातेष्वभिव्यज्यन्ते । यतो ऽभिहितं पञ्चमहाभूत शरीरि समवायः पुरुष इति । स एव कर्मपुरुषश्चिकित्साधिकृतः । सु. । शा. । १ ।

अथ द्रव्यनिष्टान्गुणान्स्तेषां परिभाषाश्चाहः—

कर्मभिस्त्वनुमीयन्ते नाना द्रव्याश्रयागुणाः । सु. । सू. ४६ ।

तीक्ष्णं रूक्षं मृदु स्निग्धं लघूष्णं गुरुशीतलम्
वीर्यमष्टविधं केचित् केचिद्द्विविधमास्थिता

शीतोष्णमिति वीर्यन्तु क्रियते येन या क्रिया
नावीर्यं कुरुते किञ्चित्सर्वा वीर्यं कृता क्रिया। च.। सू.। २६।
तत्रोष्णं भ्रमतृड् ग्लानि स्वेद दाहाशुपाकिताः
शमं च वात कफयोः करोति दीपनं तथा।
ह्लादनः स्तम्भनः शीतो मूर्छातृड् स्वेद दाहजित्।
स्नेहमार्दव कृत् स्निग्धो बल वर्ण करस्तथा
रूक्ष स्तद्विपरीतः स्या द्विशेषात्स्तम्भनः खरः। सु.।
रौक्ष्यं खरत्वं वैशद्यं यत्कुर्यात्तच्चरूक्षणम्। च.। सू.। २२।
पिच्छिलो जीवनो बल्यः सन्धानः श्लेष्मलो गुरूः
विशदो विपरीतो ऽस्मात् क्लेदाचूषण रोपणः।
दाह पाक करस्तीक्ष्णः स्रावणो मृदुरन्यथा
सादोप लेप बलकृत् गुरुस्तर्पण बृंहणः
लघुस्तद्विपरीतः स्याल्लेखनो रोपणस्तथा।
द्रवः प्रक्लेदनः सान्द्रः स्थूलः स्याद्बन्धकारकः
श्लक्ष्णः पिच्छिलवज्ज्ञेयः कर्कशो विशदो यथा।

वातप्रकरणम्

अथ वात धातुः

वातशब्दस्यव्युत्पत्तिमाह–

वा गति गन्धनयोरिति धातु स्तस्य क्तद्विहित प्रत्ययेन वात इति रूपं भवति । सु. । सू. । २१ ।

वायवाकाशधातुभ्यां वायुः । वा. संग्रह । सू. । २० ।

किञ्च– सत्व बहुलमाकाशं, रजो बहुलो वायुः । सु. । शा. । १

आन्तरिक्षान्वायव्यान्श्च गुणानाह–ः

आन्तरिक्षास्तु गुणाः शब्दः शब्देन्द्रियं सर्वच्छिद्रसमूहो विविक्तता च । वायव्याश्च गुणाः स्पर्शः स्पर्शेन्द्रियं सर्व चेष्टा समूहः सर्वशरीरस्पन्दनं लघुता च । सु. । शा. । १ । अतः शरीरे वायुर्गतिमत्वात् सर्व प्रसरण हेतुः । स हि रजोभूयिष्ठो, रजश्च प्रवर्तकं सर्व भावानाम् । सु. । सू. । २१ ।

पवनस्तेषु बलवान् विभागकरणान्मतः ।
रजोगुणमयः सूक्ष्मः शीतो रूक्षो लघुश्चलः ॥ शा।पू.ख. ।२
सर्वा हि चेष्टा वातेन सप्राणः प्राणिनां स्मृतः ।च.।सू.।१८
उत्साहोच्छवास निःश्वास चेष्टाधातुगतिः समा ।
समो मोक्षो गतिमतां वायोः कर्माविकारजम् ।च.।सू.।१८.
स्वयम्भूरेष भगवान् वायुरित्यभिशब्दितः ।
स्वातन्त्र्यात् नित्यभावाच्च सर्वगत्वात्तथैव च ॥
सर्वेषामेव सर्वात्मा सर्वलोक नमस्कृतः ।
स्थित्युत्पत्तिविनाशेषु भूतानामेष कारणम् ॥

अव्यक्तो व्यक्तकर्मा च रूक्षः शीतो लघुःखरः
तिर्यग्गो द्विगुणश्चैव रजो बहुल एव च ॥
अचिन्त्य वीर्यो दोषाणां नेता रोग समूहराट् ।
आशुकारी मुहुश्चारी पक्वाधान गुदालयः ॥
देहे विचरतस्तस्य लक्षणानि निबोध मे
दोष धात्वग्निसमतां सम्प्राप्तिं विषयेषु च ॥
क्रियाणामानुलोम्यश्च करोत्युकुपितो ऽनिलः ।सु.नि.।१।

किञ्च- वायुरायुर्बलं वायु र्वायु र्धाता शरीरिणाम्
वायुर्विश्वमिदं सर्वं प्रभुर्वायुश्च कीर्तितः ।च.।चि.।२८

किञ्च—। यदुच्छवासोन्मेष निमेषाकुञ्चन प्रसारण गमन प्रेरण धारणानि तद्वायवीयम् ।च.।शा.।६।

वायुस्तन्त्रयन्त्रधरः प्राणोदानसमानव्यानापानात्मा प्रवर्तकश्चेष्टाना मुच्चावचानां नियन्ता प्रणेता च मनसः सर्वेन्द्रियाणामुद्योगकरः। सर्वेन्द्रियार्थानामभिवोढ़ा सर्व शरीरधातुव्यूहकरः। सन्धानकरः शरीरस्य । प्रवर्तको वाचः । प्रकृतिः स्पर्शशब्दयोः; श्रोत्रस्पर्शनयो मूलं, हर्षोत्साहयो योनिः । समीरणो ऽग्नेः, दोष संशोषणः क्षेप्ता बहिर्मलानाम् । स्थूलाणु स्रोतसां भेत्ता, कर्ता गर्भाकृतीनाम् आयुषोऽनुवृत्ति प्रत्यय भूतो भवत्यकुपितः । च. । सू. । १२ ।

वातः स्वीय शिरासु धमनीषु नाड़ीषु वा प्रचरति । तथा चाह–ः
क्रियाणामप्रतिघातममोहं बुद्धिकर्मणाम्
करोत्यन्यान् गुणांश्चापि स्वाः शिराः पवनश्चरन् सु.।शा.।७

उर्ध्वगा दश धमन्यः शब्द स्पर्शरस रूपगन्धादीन् विशेषानभिवहन्त्यः शरीरं धारयन्ति । तास्तु हृदयमभिप्रपन्ना इति ।

सर्व-शरीर चरोऽपि वातो बहुधा विभिद्यते :—

यथाग्निः पञ्चधा भिन्नो नामस्थानात्म कर्मभिः
भिन्नोऽनिलस्तथाह्येको नामस्थान क्रियामयैः । सु.।नि.।१
प्राणोदानौ समानश्च व्यानश्चापान एव च ।
स्थानस्थाः मारुताः पञ्च यापयन्ति शरीरिणम् ॥

किञ्चः-प्राणोदान समानाख्य व्यानापानैः स पञ्चधा
देहे तन्त्रयते सम्यक् स्थानेष्वव्याहतश्चरन् ।च.।चि.।२८

प्राणस्याश्रयस्थानम्-ः

प्राणो ऽत्र मूर्धग उरः कण्ठचरो बुद्धिहृदयेन्द्रियचित्तधृक् ।
वाग्भट्ट ।

किञ्च- स्थानं प्राणस्य शीर्षोरः कर्णजिह्वाक्षिनासिकाः ।च.।चि.।२८
प्राणः प्राणभृतां यत्र श्रिताः सर्वेन्द्रियाणि च ।
यदुत्तमाङ्ग मङ्गानां शिरस्तदभिधीयते ।च. सू.।१७

शोणित कफ प्रसादजं हृदयम् यदाश्रयाः हि धमन्यः प्राणवहाः । सु शा. । ४ । तथा च—प्राणवहे द्वे तयोर्मूलं हृदयं तत्र विद्धस्याक्रोशन विनमन मोहन भ्रमण वेपनानि मरणं वा भवति । सु. । शा. । ६

हृदय शब्देन न सर्वत्र रक्तस्याशयभूतं हृदयमेव गृह्यते शिरोऽपि गृह्यते तथैव प्राणाधारभूतं हृदयमत्र शिर एव गृह्यते:—तथाहि

षडङ्गमङ्गविज्ञानमिन्द्रियाण्यर्थपञ्चकम्
आत्मा च सगुणश्चेतः चिन्त्यं च हृदिसंश्रितम् ॥ ४ ॥
प्रतिष्ठार्थं हि भावानामेषां हृदयमिष्यते ।
गोपानसीनामागार कर्णिकेवार्थ चिन्तकैः ॥

तस्योपघातान्मूर्छायं भेदान्मरणमृच्छति ।
यद्धि तत् स्पर्श विज्ञानन्धारि तत्तत्र संश्रितम् ।
तत्परस्यौजसः स्थानं तत्र चैतन्यसंग्रहः ।
हृदयं महदर्थश्च तस्मादुक्तं चिकित्सकैः ॥
यःशरीर रसःस्नेहः प्राणा यत्र प्रतिष्ठिताः ।
तत्फला विविधा वाता फलन्तीति महाफलाः॥च.सू.३०

किञ्चः—हृदयं चेतनास्थानमुक्तं सुश्रुत ! देहिनाम्
तमोऽभिभूते तस्मिन्स्तु निद्रा विशति देहिनाम्॥ सु.शा.४

अतएव—निद्राहेतुस्तमः सत्त्वं बोधने हेतुरुच्यते ।शा.पू.ख.।२

अथ च-हृदयं गर्भस्य पूर्वं संभवतीत्याह कृतवीर्यः बुद्धेर्मनसश्च स्थानत्वात् ।

शिरसः प्राणायतनत्वादाह—
वाग्देहमनसां चेष्टामाक्षिप्यातिबला मलाः ।
संन्यस्यन्त्यबलं जन्तुं प्राणायतनमाश्रिताः ॥
यो. र. सन्यासरोग ।

प्राणानां शिर एव स्थानं तथापि तेषामन्यस्थानानि—ः
दशैवायतनान्याहुः प्राणा येषु प्रतिष्ठिताः
शंखौ मर्मत्रयं (शिरो हृदयं वस्तिश्च) कण्ठः रक्तशुक्रौजसी गुदम् ॥

कदाचिद् वक्त्रसंचारी वायुरपि प्राण उच्यते—
वायुर्यो वक्त्रसंचारी च प्राणो नाम देहधृक्
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते ॥सु. । नि. । १

उदानस्याश्रयस्थानं कर्म च—ः
उरः स्थानमुदानस्य नासानाभिगलांश्चरेत्

वाक्प्रवृत्तिप्रयत्नोर्जा बल वर्णादि कर्म च ॥वा.सू.१२

अतएव—विशेषाज्जीवितं प्राणे, उदाने संश्रितं बलम् ।
स्यात्तयोः पीडनाद्धानिरायुषश्च बलस्य च ॥च.चि.२८

समानस्य स्थानं कर्म च—:

आमपक्वाशय चरो समानो वह्निसंगतः ।
सोऽन्नं पचति तज्जांश्च विशेषान्विविनक्ति हि। सु.नि.१
रसश्च हृदयं याति समानमरुतेरितः । शा. । पू. । ६

व्यानस्य स्थानं कर्म च—:

कृत्स्नदेहचरो व्यानो रस संवहनोद्यतः ।
स्वेदासृक्स्रावणो चापि पंचधाचेष्टयत्यपि ॥ सु. नि. १
विष्मूत्रमाहारमलः सारः प्राणीरितो रसः
स तु व्यानेन विक्षिप्तः सर्वान्धातून् प्रतर्पयेत्। सु. सू.४६
व्यानेन रसधातुर्हि विक्षेपोचितकर्मणा
युगपत्सर्वतोऽजस्रं देहे विक्षिप्यते सदा ॥च.चि.१६

अपानस्य स्थानं कर्म च—:

अपानोऽपानगः श्रोणि वस्तिमेढ्रोरुगोचरः
शुक्रार्तवशकृन्मूत्रगर्भनिष्क्रमणक्रियः ॥वा.सू. १२

वातस्य विशेषस्थानानिः—

पक्वाशयकटीसक्थि श्रोत्रास्थिस्पर्शनेन्द्रियम्
स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः ॥वा.सू.१२
मलाशये चरेत्कोष्ठे वह्निस्थाने तथा हृदि
कण्ठे सर्वांग देशेषु वायुः पञ्च प्रकारतः ॥ शा. ।

पित्तकफमलादीनां स एव नियन्ता—

पित्तं पङ्गुः कफः पङ्गुः पङ्गवो मलधातवः

वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत् ॥ शा. ॥

किञ्च—योगवाहः परं वायुः संयोगादुभयार्थकृत् ।
दाहकृत्तेजसा युक्तः शीतकृत्सोमसंश्रयात् ॥ च. चि. ३ ॥

अथ वातस्य प्रकोपः

वातस्य क्षयो वृद्धिर्वा प्रकोप उच्यते (वृद्धया वातस्य क्षोभो गृह्यते)

प्रकोपस्य हेतवः—

वातप्रकोपकद्रव्याणि—वियत्पवनजाताभ्यां वृद्धिमाप्नोति मारुतः ॥ सु० सू० ४१ ॥

यतो हि वायव्यानि द्रव्याणि लघुशीतरूक्षखरविशदसूक्ष्म-गुणबहुलानि तानि रौक्ष्यग्लानिविचारवैशद्यलाघवकराणि ।

आकाशात्मकानि मृदुलघुसूक्ष्मश्लक्ष्णगुणबहुलानि तानि मार्दवसौषिर्य लाघवकराणि ॥ च. सू. २६ ॥

प्रकोपकरसाः—कट्वतिक्तकषाया वातं जनयन्ति ॥ च. वि. १ ॥
वाय्वाकाशातिरेकात्तिक्तः ॥ च. सू. २६ ॥

अतएव—तिक्तो रसोऽत्यर्थमुपयुज्यमानो रौक्ष्यात् खर-विशदस्वभावाच्च रसरुधिरमांसमेदोऽस्थिमज्जाशुक्राण्युच्छो-षयति । स्रोतसां खरत्वमुपपादयति । बलमादत्ते कर्षयति मोहयति वदनमुपशोषयति अपरांश्च वातविकारानुपजन-यति ॥ च. सू. २६ ॥

कटुरसोऽत्यर्थमुपयुज्यमानो विपाकप्रभावात् पौंस्त्वमुपहन्ति रसवीर्यप्रभावान्मोहयति ग्लापयति सादयति कर्षयति मूर्च्छ-यति नमयति तमयति भ्रमयति शरीरतापमुपजनयति बलं क्षिणोति तृष्णां जनयति वाय्वग्निबाहुल्यात् भ्रममदवथु-

कम्पतोदभेदैश्चरणभुजपार्श्वपृष्ठप्रभृतीषु मारुतजान् विकारानुपजनयति ॥ च. सू. ॥२६॥

किंच—तिक्तं कटु च भूयिष्ठमवृष्यं वातकोपनम्।

ऋतेऽमृतापटोलीभ्यां शुण्ठीकृष्णारसोनतः ॥ वा. सू. १०॥

पवनपृथिव्यतिरेकात्कषायः ॥ च. सू. २६ ॥

वायोः समानयोनिः कषायो रसः सोऽस्य शैत्याच्छैत्यं वर्धयति रौक्ष्याद्रौक्ष्यं लाघवाल्लाघवं वैशद्याद्वैशद्यं वैष्टम्भ्याद्वैष्टम्भ्यमिति ॥ सु. सू. ॥ ४२ ॥

कषायो रसोऽत्यर्थमुपयुज्यमान आस्यं शोषयति हृदयं पीडयति उदरमाध्मापयति वाचं निगृह्णाति स्रोतांस्यवबध्नाति श्यावत्वमापादयति पुंस्त्वमुपहन्ति विष्टभ्य जरां गच्छति वातमूत्रपुरीषरेतांस्यवगृह्णाति कर्षयति ग्लापयति तर्षयति स्तम्भयति खरविशदरूक्षत्वात् पक्षवध ग्रह अपतानकार्दितप्रभृतींश्च वातविकारानुपजनयति ॥ च. सू. २६ ॥ ४१ ॥

प्रकोपकाविपाकः—कटुकाज्जायते वायुः कर्माणीति विपाकतः ॥ शा. पू. ख. २ ॥ २१ ॥

प्रकोपकगुणाः—वायु (तत्व) भूयिष्ठं लघुगुणं रूक्षगुणश्च। क्षितिसमीरणभूयिष्ठं वैशद्यगुणं तोयाकाशगुणभूयिष्ठं मृदुत्वम् ॥ सु. सू. ४१ ॥

ऋतुः—उत्तरमयनं शिशिरवसन्तग्रीष्माः। तेषु भगवानाप्याय्यतेऽर्कस्तिक्तकषायकटुकाश्च रसा बलवन्तो भवन्ति उत्तरोत्तरं सर्वप्राणिनां बलमुपहीयते ॥ सु. सू. । ६ ॥

तीक्ष्णांशुरतितीक्ष्णांशुर्ग्रीष्मे संक्षिपतीव यत्।

प्रत्यहं क्षीयते श्लेष्मा तेन वायुश्च वर्धते ॥ वा. सू. ३ । २७॥

ता एवौषधयो निदाघे निःसारा रूक्षा अतिमात्रं लघ्व्यो भवन्ति। आपश्च ता उपयुज्यमाना सूर्यप्रतापोपशोषितदेहानां देहिनां रौक्ष्याल्लघुत्वाद्वैशद्याच्च वायोः सञ्चयमापादयन्ति॥
सु. सू. ६॥

प्रक्लिन्नत्वाच्छरीराणां वर्षासु खलु देहिनाम्
मन्देऽग्नौ कोपमायान्ति संहर्षान्मारुतादयः॥ सु. उत्तर. ६॥
किंच—ग्रीष्मे संचीयते वायुः प्रावृट्काले प्रकुप्यति॥शा.पू.ख.७॥
अथ च—ग्रीष्माहोरात्रिभुक्तान्ते प्रकुप्यति समीरणः॥ वा. नि. १॥

देशः—आकाशसमः प्रविरल अल्पकण्टकिवृक्ष प्रायो ऽल्पवर्षप्रस्रवणोदकप्राय उष्णदारुणवातः प्रविरलाल्पशैलः स्थिरकृशशरीरमनुष्यप्रायो वातपित्तरोगभूयिष्ठश्च जाङ्गलः॥
सु.। सू.। ३५॥

किञ्च—जाङ्गलं वातभूयिष्ठम्॥ च. सू.। १॥

आयुः—
बाले विवर्धते श्लेष्मा मध्यमे पित्तमेव तु।
भूयिष्ठं वर्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत्॥ सु. सू. ३५॥

अपतर्पणम्—हीनमात्राहारराशिमशीतेर्वातविकाराणामायतनमाचक्षते॥ च. वि. २॥

किञ्च—धातुक्षयकरैः वायुः कुप्यत्यतिनिषेवितैः॥
वा. नि. १५।५॥

देहाग्निबलवर्णौजः शुक्रमांसबलक्षयः।
ज्वरः कासानुबन्धश्च पार्श्वशूलमरोचकः॥
श्रोत्रदौर्बल्यमुन्मादः प्रलापो हृदयव्यथा।
विण्मूत्रसंग्रहः शूलं जंघोरुत्रिकसंश्रयम्॥

पर्वास्थिसन्धिभेदश्च ये चान्ये वातजा गदाः ।
ऊर्ध्ववातादयः सर्वे जायन्ते ते ऽपतर्पणात् ॥

च. सू. २३ । १६ ॥

किञ्च—भोजनं हीनमात्रं तु न बलोपचयौजसे ।
सर्वेषां वातरोगाणां हेतुतां च प्रपद्यते ॥

वा. सू. ८ ३ ॥

किंगुणकं द्रव्यं वातप्रकोपकमित्याह—
लघूष्णतीक्ष्णविषदं रूक्षं सूक्ष्मं खरं सरम् ।
कठिनञ्चैव यद् द्रव्यं प्रायस्तल्लंघनं स्मृतम् ॥

च. सू. २२ । १२ ॥

अन्ये हेतवः-रूक्षशीताल्पलध्वन्नव्यवायातिप्रजागरैः ।
विषमादुपचाराच्च दोषासृक्स्रवणादति ॥
लंघनप्लवनात्यध्वव्यायामादिविचेष्टितैः ।
धातूनां संक्षयाच्चिन्ता शोकरोगाति कर्षणात् ॥
दुःखशय्यासनात्क्रोधाद्दिवास्वापाद्भयादपि ।
वेगसंधारणादामादभिघातादभोजनात् ॥
मर्माघाताद्गजोष्ट्राश्वशीघ्रयानावतंसनात् ।
देहे स्रोतांसि रिक्तानि पूरयित्वाऽनिलो बली ॥
करोति विविधान् व्याधीन् सर्वाङ्गैकाङ्गसंश्रितान् ॥

च. चि. २८॥

अथ च—तत्र बलवद्विग्रहाति व्यायाम-व्यवायाध्ययन-प्रपतन-प्रधावन-प्रपीडनाभिघात लंघन प्लवन-तरण-रात्रिजागरण-भारहरण-गजतुरंगरथपदातिचर्या-कटुकषायतिक्तरूक्षलघुशीतवीर्यशुष्कशाकवल्लूरवरकोद्दालककोरदूषश्यामाकनीवारमुद्गम-

सूराढकीहरेणुकलायनिष्पावानशनविषमाशनाध्यशनवातमूत्र-पुरीषशुक्रछर्दिक्षवथूद्गारवाष्पवेगविघातादिभिर्विशेषैः वायुः प्रकोपमापद्यते ।

सशीताभ्रप्रवातेषु घर्मान्ते च विशेषतः ।
प्रत्यूषस्य पराह्णे तु जीर्णेऽन्ने च प्रकुप्यति ॥सु० सू० २१॥

अथ च—यदा पुरुषो वातलो विशेषेण ज्वरवमनविरेचनातिसाराणामन्यतमेन कर्षितो वातलमाहारमाहरति शीतं वा विशेषेण, अतिमात्रास्नेहपूर्वं वा वमनविरेचने पिबति अनुदीर्णां वा छर्दिमुदीरयति, उदीर्णान् वातमूत्रपुरीषवेगान्निरुणद्धि अत्यशितो वा पिबति नवोदकमतिमात्रसंक्षोभिणा वा यानेन याति, अतिव्यवायव्यायाममद्यरुचि, र्वाऽभिघातमृच्छति वा विषमाशनशयनस्थानचंक्रमणसेवी वा भवति अन्यद्वा किञ्चिदेवंविधं वातिमात्रं व्यायामजातं वा प्रारभते तस्यापचाराद्वातः प्रकोपमापद्यते ॥ च. नि. ४ ॥

किञ्च—कामशोकभयाद्वायुः ॥ च. चि. ३ १११ ॥

अतएव—भयशोकध्यानाल्पाशनप्रभृतीभिरुपशोषितो रसधातुः शरीरमननुक्रामन् अल्पत्वान्न प्रीणयति तस्मादति कार्श्यं च भवति सोऽतिकृशः क्षुत्पिपासाशीतोष्णवातवर्षभारादानेषु असहिष्णुः वातरोगप्रायोऽल्पप्राणश्च क्रियासु भवति ॥ सु० सू० १५ ॥

वातप्रकोपलक्षणानि—

क्षीणो वा क्षुब्धो वा स्वीयप्राकृतकर्माण्यकुर्वाणः सर्वाङ्गैकाङ्गनैर्बल्यं जनयतीत्याह—प्रायो वृद्धिर्हि तर्पणात् ॥ २७ ॥

श्लेष्मणानुगतस्तस्मात् संज्ञयस्तद्विपर्ययात् ॥

वा० सू० ११-२८ ॥

वातक्षये मन्दचेष्टता अल्पवाक्त्वमल्पहर्षो मूढसंज्ञता च ॥

सु० सू० १५ ॥

वातवृद्धौ त्वक् पारुष्यं-कार्श्यं-कार्ष्ण्यं-गात्र स्फुरणमुष्णकामिता निद्रानाशो अल्पबलत्वं गाढवर्चस्त्वञ्च भवति ॥सु सू१५॥

किञ्च—कुपितस्तु खलु शरीरे शरीरं नानाविधविकारैरुपतपति । बलवर्णसुखायुषामुपघाताय मनो व्यावर्तयति सर्वेन्द्रियाण्युपहन्ति । विनिहन्ति गर्भान् विकृतिमापादयति, अतिकालं धारयति, भयशोकदैन्यातिप्रलापाञ्जनयति प्राणांश्चोपरुणद्धि ॥ च० सू० १२ । ८ ॥

लिङ्गानां दर्शनं स्वेषामस्वास्थ्यं रोगसंभव इति ॥

प्रकोपलक्षणानुसारं यत्र तत्र शरीरे स्वगुणांश्च दर्शयति-तद् यथा रौक्ष्यं लाघवं शैत्यं गतिरमूर्तत्वञ्चेति वायोरात्मरूपाणि। एवं विधत्वाच्च कर्मणश्च स्वलक्षणमिदमस्य भवति तं तं शरीरावयवमाविशतः स्रंसभ्रंशव्यासाङ्गभेदसादहर्षतर्ष-आवर्तमर्दकम्पचालतोदव्यथवेष्टभङ्गाद्यास्तथा खरपरुषविशदसुषिरतारुणकषायमुखशोषशूलसुप्तिसंकुचनस्तम्भनखञ्जतादीनि वायोः कर्माणि । तैरन्वितं वात विकारमेवाध्यवस्येत् ॥

च० सू० २० । १४ ॥

संकोचः पर्वणां स्तम्भो भेदोऽस्थिपर्वणामपि ।
लोमहर्षः प्रलापश्च पाणिपृष्ठशिरोग्रहः ॥
खाञ्ज्यपाङ्गुल्यकुब्जत्वं शोषोऽङ्गानामनिद्रताः ।
गर्भशुक्ररजोनाशः स्पन्दनं गात्रसुप्तता ॥

शिरो नासाक्षिजत्रूणां ग्रीवायाश्चापि हुण्डनम् ।
भेदस्तोदार्तिराक्षेपो मोहश्चायास एव च ॥
एवं विधानि रूपाणि करोति कुपितोऽनिलः ।
हेतुस्थानविशेषाच्च भवेद्रोगविशेषकृत् ॥ च० चि० २८ ॥

तद्यथा—

नखभेदश्च विपादिका च पादशूलं च पादभ्रंशश्च सुप्तपादता च वातखुड्डता च गुल्फग्रहश्च पिण्डिकोद्वेष्टनं च गृध्रसी च जानुभेदश्च जानुविश्लेषश्च उरुस्तम्भश्च उरुसादश्च पाङ्गुल्यश्च गुदभ्रंशश्च गुदार्तिश्च वृषणोत्क्षेपश्च शेफस्तम्भश्च वंक्षणानाहश्च श्रोणिभेदश्च विड्भेदश्च उदावर्तश्च खञ्जत्वं च कुब्जत्वं च वामनत्वं च त्रिकग्रहश्च पृष्ठग्रहश्च पार्श्वमर्दश्च उदरवेष्टश्च हृन्मोहश्च हृद्द्रवश्च वक्ष उपरोधश्च वक्ष उद्धर्षश्च बाहुशोषश्च ग्रीवास्तम्भश्च मन्यास्तम्भश्च कण्ठोध्वंसश्च हनुस्तम्भश्च ओष्ठभेदश्चदन्तभेदश्च दन्तशैथिल्यं च मूकत्वं च वाक्संगश्च कषायास्यता च मुखशोषश्च अरसज्ञता च घ्राणनाशश्च कर्णशूलं च अशब्दश्रवणं च उच्चैः श्रुतिश्च बाधिर्यं च वर्त्मस्तम्भश्च वर्त्मसङ्कोचश्च तिमिरश्च अक्षिशूलं च अक्षिव्युदासश्च भ्रूव्युदासश्च शङ्खभेदश्चललाटभेदश्च शिरोरुक् च केशभूमिस्फुटनं च अर्दितं च एकाङ्गरोगश्च सर्वाङ्गरोगश्च पक्षवधश्च आक्षेपकश्च दण्डकश्च श्रमश्च भ्रमश्च वेपथुश्च जृम्भा च विषादश्चातिप्रलापश्च ग्लानिश्च रौक्ष्यं च पारुष्यं च श्यावारुणावभासता च अस्वप्नश्च अनवस्थितत्वं चेत्यशीतिर्वातविकाराः ।

वातविकाराणामपरिसंख्येयानामाविष्कृततमा व्याख्याताः। सर्वेष्वपि खल्वेतेषु वातविकारेष्वन्येषु चानुक्तेषु वायो-

रिदमात्मरूपमपरिणामि कर्मणश्च स्वलक्षणं यदुपलभ्य तद-वयवं वा विमुक्तसन्देहा वातविकारमेवाध्यवस्यन्ति कुशलाः ॥ च. सू. २० । १२ ॥

किंच—वातः शूलानाहाङ्गमर्दशोषमूर्छामदभ्रमाग्निवैषम्य-शिरासङ्कोचनस्तम्भनानि करोति ॥ च. नि. २॥

अथ स्थानभेदेन लक्षणभेदानाह—

अग्नौ—अग्निरन्नस्य पाचको वायुना विषमो भवति । यः कदाचित् सम्यक् पचति कदाचिदाध्मानशूलोदावर्ततातिसारजठरगौरवान्त्रकूजनप्रवाहणानि कृत्वा स विषमः॥ सु० सू. ३५ ।

वातलानां तु वाताऽभिभूतेऽस्याधिष्ठाने विषमा भवन्त्यग्नयः ॥ च. चि. १६ ॥

शिरसि—

दुर्बलं चेतसः स्थानं यदा वायुः प्रपद्यते ।

मनो विक्षोभयजन्तोः संज्ञां सम्मोहयेत्तदा ॥ च. सू. २४ ॥

किञ्च—वायुरूर्ध्वं व्रजेत् स्थानात् कुपितो हृदयं शिरः ।

शङ्खौ च पीडयत्यङ्गान्याक्षिपेन्नमयेच्च सः ॥

निमीलिताक्षो निश्चेष्टः स्तब्धाक्षो वापि कूजति ।

निरुछ्वासोऽथवा कृच्छ्रादुच्छ्वस्यात् नष्टचेतनः ॥

स्वस्थः स्यात् हृदये मुक्ते आवृते च प्रमुह्यति ।

कफान्वितेन वातेन ज्ञेय एषोऽपतन्त्रकः ॥ सु. नि. । १॥

अत्युपक्षीणदेहानां व्याधिवेगसमुद्भ्रमितानामुपहतमनसां वा कामक्रोधलोभहर्षभयशोकचिन्तोद्वेगादिभिः पुनरभिघाताभिहतानां वा मनस्युपहते बुद्धौ च प्रचलितायाः

मभ्युदीर्णा दोषाः प्रकुपिता हृदयमुपसृत्य मनोवहानि स्रोतांस्यावृत्य जनयन्त्युन्मादम्। उन्मादे पुनः मनोबुद्धिसंज्ञाज्ञानस्मृतिभक्तिशीलचेष्टाहारविभ्रमं विद्यात्। च० चि० ७-३, ४।

किञ्च—अत्युपक्षीणदेहानां वा दोषाः प्रकुपिताः रजस्तमोभ्यामुपहतचेतसामन्तरात्मनः श्रेष्ठतममायतनं हृदयमुपसृत्य पर्यवतिष्ठन्ते तथेन्द्रियायतनानि। तत्र चावस्थिताः सन्तो यदा हृदयमिन्द्रियायतनानि चेरिताः कामक्रोधभयलोभमोहहर्षशोकचिन्तोद्वेगादिभिर्भूयः सहसाऽभिपूरयन्ति तदा जन्तुरपस्मरति। अपस्मारं पुनः स्मृतिबुद्धिसत्वसंप्लवात् आवस्थिकं तमः प्रवेशमाचक्षते।

किञ्च—

क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः।
वेगाघातादभीघाताद्धीनसत्वस्य वा पुनः॥
करणायतनेषूग्रा बाह्येष्वाभ्यन्तरेषु च
निविशन्ते यदा दोषास्तदा मूर्छन्ति मानवाः॥ सु. उत्तर.४६।

शिर आदिमर्मसु—

भ्रमः प्रलापः पतनं प्रमोहो विचेष्टनं संलयनोष्णता च।
स्रस्ताङ्गता मूर्च्छनमूर्ध्ववातस्तीव्रा रुजो वातकृताश्च तास्ताः॥
मांसोदकाभं रुधिरं च गच्छेत् सर्वेन्द्रियार्थोपरमस्तथैव।
दशार्धसंख्येष्वपि हि क्षतेषु सामान्यतो मर्मसु लिङ्गमुक्तम्॥
सु० सू० २६।

नाडीषु—

यदा तु कुपितो वायुः स्वाः शिराः प्रतिपद्यते।
तदाऽस्य विविधा रोगाः जायन्ते वातसंभवाः॥ सु० शा० ७।

यदा तु धमनीः सर्वाः कुपितोऽभ्येति मारुतः
तदाक्षिपत्याशु मुहुर्मुहुर्देहं मुहुश्चरः
मुहुर्मुहुस्तदाक्षेपादाक्षेपक इति स्मृतः ॥
कफान्वितो भृशं वायुस्तास्वेव परितिष्ठति
स दण्डवत् स्तम्भयति कृच्छ्रो दण्डापतानकः ।
हनुग्रहस्तदात्यर्थं सोऽन्नं कृच्छ्रान्निषेवते ॥
धनुस्तुल्यं नमेद्यस्तु स धनुस्तम्भसंज्ञकः
अंगुलीगुल्फजठरं हृद्वक्षोगलसंश्रितः
स्नायुप्रतानमनिलो यदा क्षिपति वेगवान्
विष्टब्धाक्षः स्तब्धहनुर्भग्नपार्श्वः कफं वमन् ॥
अभ्यन्तरं धनुरिव यदा नमति मानवः ।
तदा सोऽभ्यन्तरायामं कुरुते मारुतो बली ॥
बाह्यस्नायुप्रतानस्थो बाह्यायामं करोति च
कफपित्तान्वितो वायुर्वायुरेव च केवलः
कुर्यादाक्षेपकं त्वन्यं चतुर्थमभिघातजम् ॥
अधोगमाः सतिर्यग्गा धमनीरूर्ध्वदेहगाः
यदा प्रकुपितोऽत्यर्थं मातरिश्वा प्रपद्यते
तदान्यतरपक्षस्य सन्धिबन्धान्विमोक्षयन्
हन्ति पक्षं तमाहुर्हि पक्षाघातं भिषग्वराः ॥
यस्य कृत्स्नं शरीरार्धमकर्मण्यमचेतनम्
ततः पतत्यसून् वापि जहात्यनिलपीडितः
शुद्धवातहतं पक्षं कृच्छ्रसाध्यतमं विदुः
साध्यमन्येन संसृष्टमसाध्यं क्षयहेतुकम् । सु० नि० १ ।

इन्द्रियादिषु—

श्रोत्रादिष्विन्द्रियवधं कुर्यात् क्रुद्धः समीरणः॥

तथाहि—यदा शब्दवहं स्रोतो वायुरावृत्य तिष्ठति

शुद्धः श्लेष्मान्वितो वापि बाधिर्यं तेन जायते।

किञ्च—

आवृत्य सकफो वायुर्धमनीः शब्दवाहिनीः

नरान्करोत्यक्रियकान् मूकमिन्मिणगद्गदान्।

कट्याम्—

वायुः कट्यां स्थितः सक्थ्नः कण्डरामाक्षिपेद्यदा

खञ्जस्तदा भवेज्जन्तुः पङ्गुः सक्थ्नोर्द्वयोर्वधात्।

प्रक्रामन्वेपते यस्तु खञ्जन्निव च गच्छति

कलायखञ्जं तं विद्यात् मुक्तसन्धिप्रबन्धनम्। सु० नि० १।

श्वासवाहिनीषु—

मारुतः प्राणवाहीनि स्रोतांस्याविश्य कुप्यति।

उरःस्थः कफमुद्धूय हिक्काश्वासान्करोति सः॥ च. चि.२१।

कण्ठे—

स्वरभेदो भवेद् वाताद्रूक्षः क्षामश्चलः स्वरः। च. चि. ८।

आमाशये—

वायुरामाशये क्रुद्धः छर्द्यादीन् कुरुते गदान्। च.

पक्वाशये—

पक्वाशयस्थोऽन्त्रकूजं शूलाटोपौ करोति च।

कृच्छ्रमूत्रपुरीषत्वमानाहं त्रिकवेदनाम्॥ च. चि. २८।

मूत्राशये—

मूत्राप्रवृत्तिराध्मानं वस्तौ मूत्रावृतेऽनिले। च. चि.

मूत्रमार्गे—

तीव्रा हि रुग्वंक्षणबस्तिमेढ्रे स्वल्पं मुहुर्मूत्रयतीह वातात्।

मलाशये—

वर्चो वृते विबन्धोऽधः स्वे स्थाने परिकृन्तति

चिरात्पीडितमन्येन दुःखं शुष्कं शकृत्सृजेत्। च. चि.।

हृदि—

आयम्यते मारुतजे हृदयं तुद्यते तथा। मा. नि.

त्वचि—

त्वग्रूक्षा स्फुटिता सुप्ता कृशा कृष्णा च तुद्यते। च. चि. २८।२६।

सर्वधातुषु—

वायुः प्रकुपितः तथात्मके शरीरे विसर्पन्यदा वसामादाय मूत्रवहानि स्रोतांसि प्रतिपद्यते तदा वसामेहं, यदा पुनर्मज्जानं मूत्रवस्तावकर्षति तदा मज्जमेहं, यदा लसीकां मूत्राशयेऽभिवहन्मूत्रमनुबध्नन्श्च्योतयति लसीकातिबहुत्वाद्विक्षेपणाच्च वायोः खल्वस्यातिमूत्रप्रवृत्तिसङ्गं करोति। ओजः पुनर्मधुरस्वभावं तद्यदा रौक्ष्याद्वायुः कषायत्वेनाभिसंसृज्य मूत्राशयेऽभिवहति तदा मधुमेहं करोति। च. नि. ४—३७।

तैरावृतः प्रसादं हि गृहीत्वा याति मारुतः।

यदा वस्तिं तदा कृच्छ्रो मधुमेहः प्रवर्त्तते॥ च. सू. १०।

रक्ते—

तत्र फेनिलमरुणं कृष्णं परुषं तनु शीघ्रगमस्कन्दि च वातेन दुष्टं रक्तम्। सु. सू. १४।

किञ्च—

रुजस्तीव्राः ससन्तापा वैवर्ण्यं कृशताऽरुचिः

गात्रे चारूंषि भुक्तस्य स्तम्भाश्चासृग्गतेऽनिले। च. चि. २८।

किञ्च—

अरुणाभं भवेद्वातात्पिच्छिलं फेनिलं तनु । च. सू. २४ ।

किञ्च—

रक्तावृते सदाहार्तिस्त्वङ्मांसान्तरजो भृशम्

भवेत्सरागः श्वयथुर्जायन्ते मण्डलानि च ॥ च. चि. २८ ।

मांसे—

गुर्वङ्गं तुद्यतेऽत्यर्थं दण्डमुष्टिहतं यथा

सरुक् श्रमितमत्यर्थं मांसमेदोगतेऽनिले ॥ च. चि. २८ ।

अस्थिसन्धिस्नायुमज्जादिषु—

अस्थिशोषं च भेदञ्च कुर्याच्छूलं च तत्स्थितः ॥ सु. नि. १।

किञ्च—

स्पर्शमस्थ्यावृते तूष्णं पीडनं चाभिनन्दति

संभज्यते सीदति च सूचीभिरिव तुद्यते । च. चि. २८

तथा मज्जगते रुक् च न कदाचित् प्रशाम्यति ॥ सु. नि. १।

स्नायुप्राप्तः स्तम्भकम्पौ शूलमाक्षेपणं तथा ॥

हन्ति सन्धिगतः सन्धीन् शूलशोफौ करोति च ॥

शुक्रे—

अप्रवृत्तिः प्रवृत्तिर्वा विकृतिः शुक्रगेऽनिले ॥ सु. नि. १ ।

किञ्च—

फेनिलं तनु रूक्षं च कृच्छ्रेणाल्पं च मारुतात्

भवत्युपहतं शुक्रं न तद्गर्भाय कल्पते ॥ च. चि. ३० । १४० ।

गर्भे—

वाताभिपन्नः शुष्यति गर्भः ॥ सु. शा. १० ।

किञ्च—

क्षिप्रं मुञ्चति बध्नाति शुक्रं गर्भमथापि वा । च. चि. २८-३३

क्षीरे—

वैरस्यं फेनसंघातं रौक्ष्यं चेत्यनिलात्मके । च. चि. ३० ।

किञ्च—

श्यावारुणवर्णं कषायानुरसं विशदमनतिलक्ष्यगन्धं रूक्षं द्रवं फेनिलं लघु अतृप्तिकरं कर्षणं वातविकाराणां कर्तृ वातोपसृष्टं क्षीरमभिज्ञेयम् ॥ च. शा. ८ ॥ तेन क्षामस्वरो बालो

बद्धविण्मूत्रमारुतः ।
वातिकं शीर्षरोगं वा पीनसं वाधिगच्छति ।
रूक्षं तु पिबतो रौक्ष्याद्बलह्रासश्च जायते ।

योन्याम्—

वातलाहारचेष्टायाः वातलायाः समीरणः
विवृद्धो योनिमाश्रित्य योनेस्तोदं सवेदनम् ॥ ६ ॥
स्तम्भं पिपालिकासृप्तिमिव कर्कशतां तथा
करोति सुप्तिमायासं वातजांश्चा परान् गदान् ॥
सास्यात्सशब्दरुक् फेन तनुरूक्षार्तवा निलात् ॥

च. चि. ३०-१० ।

उदरे—

वातकोपिभिराहारैः शीततोयावगाहनैः
धारणै रणभाराध्वविषमाङ्गप्रवर्त्तनैः
क्षोभणैः क्षोभितोऽन्यैश्च क्षुद्रान्त्रावयवं यदा
पवनो विगुणीकृत्य स्वनिवेशादधो नयेत्
कुर्याद्वंक्षणसन्धिस्थो ग्रन्थ्याभं श्वयथुं तदा ॥ मा. नि. ।

मुखे—

मुखामये मारुतजे तु शोषकार्कश्यरौक्ष्याणि चला रुजश्च ।

कृष्णारुणं निष्पतनं सशीतं प्रस्रंस्रनस्पन्दनतोदभेदाः ॥
च. चि. २८।

ओष्ठयोः—

कर्कशौ परुषौ स्तब्धौ कृष्णौ तीव्ररुगन्वितौ ।
दाल्येते परिपाट्येते ओष्ठौ मारुतकोपतः ॥ सु. नि. १६ ।

दन्तेषु—

मारुतेनाधिको दन्तो जायते तीव्रवेदनः ।

तथा—

दाल्यन्ते बहुधा दन्ता यस्मिन् तीव्ररुगन्विताः ।
दालनः स इति ज्ञेयः सदागतिनिमित्तजः ॥
कृष्णः छिद्री चलः स्रावी ससंरम्भो महारुजः ।
अनिमित्तरुजो वातात् विज्ञेयः कृमिदन्तकः ॥
दशनाः शीतमुष्णं च सहन्ते स्पर्शनं न च ।
यस्य तं दन्तहर्षं तु व्याधिं विद्यात् समीरणात् ॥

हनुसन्धौ—

वातेन तैस्तैर्भावैस्तु हनुसन्धिर्विसंहतः
हनुमोक्ष इति ज्ञेयो व्याधिरर्दितलक्षणः ॥ सु. नि. १६ ।

नेत्रयोः—

अल्पास्रुरागाऽनुपदेहता च प्रस्पन्दतोदार्तिरुजश्च वातात् ॥
च. चि. २८।

जिह्वायाम्—

जिह्वानिलेन स्फुटिता प्रसुप्ता भवेच्च शाकच्छदनप्रकाशा ।

कर्णयोः—

नादोऽतिरुक्कर्णमलस्य शोषः स्रावस्तनुश्चाश्रवणं च वातात् ॥
च. चि. २६

सर्वाङ्गे-सर्वाङ्गकुपिते वाते गात्रस्फुरणभञ्जनम् ।
वेदनाभिः परीतश्च स्फुटन्तीवास्य संधयः
ग्रहो विण्मूत्रवातानां शूलाध्मानाश्मशर्कराः । च. चि. २८

पंच वातानां पृथक् २ प्रकोपलक्षणानि—

तद्यथा—

विशेषाज्जीवितं प्राणे उदाने संश्रितं बलम् ।
स्यात्तयोः पीडनाद्धानिः आयुषश्च बलस्य च ॥ च. चि. २८।

समानः—

गुल्माग्निसंगातीसारप्रभृतीन्कुरुते गदान् ॥ च. चि. २८।

व्यानोऽपि—

क्रुद्धश्च कुरुते रोगान् प्रायशः सर्वदेहगान् ।

अपानोऽपि—

क्रुद्धश्च कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् ।

किञ्च-शुक्रदोषप्रमेहास्तु व्यानापानप्रकोपजाः ॥ सु. नि. १ ।

दाहकृत्तेजसा युक्तः शीतकृत्सोमसंश्रयादिति सिद्धान्तानुसारं पित्तसंयुक्ते कफसंयुक्ते च लक्षणान्याह—

लिङ्गं पित्तावृते दाहस्तृष्णा शूलं भ्रमः क्लमः
कट्वम्ललवणोष्णैश्च विदाहः शीतकामिता ।
शीतगौरवशूलानि कट्वाद्युपशयोऽधिकम्
लंघनायासरूक्षोष्णकामिता च कफावृते ॥ च. चि. २८।

अतएव—

वातपित्तात्मकः शीतमुष्णं वातकफात्मकः (इच्छति) । च. चि. २

पंच वातेषु पृथक् २ पित्तकफसंयुक्तेषु कानि लक्षणानीत्याह—

प्राणे पित्तसंयुक्ते—

प्राणे कफावृते—

ष्ठीवनं क्षवथूद्गारनिःश्वासोच्छ्वाससंग्रहः
प्राणे कफावृते रूपाण्यरुचिच्छर्दिरेव च ॥

किञ्च-आवृतं श्लेष्मपित्ताभ्यां प्राणं चोदानमेव च।
गरीयस्त्वेन पश्यन्ति भिषजः शास्त्रचक्षुषः।

यतोहि-विशेषाज्जीवितं प्राणे उदाने संश्रितं बलम् ॥

उदाने पित्तसंयुक्ते—

मूर्च्छाद्यानि च रूपाणि दाहो नाभ्युरसोः क्लमः।
ओजोभ्रंशश्च सादश्चाप्युदाने पित्तसंवृते ॥

उदाने कफसंयुक्ते—

आवृते श्लेष्मणोदाने वैवर्ण्यं वाक्स्वरग्रहः।
दौर्बल्यं गुरुगात्रत्वमरुचिश्चोपजायते ॥

समाने पित्तसंयुक्ते—

अतिस्वेदस्तृषा दाहो मूर्च्छा चारुचिरेव च।
पित्तावृते समाने स्यादुपघातस्तथोष्मणः ॥

कफसंयुक्ते—

अस्वेदो वह्निमांद्यश्च लोमहर्षस्तथैव च।
कफावृते समाने स्याद् गात्राणाञ्चातिशीतता ॥

व्याने पितसंयुक्ते—

व्याने पित्तावृते तु स्याद्दाहः सर्वाङ्गगः क्लमः।
गात्रविक्षेपसङ्गश्च ससंतापः सवेदनः ॥

कफावृते—

गुरुता सर्वगात्राणां सर्वसन्ध्यस्थिजा रुजः।
व्याने कफावृते लिङ्गं गतिसङ्गस्तथाधिकः ॥

अपाने पित्तावृते—

हारिद्रमूत्रवर्चस्त्वं तापश्च गुदमेढ्रयोः ।
लिङ्गं पित्तावृतेऽपाने रजसः संप्रवर्त्तनम् ॥

कफसंयुक्ते—

भिन्नामश्लेष्मसंसृष्टगुरुवर्चः प्रवर्त्तनम् ।
श्लेष्मणा संवृतेऽपाने कफमेहस्य चागमः ॥ च० चि० २८

जन्मनैव वातप्रकोपलक्षणान्याधिकानि स्युर्वातप्रकृतिर्वा स्यात्तस्य प्रकृतिः कथमुत्पद्यते कानि च लक्षणानि विशेषेण भवन्तीत्याह—

शुक्रशोणितप्रकृतिं कालगर्भाशयप्रकृतिं मातुराहारविहारप्रकृतिं महाभूतविकारप्रकृतिञ्च गर्भशरीरमपेक्षते । एता हि येन येन दोषेणाधिकतमेन, एकेनानेकतमेन वा समनुबध्यन्ते तेन तेन दोषेण गर्भोऽनुबध्यते । ततः सा सा दोषप्रकृतिरुच्यते मनुष्याणां गर्भादिप्रवृत्ता । च. वि- ८

किञ्च—शुक्रशोणितसंयोगे यो भवेद् दोष उत्कटः ।
प्रकृतिर्जायते तेन—सु. शा. ४ ।

वातस्तु रूक्षलघुचलबहुशीघ्रशीतपरुषविषदस्तस्य रौक्ष्याद्वातला रूक्षापचितात्पशरीराः प्रततरूक्षक्षामभिन्नमन्दसक्तजर्जरस्वराः, जागरूकाश्च, लघुत्वाच्च लघुचपलगतिचेष्टाहाराः, चलत्वादनवस्थितसन्ध्यस्थिभ्रूहन्वोष्ठजिह्वाशिरःस्कन्धपाणिपादाः, बहुत्वाद्बहुप्रलापकण्डरासिराप्रतानाः, शीघ्रत्वाच्छीघ्रसमारम्भलोभविकाराः, शीघ्रोत्त्रासरागविरागाः, श्रुतग्राहिणोऽल्पस्मृतयश्च, शैत्याच्छीतासहिष्णवः, प्रततशीत-

कोद्वेपकस्तम्भाः, पारुष्यात्परुषकेशश्मश्रुरोमनखदशनवदन-पाणिपादाङ्गाः, वैशद्यात्स्फुटिताङ्गावयवाः, सततसंधिशब्द-गामिनश्च भवन्ति त एवं गुणयोगाद् वातलाः प्रायेणाल्पबला-श्चाल्पायुषश्चाल्पापत्याश्चाल्पसाधनाश्चाधन्याश्च भवन्ति ॥ च. वि. ८। १०० ॥

किञ्च—तत्र जागरूकः शीतद्वेषी दुर्भगः स्तेयो मत्सरी अनार्यो गान्धर्वचित्तः स्फुटितकरचरणोऽतिरूक्षश्मश्रुनख-केशः क्रोधी, दन्तनखखादी च भवति।

किञ्च—

अधृतिरदृढसौहृदः कृतघ्नः। कृशपरुषो धमनीततः प्रलापी ॥
द्रुतगतिरटनोऽनवस्थितात्मा। वियदपि गच्छति सम्भ्रमेण सुप्तः॥

अनवस्थितमतिश्चलदृष्टिर्मन्दरत्नधनसंचयमित्रः।
किञ्चिदेव विलपत्यनिबद्धं मारुतप्रकृतिरेष मनुष्यः।
सु. शा. ४।

किञ्च—अल्पकेशः कृशो रूक्षो वाचालश्चलमानसः।
आकाशचारी स्वप्नेषु वातप्रकृतिको नरः ॥ शा. पू. ख. ।६॥

किञ्च—वातलस्य प्रकोपणोक्तान्यासेवमानस्य क्षिप्रं वातः प्रकोपमापद्यते ततश्चेतरौ। स तस्य प्रकोपमापन्नो यथोक्तैर्वि-कारैः शरीरमुपतपति बलवर्णसुखायुषामुपघाताय। च. सू. ७।

किञ्च—वातलस्य वातनिमित्तजा व्याधयः प्रायेण बलवन्तो भवन्ति। च०। वि.। ६ ॥

वातप्रकोपशामक चिकित्सा—

रूक्षः शीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः।
विपरीतगुणैर्द्रव्यैः मारुतः संप्रशाम्यति॥ च० सू० १।

तादृश द्रव्याणि:-भूतेजोवारिजैर्द्रव्यैः शमं याति समीरणः। सु० सू० ४१

किंगुणं द्रव्यं पार्थिवमित्याह—तत्र स्थूलसारसान्द्रमन्दस्थिरखरगुरुकठिनमीषत्कषायं प्रायशो मधुरमिति पार्थिवम्। तत् स्थैर्यबलसंधानोपचयकरम्। सु० सू० ४१।

किंगुणमाप्यश्चाह—शीतस्तिमितस्निग्धमन्दगुरुसारसान्द्रमृदुपिच्छिलगुणबहुलमीषत्कषायाम्ललवणं मधुररसप्रायमाप्यं तत् स्नेहनप्रह्लादनक्लेदनबन्धनाविष्यन्दनकरमिति। सु० सू० ४१।

रसाः—तत्र मधुराम्ललवणा वातघ्नाः। सु० सू० ४१।

भूम्यम्बुगुणबाहुल्यान्मधुरो रसः। सु० सू० ४१।

मधुरो रसः शरीरसात्म्याद्रसरुधिरमांसमेदोऽस्थिमज्जौजःशुक्राभिवर्धन आयुष्यः षडिन्द्रियप्रसादनो बलवर्णकरः पित्तविषमारुतघ्नः तृष्णाप्रशमनः त्वच्यः केश्यः कण्ठ्यः प्रीणनो जीवनस्तर्पणः स्नेहनः स्थैर्यकरः क्षीणक्षतसन्धानकरो घ्राणमुखकण्ठोष्ठतालुप्रह्लादनो दाहमूर्छाप्रशमनः स्निग्धः शीतो गुरुश्च। भूम्यग्निगुणबाहुल्यादम्लः। सु० सू० ४१।

अम्लो रसो भक्तं रोचयति अग्निं दीपयति देहं बृंहयति जर्जरयति मनो बोधयति इन्द्रियाणि दृढीकरोति बलं वर्धयति वातमनुलोमयति हृदयं तर्पयति आस्यं संस्रावयति भुक्तमपकर्षयति क्लेदं जनयति प्रीणयति लघुरुष्णः स्निग्धश्च। तोयाग्निगुणबाहुल्याल्लवणः। सु० सू० ४१।

लवणो रसः पाचनः क्लेदनो दीपनश्च्यावनश्छेदनो भेदनः तीक्ष्णः सरो विकास्यधःस्रंसी अवकाशकरो वातहरः स्तम्भ-

बन्धसंघातविधमनः सर्वरसप्रत्यनीकभूत आस्यं विस्रावयति कफं विष्यन्दयति मार्गान् विशोधयति सर्वशरीरावयवान् मृदु करोति रोचयत्याहारमाहारयोगी चात्यर्थं गुरुः स्निग्ध उष्णश्च।

किञ्च—मधुराम्ललवणा स्निग्धा गुरवश्च। सु० सू० ४२।

गुणाः—पृथ्वीसोमगुणबहुलानि गुरूणि। च० सू० ५।

शीतपिच्छिलावम्बुगुणभूयिष्ठौ। सु० सू० ४१।

पृथिव्यम्बुगुणभूयिष्ठः स्नेहः। सु० सू० ४१।

विपाकः—द्रव्येषु पच्यमानेषु येष्वम्बुपृथिवीगुणाः।

निर्वर्तन्तेऽधिकास्तत्र पाको मधुर उच्यते॥

पाकश्च मधुराख्यो गुरुः। सु० सू० ४०।

रसगुणयोर्विरोधे गुणा बलवत्तरा अतश्चाह—उष्णं शीतं स्निग्धं रूक्षं विशदं पिच्छिलं मृदु तीक्ष्णं चेत्येतानि वीर्याणि स्वबलगुणोत्कर्षाद्रसमभिभूयात्मकर्म कुर्वन्ति। यथा तावन्महत्पंचमूलं कषायं तिक्तानुरसं वातं शमयेदुष्णवीर्यत्वात्। तथा कुलत्थः कषायः कटुकः पलाण्डुः स्नेहभावाच्च वातं शमयेत्। सु० सू० ४०।

अतएव—ये रसा वातशमना भवन्ति यदि तेषु वै।
रौक्ष्यलाघवशैत्यानि न ते हन्युः समीरणम्। सु० सू० ४०।

वातप्रकोपस्य सामान्यचिकित्सामाह—

क्रियामतः परं सिद्धां वातरोगापहां शृणु॥ ७४॥
केवलं निरुपष्टम्भमादौ स्नेहैरुपाचरेत्।
वायुं सर्पिर्वसातैलमज्जपानैर्नरं ततः॥ ७५॥
स्नेहक्लान्तं समाश्वास्य पयोभिः स्नेहयेत्पुनः।

यूषैर्ग्राम्याम्बुजानूपै रसैर्वा स्नेहसंयुतैः ॥ ७६ ॥
पायसैः कृशरैरम्ललवणैः सानुवासनैः ।
नावनैस्तर्पणैश्चान्नैः सुस्निग्धं स्वेदयेत्ततः ॥७७॥
स्नेहाक्तं स्विन्नमङ्गं तु वक्रं स्तब्धमथापि वा ।
शनैर्नमयितुं शक्यं यथेष्टं शुष्कदारुवत् ॥ ७८ ॥
हर्षतोदरुगायासशोथस्तम्भग्रहादयः ।
स्विन्नस्याशु प्रशाम्यन्ति मार्दवं चोपजायते ॥ ८० ॥
स्नेहश्च धातून् संशुष्कान् पुष्णात्याशु प्रयोजितः ।
बलमग्निबलं पुष्टिं प्राणांश्चाप्यभिवर्धयेत् ॥ ८१ ॥
असकृत्तं पुनः स्नेहैः स्वेदैश्चाप्युपपादयेत् ।
तथा स्नेहमृदौ कोष्ठे न तिष्ठन्त्यनिलामयाः ॥ ८२ ॥
यद्यनेन सदोषत्वात्कर्मणा न प्रशाम्यति ।
मृदुभिः स्नेहसंयुक्तैरौषधैस्तं विशोधयेत् ॥ ८३ ॥
घृतं तिल्वकसिद्धं वा सातलासिद्धमेव वा ।
पयसैरण्डतैलं वा पिबेद्दोषहरं शिवम् ॥ ८४ ॥
स्निग्धाम्ललवणोष्णाद्यैराहारैर्हि मलश्चितः ।
स्रोतो बद्ध्वाऽनिलं रुन्ध्यात्तस्मात्तमनुलोमयेत् ॥ ८५ ॥
दुर्बलो योऽविरेच्यः स्यात्तं निरूहैरुपाचरेत् ।
पाचनैर्दीपनीयैर्वा भोजनैस्तद्युतैर्नरम् ॥ ८६ ॥
संशुद्धस्योत्थिते चाग्नौ स्नेहस्वेदौ पुनर्हितौ ।
स्वाद्वम्ललवणस्निग्धैराहारैः सततं पुनः । च० चि० २८।८७॥

किञ्च—स्नेहः स्वेदस्तथाऽभ्यङ्गो वस्तिः स्नेहविरेचनम् ।
शिरोवस्तिः शिरःस्नेहो धूमः स्नैहिक एव च ।
सुखोष्णः स्नेहगण्डूषो नस्यं स्नैहिकमेव च । सु० चि० ४।

रसाः पयांसि भोज्यानि स्वाद्वम्ललवणानि च ।
बृंहणं यच्च तत्सर्वं प्रशस्तं वातरोगिणाम् ॥ च० चि० । २८।
सुखोष्णश्च परीषेकस्तथा संवाहनानि च ।
कुंकुमागुरुपत्राणि कुष्ठैलातगराणि च ।
कौशेयौर्णकरोमाणि कार्पासानि गुरूणि च
निवातातपयुक्तानि (तथा गर्भगृहाणि च) गुरुप्रावरणानि च
मृद्वी शय्याग्निसन्तापो ब्रह्मचर्यं तथैव च ।
समासेनैवमादीनि योज्यान्यनिलरोगिषु ॥ सु० चि० ४

किञ्च—संवाहनावपीडनवित्रासन विस्मापन विस्मारणानि सुरासव विधानं, स्नेहाश्चानेकयोनयो दीपनीयपाचनीयवातहर-विरेचनीयोपहिताः, तथा शतपाकाः सहस्रपाकाः सर्वशश्च प्रयोगार्था वस्तयो वस्तिनियमः सुखशीलता चेति । च० वि० ६ । १४।

किञ्च-आस्थापनानुवासनं तु खलु सर्वोपक्रमेभ्यो वाते प्रधानतमं मन्यन्ते भिषजः तद्ध्यादित एव पक्वाशयमनुप्रविश्य केवलं वैकारिकं वातमूलं छिनत्ति तत्रावजिते वातेऽपि शरीरान्तिर्गता वातविकाराः प्रशान्तिमापद्यन्ते । च० सू० २० । १३

किञ्च-बृंहयेत् व्याधिभैषज्यमद्यस्त्रीशोककर्षितान् ।
भाराध्वोरःक्षतक्षीणरूक्षदुर्बलवातलान् ।
मांसक्षीरसितासर्पिर्मधुरस्निग्धवस्तिभिः ॥
स्वप्नशय्यासुखाभ्यङ्गस्नाननिर्वृत्तिहर्षणैः ॥ वा० । सू० १४ ।

किञ्च–तैलं वातश्लेष्मप्रशमनानां श्रेष्ठम् । च० सू० २५।

तैलं स्नेहौष्ण्याद् गौरवोपपन्नत्वात् वातं जयति सततमभ्यस्यमानम् । वातो हि रौक्ष्य लाघवोपपन्नो विरुद्धगुणो भवति ।

विरुद्धगुणसन्निपाते हि भूयसाऽल्पमवजीयते । तस्माच्चैलं वातं जयति सततमभ्यस्यमानम् । च. वि. १ ।

नास्ति तैलात्परं किञ्चिदौषधं मारुतापहम् ।
व्यवाय्युष्णगुरु स्नेहात्संस्काराद्बलवत्तरम् ।
गणैर्वातहरैस्तस्मात् शतशोऽथसहस्रशः ।
सिद्धं क्षिप्रतरं हन्ति सूक्ष्ममार्गस्थितान्गदान् ॥ च. चि. २८
तैलं वस्तिषु पाने च नस्ये कर्णाक्षिपूरणे ।
अन्नपाने तथाऽभ्यङ्गे प्रयोज्यं वातशान्तये ॥ सु० सू० ४५

नानाविधस्नेहानामुपयोगमाह—:

नासायाम्-नस्य कर्म यथाकालं यो यथोक्तं निषेवते ॥ ५५ ॥
न तस्य चक्षुर्न घ्राणं न श्रोत्रमुपहन्यते ।
न स्युः श्वेता न कपिलाः केशाः श्मश्रूणि वा पुनः ॥ ५६ ॥
न च केशाः प्रलुप्यन्ते वर्धन्ते च विशेषतः ।
मन्यास्तम्भः शिरः शूलमर्दितं हनुसंग्रहः ॥ ५७ ॥
पीनसार्धावभेदौ च शिरःकम्पश्च शाम्यति ।
शिराः शिरःकपालानां सन्धयः स्नायुकण्डराः ॥ ५८ ॥
नावनप्रीणिताश्चास्य लभन्तेऽभ्यधिकं बलम् ।
मुखं प्रसन्नोपचितं स्वरः स्निग्धः स्थिरो महान् ॥ ५९ ॥
सर्वेन्द्रियाणां वैमल्यं बलं भवति चाधिकम् ।
न चास्य रोगाः सहसा प्रभवन्त्यूर्ध्वजत्रुजाः ॥ ६० ॥
जीर्यतश्चोत्तमाङ्गे च जरा न लभते बलम् ॥ ६१ ॥
च० सू० ५ ।

किञ्च तदेव—बृंहणं वातजे शूले सूर्यावर्ते स्वरक्षये ।
नासास्यशोषे वाक्संगे कृच्छ्रबोधावबाहुके ॥ वा. सू. २० ।

शिरसि—नित्यं स्नेहार्द्रशिरसः शिरःशूलं न जायते ॥ ७६ ॥
न खालित्यं न पालित्यं न केशाः प्रपतन्ति च ।
बलं शिरःकपालानां विशेषेणाभिवर्धते ॥ ८० ॥
दृढमूलाश्च दीर्घाश्च कृष्णाः केशा भवन्ति च ।
इन्द्रियाणि प्रसीदन्ति सुत्वग्भवति चामलम् ॥ ८१ ॥
निद्रालाभः सुखं च स्यान्मूर्ध्नि तैलनिषेवणात् ॥ ८२ । च० सू० । अ० ५ ।

शिरोवस्तेरुपयोगमाह—
वस्तिस्तु प्रसुप्त्यर्दित जागरे ।
नासास्यशोषे तिमिरे शिरोरोगे च दारुणे ॥
कचसदनसितत्वपिञ्जरत्वं परिस्फुटनं शिरसः समीररोगान् ।
जयति जनयतीन्द्रियप्रसादं स्वरहनुमूर्धबलं च मूर्धतैलम् ॥
वा० । सू० । २१ ॥

आस्ये—न चास्यकण्ठशोषः स्यान्नोष्ठयोः स्फुटनाद्भयम् ।
न च दन्ताः क्षयं यान्ति दृढमूला भवन्ति च ॥
न शूल्यन्ते न चाम्लेन हृष्यन्ते भक्षयन्ति च ।
परानपि खरान् भक्ष्यान्तैलगण्डूषसेवनात् ॥
किञ्च—दन्तहर्षे दन्तचाले मुखरोगे च वातिके ।
सुखोष्णमथवा शीतं तिलकल्कोदकं हितम् ॥
गण्डूषधारणे नित्यं तैलं मांसरसोऽथवा ॥ वा. सू. २१ ॥

कर्णयोः—न कर्णरोगा वातोत्था न मन्याहनुसंग्रहः ॥ ८२ ॥
नोच्चैःश्रुतिर्न बाधिर्यं स्यान्नित्यं कर्णतर्पणात् ।
सर्वशरीरे—स्नेहाभ्यङ्गाद् यथा कुम्भश्चर्मस्नेहविमर्दनात् ॥८३॥
भवत्युपाङ्गादक्षश्च दृढः क्लेशसहो यथा ।

तथा शरीरमभ्यङ्गाद्दृढं सुत्वक् प्रजायते ॥ ८४ ॥
प्रशान्तमारुताबाधं क्लेशव्यायामसंसहम् ।
स्पर्शने चाधिको वायुः स्पर्शनं च त्वगाश्रितम् ॥ ८५ ॥
त्वच्यश्च परमोऽभ्यङ्गः तस्मात्तं शीलयेन्नरः ॥ ८६ ॥
सुस्पर्शोपचिताङ्गश्च बलवान्प्रियदर्शनः ॥ ८७ ॥
भवत्यभ्यङ्गनित्यत्वान्नरोऽल्पजर एव च ।
पादयोः—खरत्वं शुष्कता रौक्ष्यं श्रमः सुप्तिश्चपादयोः ॥ ८८ ॥
सद्य एवोपशाम्यन्ति पादाभ्यङ्गनिषेवणात् ।
जायते सौकुमार्यं च बलं स्थैर्यं च पादयोः ॥ ८९ ॥
दृष्टिः प्रसादं लभते मारुतश्चोपशाम्यति ।
न च स्युर्गृधसीवाताः पादयोः स्फुटनं न च ॥ ९० ॥
न शिरास्नायुसंकोचः पादाभ्यङ्गेन पादयोः । ९१ च. सू. ५॥
नयनयोः—नयने ताम्यति स्तब्धे शुष्के रूक्षेऽभिघातिते ।
वातपित्तातुरे जिह्मे शीर्णपक्ष्माविलेक्षणे ॥ १ ॥
कृच्छ्रोन्मीलशिराहर्षशिरोत्पाततमोऽर्जुनैः ।
स्यंदमन्थान्यतोवातवातपर्यायशुक्रकैः ॥ २ ॥
आतुरे शांतरागाश्रुशूलसंरंभदूषिके ।
निवाते तर्पणं योज्यं शुद्धयोर्मूर्धकाययोः ॥ ३ ॥
काले साधारणे प्रातः सायं चोत्तानशायिनः ।
यवमाषमयीं पालीं नेत्रकोशाद्बहिः समाम् ॥ ४ ॥
द्व्यंगुलोच्चां दृढां कृत्वा यथास्वं सिद्धमावपेत् ।
सर्पिर्निमीलिते नेत्रे तप्ताम्बुप्रावलापितम् ॥ ५ ॥
नक्त्यांध्यवाततिमिरकृच्छ्रबोधादिके वसाम् ।
आपक्ष्माग्रात् अथोन्मेषं शनकैस्तस्य कुर्वतः ॥ ६ ॥

मात्रां विगणयेत्तत्र वर्त्मसन्धिसितासिते ।
दृष्टौ च क्रमशो व्याधौ शतं त्रीणि च पंच च ॥ ७ ॥
एतानि सप्त चाष्टौ च दशमन्थे दशाऽनिले ।
पित्ते षट् स्वस्थवृत्ते च बलासे पंच धारयेत् ॥ ८ ॥
कृत्वाऽपांगे ततो द्वारं स्नेहं पात्रे तु गालयेत् ॥६॥वा.सू.२४॥

गुदे-त्रिस्नेहयुक्तो प्रवरो निरूहः सर्वानिलव्याधिहरः प्रदिष्टः।
च.। सि.। ३॥

किञ्च—कर्मव्यायामभाराध्वपानस्त्रीकर्षितेषु च ।
दुर्बले वातभग्ने च मात्रावस्तिः सदा मतः ।
ह्रस्वायाः स्नेहमात्रायाः मात्रावस्तिः समो भवेत् ।
यथेष्टाहारचेष्टस्य सर्वकालं निरत्ययः ॥
बल्यं सुखोपचर्यं च सुखं सृष्टपुरीषकृत् ।
स्नेहमात्राविधानं हि बृंहणं वातरोगनुत् ॥ च. सि. ४ ।

स्वेदोऽपि वातप्रकोपशामक इत्याह—
श्वासकासप्रतिश्यायहिध्माध्मानविबन्धिषु ।
स्वरभेदानिलव्याधिश्लेष्मामस्तंभगौरवे ॥ २५ ॥
अंगमर्दकटीपार्श्वपृष्ठकुक्षिहनुग्रहे ।
महत्त्वे मुष्कयोः खल्यामायामे वातकण्टके ॥ २६ ॥
मूत्रकृच्छ्रार्बुदग्रन्थि शुक्राघाताढ्यमारुते ।
स्वेदं यथायथं कुर्यात्तदौषधविभागतः ॥ २७॥ वा. सू.१७॥

शरीरस्य विविधावयवेषु वातप्रकोपस्य पृथक् पृथक् शमनोपायमाह—

आन्त्रेषु—रूक्षव्यायामजं गुल्मं वातिकं तीव्रवेदनम् ।
बद्धविण्मारुतं स्नेहैरादितः समुपाचरेत् ॥

भोजनाभ्यञ्जनैः पानैर्निरूहैः सानुवासनैः ।
स्निग्धस्य भिषजा स्वेदः कर्तव्यो गुल्मशान्तये ॥
स्नेहपानं हितं गुल्मे विशेषेणोर्ध्वनाभिजे ।
पक्वाशयगते वास्तिरुभयं जठराश्रये ॥ २४ ॥
दीप्तेऽग्नौ वातिके गुल्मे विबन्धेऽनिलवर्चसोः ।
बृंहणान्यन्नपानानि स्निग्धोष्णानि प्रयोजयेत् ॥ २५ ॥
पुनः पुनः स्नेहपानं निरूहाः सानुवासनाः ।
प्रयोज्याः वातगुल्मेषु कफपित्तानुरक्षिणा ॥२६॥ च. चि. ५॥

अथ च—

उदावर्तपरीता ये ये चात्यर्थं विरूक्षिताः ।
विलोमवाताः शूलार्तास्तेष्विष्टमनुवासनम् ॥
पिप्पली मदनं बिल्वं शताह्वां मधुकं वचाम् ।
कुष्ठं शठीं पुष्कराख्यं चित्रकं देवदारु च ॥
पिष्ट्वा तैलं विपक्तव्यं पयसा द्विगुणेन च ।
अर्शसां मूढवातानां तच्छ्रेष्टमनुवासनम् ॥
गुदनिःसरणं शूलं मूत्रकृच्छ्रं प्रवाहिकाम् ।
कट्यूरुपृष्ठदौर्बल्यमानाहं वंक्षणाश्रयम् ॥
पिच्छास्रावं गुदेशोफं वातवर्चोविनिग्रहम् ।
उत्थानं बहुशो यच्च जयेत्तच्चानुवासनात् ॥

किञ्च—गुल्मोदरब्रध्नार्शः प्लीहोदावर्तयोनिशुक्रगदे ।
मेदः कफसंसृष्टे मारुतरक्तेऽवगाढे च ॥ २७ ॥
गृध्रसिपक्षवधादिषु विरेचनार्हेषु वातरोगेषु ।
वाते विबद्धमार्गे मेदःकफपित्तरक्तेन ॥ २८ ॥
पयसा मांसरसैर्वा त्रिफलारसयूषमूत्रमदिरादिभिः ।

दोषानुबन्धयोगात् प्रशस्तमैरण्डजं तैलम् ॥
२९ । च. । चि. । २१ ॥

किंच—वातप्रायेष्वर्शःसु स्नेहस्वेदनवमनविरेचनास्थापनानु-
वासनमप्रतिषिद्धम् ।

मूत्रमार्गे—
अभ्यञ्जनस्नेहनिरूहवस्तिस्नेहोपनाहोत्तरवस्तिसेकान् ।
स्थिरादिभिर्वातहरैश्च सिद्धान्युञ्ज्याद्रसांश्चानिलमूत्रकृच्छ्रे ।
च. । चि. । २६ । ४५ ॥

श्वासस्रोतःसु—
रूक्षस्यानिलजं कासमादौ स्नेहैरुपाचरेत् ।
सर्पिर्भिर्वस्तिभिः पेयायूषक्षीररसादिभिः ॥ ३२ ॥
वातघ्नसिद्धैः स्नेहाद्यैर्धूमलेहैश्च युक्तितः ।
अभ्यङ्गैः परिषेकैश्च स्निग्धैः स्वेदैश्च बुद्धिमान् ॥ ३३ ॥
वस्तिभिर्बद्धविड्वातं शुष्कोर्ध्वं चोर्ध्वभक्तिकैः ॥ ३४ ॥
च. । चि. । १८ ॥

किञ्च—हिक्का श्वासार्दितं स्निग्धैरादौ स्वेदैरुपाचरेत् ।
आक्तं लवणतैलेन नाडीप्रस्तरसंकरैः ॥ च. चि. । १७-७१ ॥
वातिकान् दुर्बलान् बालान् वृद्धांश्चानिलसूदनैः ।
तर्पयेदेव शमनैः स्नेहयूषरसादिभिः ॥ च. चि. १७-९० ॥
दशमूलस्य वा क्वाथमथवा देवदारुणः ।
तृषितो मदिरां वापि हिक्काश्वासी पिबेन्नरः ॥
च. चि. १७ । १०५ ॥

कण्ठे—सर्पींष्युपरिभक्तानि स्वरभेदेऽनिलात्मके ।
तैलैश्चतुष्प्रयोगैश्च बलारास्नामृताह्वयैः ॥ २७९ ॥

बर्हितित्तिरिदक्षाणां पञ्चमूलीश्रृतान् रसान् ।
मायूरं क्षीरसर्पिर्वा पिबेत् त्र्यूषणमेव वा ॥ २८० ॥

च. चि. २६ ॥

हृदि-हृदि प्रकुपिते सिद्धमंशुमत्या पयो हितम् ॥ च. चि. २८॥

किञ्च—

सपुष्कराह्वं फलपूरमूलं महौषधं शट्यभया च कल्कः ।
क्षाराम्बुसर्पिर्लवणैर्विमिश्राः स्युर्वातहृद्रोगविकर्तिकाघ्नाः ॥

च. चि. २६।८४॥

शिरसि—

वातिके शिरसो रोगे स्नेहान् स्वेदान् सनावनान् ।
पानान्नमुपनाहांश्च कुर्याद्वातामयापहान् ॥ १५८ ॥
रास्नास्थिरादिभिः सिद्धं सक्षीरं नस्यमर्तिनुत् ।
तैलं रास्ना द्विकाकोली शर्कराभिरथापि वा ॥ १६० ॥
वातो रूक्षादिभिः क्रुद्धः शिरःकम्पमुदीरयेत् ।
तत्रामृता बला रास्ना महाश्वेताश्वगन्धकैः
स्नेहस्वेदादिवातघ्नं शस्तं नस्यं च तर्पणम् ॥

किञ्च—ये च वातात्मका रोगाः शिरःकम्पार्दितादयः
शिरसः तर्पणं तेषु नस्तः कर्म प्रचक्ष्यते ॥ च. चि. ६॥

किञ्च—खालित्ये पलिते वल्यां हरिलोम्नि च शोधितम् ।
नस्यैस्तैलैः शिरोवक्त्रप्रलेपैश्चाप्युपाचरेत् ॥ २६० ॥
सिद्धं विदारिगन्धाद्यैर्जीवनीयैरथापि वा ।
नस्यं स्यादणुतैलं वा खालित्यपलितापहम् ॥ १६१ ॥

च. चि. २६॥

मस्तिष्के—उन्मादे वातजे पूर्वं स्नेहपानं विशेषवित् ।

कुर्यादावृतमार्गे तु सस्नेहं मृदुशोधनम् ॥ ३२ ॥
निरूहान् स्नेहवस्तींश्च शिरसश्च विरेचनम् ।
ततः कुर्याद् यथादोषं तेषां भूयस्त्वमाचरेत् ॥ ३४ ॥
हृदिन्द्रियशिरःकोष्ठे संशुद्धे वमनादिभिः ।
मनः प्रसादमाप्नोति स्मृतिं संज्ञां च विन्दति ॥३५ च. चि. ६॥

किञ्च—वातिकं वस्तिभूयिष्ठैरपस्मारं समाचरेत् ॥
च. चि. १०।१५।

घृतं सैन्धवहिंगुभ्यां वार्षे वास्ते चतुर्गुणे।
मूत्रे सिद्धमपस्मारहृद्ग्रहामयनाशनम् ॥ च. चि. १०।२५ ।

स्नायुसन्ध्यस्थिषु—
स्नेहोपनाहाग्निकर्म बन्धनोन्मर्दनानि च ।
स्नायुसन्ध्यस्थिसम्प्राप्ते कुर्याद्वायावतन्द्रितः ॥ सु. चि. ४॥

नेत्रयोः—पुराणसर्पिषा स्निग्धौ स्यन्दाधीमन्थपीडितौ ।
स्वेदयित्वा यथान्यायं सिरामोक्षेण योजयेत् ॥
सम्पादयेद्वस्तिभिश्च सम्यक्स्नेहविरेचितौ ।
तर्पणैः पुटपाकैश्च धूमैराश्च्योतनैस्तथा ॥
नस्यस्नेहपरीषेकैः शिरोवस्तिभिरेव च ।
वातघ्नानूपजलजमांसाम्लक्वाथसेचनैः ।
स्नेहैश्चतुर्भिरुष्णैश्च तत्पीताम्बरधारणैः ॥
पयोभिर्वेसवारैश्च साल्वणैः पायसैस्तथा ।
तथा चोपरिभक्तस्य स्नेहपानं प्रशस्यते ॥
त्रिफलाक्वाथसंसिद्धं केवलं जीर्णमेव वा।
सिद्धं वातहरैः क्षीरं प्रथमेन गणेन वा ॥
नस्यादिषु स्थिरात्क्षीरमधुरैस्तैलमिष्यते ॥ सु. उ. ६ ॥

शुक्रे—घृतं च जीवनीयं यच्च्यवनप्राश एव च ।
गिरिजस्य प्रयोगश्च रेतोदोषानपोहति ॥
वातान्विते हिताः शुक्रे निरूहाः सानुवासनाः ।
रसायनप्रयोगाश्च सर्वानेतान्प्रयोजयेत् ॥

योनौ—वातव्याधिहरं कर्म वातार्तानां सदा हितम् ॥ ४७ ॥
औदकानूपजैर्मांसैः क्षीरैः सतिलतण्डुलैः ।
सवातघ्नौषधैर्नाडी कुम्भीस्वेदैरुपाचरेत् ॥ ४८ ॥
अक्तां लवणतैलेन साश्मप्रस्तरसंकरैः ।
स्विन्नां कोष्णाम्बुसिक्ताङ्गीं वातघ्नैर्भोजयेद्रसैः ॥ ४६ ॥
वातार्तानां च योनीनां सेकाभ्यङ्गपिचुक्रियाः ॥ ६१ ॥
वातार्तायाः पिचुं दद्याद्योनौ च प्रणयेत् ततः ॥ च. चि. ३०॥

गर्भे—गर्भे शुष्के तु वातेन बालानां चापि शुष्यताम् ॥ ६४ ॥
सिताकाश्मर्यमधुकैर्हितमुत्थापने पयः ॥ च. चि. २८ । ६५॥

क्षीरे—पाययेद्विरसक्षीरां द्राक्षामधुकशारिवाः ।
श्लक्ष्णपिष्टां पयस्यां च समालोड्य सुखाम्बुना ॥ २६३ ॥
फेन संघातवत्क्षीरं यस्यास्तां पाययेत् स्त्रियम् ॥ २६५ ॥

पाठानागरशार्ङ्गेष्टामूर्वाः पिष्ट्वा सुखाम्बुना ।
अञ्जनं तगरं दारु विल्वमूलं प्रियङ्गवः ॥ २६६ ॥
स्तनयोः पूर्ववत्कार्यं लेपनं क्षीरशोधनम् ।
किराततिक्तकं शुण्ठीं सामृतां क्वाथयेद्भिषक् ॥ २६७ ॥

तं क्वाथं पाययेद् धात्रीं स्तन्यदोषनिबर्हणम् ।
स्तनौ चालेपयेत् पिष्टैर्यवगोधूमसर्षपैः ॥ २६८ ॥
षड्विरेकाश्रितीयोक्तैरौषधैः स्तन्यशोधनैः ।

रूक्षक्षीरा पिबेत् क्षीरं तैर्वा सिद्धं घृतं पिबेत् ॥ २६६ ॥

च. चि. ३० ॥

सर्वाङ्गे—बृंहणं शमनं त्वेव वायोः पित्तानिलस्य च ॥ ७ ॥

बृंहयेद् व्याधिभैषज्यमद्यस्त्रीशोककर्षितान् ।
भाराध्वोरःक्षतक्षीणरूक्षदुर्बलवातलान् ॥ ८ ॥
मांसक्षीरसितासर्पिर्मधुरस्निग्धवस्तिभिः ॥ ९ ॥
स्वप्नशय्यासुखाभ्यंगस्नाननिर्वृतिबृंहणैः ॥ १० ॥

वा० । सू० । १४ ॥

किञ्च—वातिकान् दुर्बलान् बालान् वृद्धांश्चानिलसूदनैः ।
तर्पयेदेव शमनैः स्नेहयूषरसादिभिः ॥ च. चि. २१ ॥

किञ्च—सर्वाङ्गगतमेकाङ्गस्थितं वापि समीरणम् ।
रुणद्धि केवलो वस्तिर्वायुवेगमिवाचलः ॥ सु. चि. ४ ॥

ग्रीष्मर्तौ वर्षर्तौ च वातप्रकोपशामकविधिमाह—

व्यायाममुष्णमायासमैथुनञ्चातिशोषि च ।
लवणाम्लकटूष्णानि निदाघे परिवर्जयेत् ॥
भोजनं च हितं शीतं सघृतं मधुरद्रवम् ।
श्रृतेन पयसा रात्रौ शर्करामधुरेण च ॥
तापात्यये हिता नित्यं रसा ये गुरवस्त्रयः ।
वयोमांसरसाः कोष्णाः तैलानि घृतानि च ॥
बृंहणं चापि यत् किञ्चिदभिष्यन्दि तथैव च ।
निदाघोपचितञ्चैव प्रकुप्यन्तं समीरणम् ।
निहन्यादनिलघ्नेन विधिनाविधिकोविदः ॥ सु. उ. ६४ ॥

किञ्च—वर्षास्वग्निबले क्षीणे कुप्यन्ति पवनादयः ॥ ३४ ॥
उदमन्थं दिवास्वप्नमवश्यायं नदीजलम् ॥ ३५ ॥

व्यायाममातपञ्चैव व्यवायं चात्र वर्जयेत् ।
पानभोजन संस्कारान्प्रायः क्षौद्रान्वितान् भजेत् ॥ ३६ ॥
व्यक्ताम्ललवणस्नेहं वातवर्षाकुलेऽहनि ॥ ३७ ॥ च. सू. ६

पित्तेन संयुक्ते वाते चिकित्सापद्धतिमाह—

पित्तावृते विशेषेण शीतामुष्णां तथा क्रियाम् ।
व्यत्यासात्कारयेत् सर्पिर्जीवनीयं च शस्यते ॥ १८३ ॥
धन्वमांसं यवाः शालिर्यापनाः क्षीरवस्तयः ।
विरेकः क्षीरपानं च पंचमूलीबलाश्रितम् ॥ १८४ ॥
मधुयष्टिबलातैलघृतक्षीरैश्च सेचनम् ।
पञ्चमूलीकषायेण कुर्याद्वा शीतवारिणा ॥ १८५ ॥

कफसंयुक्ते वाते—

कफावृते यवान्नानि जांगला मृगपक्षिणः ।
स्वेदास्तीक्ष्णनिरूहाश्च वमनं सविरेचनम् ॥ १८६ ॥
जीर्णं सर्पिस्तथा तैलं तिलसर्षपजं शुभम् ।

उभाभ्यां संयुक्ते वाते—

संसृष्टे कफपित्ताभ्यां पित्तमादौ विनिर्जयेत् ॥ १८७ ॥
आमाशयगतं मत्वा कफं वमनमाचरेत् ।
पक्वाशये विरेकं तु पित्ते सर्वत्रगे तथा ॥ १८८ ॥
स्वेदैर्विष्यन्दितः श्लेष्मा यदा पक्वाशये स्थितः ।
पित्तं वा दर्शयेल्लिङ्गं वस्तिभिस्तौ विनिर्हरेत् ॥ १८९ ॥
श्लेष्मणानुगतं वातमुष्णैर्गोमूत्रसंयुतैः ।
निरूहैः पित्तसंसृष्टं निर्हरेत् क्षीरसंयुतैः ॥ १९० ॥
मधुरौषधसिद्धैश्च तैलैस्तमनुवासयेत् ॥ १९१ च. चि. २८॥

वातप्रकोपहराण्याहारद्रव्याणि–

गोधूमः—संधानकृद्वातहरो गोधूमः स्वादुशीतलः ।
जीवनो बृंहणो वृष्यः स्निग्धः स्थैर्यकरो गुरुः ॥
च. सू. २७ । २१ ॥

माषः—वृष्यः परं वातहरः स्निग्धोष्णमधुरो गुरुः ।
बल्यो बहुमलः पुंस्त्वं माषः शीघ्रं ददाति च ॥
च. सू. २७ । २४ ॥

तिलः—स्निग्धोष्णमधुरस्तीक्ष्णः कषायः कटुकास्तिलः ।
त्वच्यः केश्यश्च बल्यश्च वातघ्नः कफपित्तकृत् ॥च.सू.२७॥

मांसम्—शरीरबृंहणे नान्यद् दार्ढ्यं मांसाद्विशिष्यते ॥
च. सू. २७ । ८६ ॥

मांसं स्वभावतो वृष्यं स्नेहनं बलवर्धनम् । सु. सू. ॥

मृद्वीका—तृष्णादाहज्वरश्वासरक्तपित्तक्षतक्षयान् ।
वातपित्तमुदावर्तं स्वरभेदं मदात्ययम् ॥ १२३ ॥
तिक्तास्यतामास्यशोषं कासं चाशु व्यपोहति ।
मृद्वीका बृंहणी वृष्या मधुरा स्निग्धशीतला ॥१२४ च.सू. २७

खर्जूरम्—मधुरं बृंहणं वृष्यं खर्जूरं गुरु शीतलम् ।
क्षयेऽभिघाते दाहे च वातपित्ते च तद्धितम् ॥
च. सू. २७ । १२५ ॥

आम्रम्—पक्वमाम्रं जयेद्वायुं मांसशुक्रबलप्रदम् ॥ १२७ ॥
च. सू. २७ ॥

वातामादयः—वातामाभिषुकाक्षोटमकूलकानिकोचकाः ।
गुरूष्णस्निग्धमधुराः सोष्माणाः बलप्रदाः ।
वातघ्ना बृंहणाः वृष्याः कफपित्ताभिवर्धनाः ॥ च. सू०

हिंगु—वातश्लेष्मविबन्धघ्नं कटुकं दीपनं लघु ।
हिंगु शूलप्रशमनं विद्यात्पाचनदीपनम् ॥ च. सू. २८७ ॥
पलाण्डुः—श्लेष्मलो मारुतघ्नश्च पलाण्डुर्न च पित्तनुत् ।
आहारयोगी बल्यश्च गुरुर्वृष्योऽथ रोचनः ।

च. सू. २७ । १७३॥

लशुनः—कृमिकुष्ठकिलासघ्नो वातघ्नो गुल्मनाशनः ।
स्निग्धोष्णश्च वृष्यश्च लशुनः कटुको गुरुः ॥च. सू. २७।१७४॥
पयः—स्वादु पाकरसं स्निग्धमोजस्यं धातुवर्धनम् ।
वातपित्तहरं वृष्यं श्लेष्मलं गुरु शीतलम् ।
प्रायः पयोऽत्रगव्यं तु जीवनीयं रसायनम् ॥ वा. सू.॥
दधि—रोचनं दीपनं वृष्यं स्नेहनं बलवर्धनम् ।
पाकेऽम्लमुष्णं वातघ्नं मंगलं बृंहणं दधि ॥ च. सू. २२४ ॥
दध्नः सरो गुरुर्वृष्यो विज्ञेयोऽनिलनाशनः । सु. सू. ॥

नवनीतम्—
नवनीतं नवं वृष्यं शीतं वर्णबलाग्निकृत् ।
संग्राहि वातपित्तासृक् क्षयार्शोऽर्दितकासजित् ॥वा. सू. ॥
घृतम्—स्मृतिबुद्ध्यग्निशुक्रौजः कफमेदोविवर्धनम् ।
वातपित्तविषोन्मादशोषालक्ष्मीज्वरापहम् ॥ २३० ॥
सर्वस्नेहोत्तमं शीतं मधुरं रसपाकयोः ।
सहस्रवीर्यं विधिभिर्घृतं कर्मसहस्रकृत् ॥ च. सू.२७।२३१ ॥

वातहराणि भैषज्यद्रव्याणि आह—

भद्रदारु नतं कुष्ठं दशमूलं बलाद्वयम् ।
वायुं वीरतरादिश्च विदार्यादिश्च नाशयेत् ॥ ५ ॥

विदार्यादिमाह—

विदारिपञ्चांगुलवृश्चिकाली
वृश्चीव(पुनर्नवा) देवाह्वयशूर्पपर्ण्यः (चतस्रः पर्ण्यः)
कंडूकरी (कपिकच्छु) जीवन ह्रस्वसंज्ञे
द्वे पंचके गोपसुता (सारिवा) त्रिपादी ॥ ९ ॥
विदार्यादिरयं हृद्यो बृंहणो वातपित्तहा।
शोषगुल्मांगमर्दोर्ध्वश्वासकासहरो गणः॥ १० वा. सू. १५॥

जीवनीयमाह—

जीवंती काकोल्यौ मेदे द्वे मुद्गमाषपर्ण्यौ च।
ऋषभकजीवकमधुकं चेति गणो जीवनाख्यः ॥ ८ ॥

वीरतरादिमाह—

वेल्लंतरारणिकवूकवृषाश्मभेद-
गोकंटकोत्कट(इक्षुः)सहाचरबाणकाशाः।
वृक्षादनीनलकुशद्वयगुंठ(कत्तृणविशेषः) गुन्द्रा-(दर्भः)
भल्लूकमोरट(मूर्वाविशेषः)कुरंट(सैरेयकः)करंभपार्थाः ॥२४॥

एलादिकमाह—

एलायुग्मतुरुष्ककुष्ठफलिनी मांसी जलध्यामकं
स्पृक्काचोरकचोचपत्रतगरस्थौणेयजातीरसाः।
शुक्तिर्व्याघ्रनखोऽमराह्वमगुरुः श्रीवासकं कुंकुमं
चंडागुग्गुलुदेवधूपखपुराः पुन्नागनागाह्वयम् ॥ ४३ ॥
एलादिको वातकफौ विषं च विनियच्छति। वा. सू. १५॥

सुवर्णमाह—

सुवर्णं स्वादु हृद्यं च बृंहणीयं रसायनम्।
दोषत्रयघ्नं शीतं च चक्षुष्यं विषसूदनम् ॥ सु. सू.॥

रूप्यमाह—

रूप्यमम्लं सरं शीतं सस्नेहं पित्तवातनुत् ॥ सु. सू. ।

अभ्रमाह—अभ्रं कषायं मधुरं सुशीत—

मायुःकरं धातुविवर्धनञ्च ।

हन्यात् त्रिदोषं व्रणमेहकुष्ठं

प्लीहोदरग्रन्थि विषकृमींश्च ॥ भा. प्र. ।

मौक्तिकमाह—

मौक्तिकं शीतलं वृष्यं चक्षुष्यं बलपुष्टिदम् ॥ भा. प्र. ।

इति वातप्रकरणं समाप्तम् ।

पित्त. प्रकरणम्
पित्त प्रकरणम्

पित्त प्रकरणम्

पित्तधातुः

व्युत्पत्तिमाह—तप सन्ताप इति धातुस्तस्य क्तद्विहितेन प्रत्ययेन पित्तमिति रूपं भवति । सु. सू. २१ ॥

किम्भूतोत्पन्नं तदित्याह—पित्तमाग्नेयम् । सु० । सू० । २१ ॥

किञ्च—यत्पित्तमूष्माच यो या च भाः शरीरे तत्सर्वमाग्नेयम् । च० । शा० । ७ ॥

अत एव—

आग्नेयमेव यद्द्रव्यं तेन पित्तमुदीर्यते ॥ सु० । सू० । ४१ ॥

किञ्च—

दीपनं द्रव्यमाग्निगुणभूयिष्ठं भवति । सु० । सू० । ४१ ॥

प्रकृतिगुणास्तस्मिन् के भवन्तीत्याह—

सत्वरजो बहुलोऽग्निः । सु० । शा० । २ ॥

सत्वप्रधानानग्निगुणानाह—

तैजसास्तु गुणा रूपं रूपेन्द्रियं वर्णः सन्तापो भ्राजिष्णुता पक्तिरमर्शस्तैक्ष्ण्यं शौर्यं च । सु. । शा. । २ ॥

पित्तमन्तरग्निरित्येकार्थकमत आह—

न खलु पित्तव्यतिरेकादन्योऽग्निरुपलभ्यते आग्नेयत्वात् । पित्ते दहनपचनादिषु अभिवर्त्तमानेऽग्निवदुपचारः क्रियतेऽन्तरग्निरिति । सु० । सू० । १५ ॥

अन्तरग्निः पित्तस्य कर्माण्याह—

दर्शनं पक्तिरूष्मा च क्षुत्तृष्णादेहमार्दवम् ।
प्रभा प्रसादो मेधा च पित्तकर्माविकारजम् ॥
च० । सू० । १८ । ५२ ॥

किञ्च—अग्निरेव शरीरे पित्तान्तर्गतः कुपिताकुपितः शुभाशुभानि करोति । पक्तिमपक्तिं दर्शनमदर्शनं मात्रामात्रत्वमूष्मणः प्रकृतिविकृतिवर्णः शौर्यं भयं क्रोधं हर्षं मोहं प्रसादमित्येवमादीनि चापराणि द्वन्द्वानीति । च.सू.१२।११॥

किञ्च—भ्राजिष्णुतामन्नरुचिमग्निदीप्तिमरोगताम् ।
संसर्पत् स्वाः शिराः पित्तं कुर्याच्चान्यान्गुणानपि ॥
सु० । शा० । ७॥

किञ्च—पित्तादेवोष्मणः पक्तिर्नराणामुपजायते ।
तच्च पित्तं प्रकुपितं विकारान् कुरुते बहून् ॥ च. सू. । १७।

अत एव—

पित्तक्षये मन्दोष्माग्निता निष्प्रभत्वादिकञ्च । सु०सू० ।१५।

अन्तरग्निः पित्तस्याग्निकर्माणि भेदांश्चाह—

रागपक्त्योजस्तेजो मेधा ऊष्मकृत्पित्तम् ।
पञ्चधा प्रविभक्तमग्निकर्मणा अनुग्रहं करोति । सु०सू०।१५।

पाचकपित्तम्—पक्वामाशयमध्यस्थं पित्तं चतुर्विधमन्नपानं पचति विवेचयति च रसदोषमूत्रपुरीषाणि तत्रस्थमेव शेषाणां पित्तस्थानानां शरीरस्य च अग्निकर्मणा अनुग्रहं करोति तस्मिन्पित्ते पाचकोऽग्निरिति संज्ञा । सु० । सू०२१॥

पक्वाशयस्यान्तः कलायां तस्य स्थानमित्याह—

पित्तधरा नाम कला । या चतुर्विधमन्नपानमुपयुक्तं

मामाशयात्प्रच्युतं पक्वाशयोपस्थितं धारयति ।
अशितं खादितं पीतं लीढं कोष्ठगतं नृणाम् ।
तज्जीर्यति यथाकालं शोषितं पित्ततेजसा । सु० ।शा०। ४॥

अयं सूक्ष्मो जाठराग्निर्वायुनैव नियन्त्र्यत इत्याह—
जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः ।
सौक्ष्म्याद्रसानाददानो विवेक्तुं नैव शक्यते ॥
प्राणापानसमानैस्तु सर्वतः पवनैस्त्रिभिः ।
ध्मायते पाल्यते चापि स्वे स्वे स्थाने व्यवस्थितैः।सु.सू.३५

रक्तरञ्जकाग्नि पित्तमाह--
यत्तु यकृत्प्लीह्नोः पित्तं तस्मिन् रञ्जकोऽग्निरिति संज्ञा स रसस्य रागकृदुक्तः । सु० । सू० । २१॥

मनोरथसाधकं पित्तमाह—
यत् पित्तं हृदयसंस्थितं तस्मिन्साधकोऽग्निरिति संज्ञा सोऽभिप्रार्थितमनोरथसाधनकृदुक्तः । सु० । सू० । २१ ॥

दृष्टिसाधकं पित्तमाह—
यद् दृष्ट्यां पित्तं तस्मिन्नालोचकोऽग्निरिति संज्ञा स रूपग्रहणेऽधिकृतः । सु० । सू० । २१ ।

किञ्च—
चक्षुस्तेजोमयं तस्य विशेषाच्छ्लेष्मतो भयम्
ततः श्लेष्महरं कर्म हितं दृष्टेः प्रसादनम् । च० । सू० । ५ ।

त्वक्स्थं भ्राजकं पित्तमाह—
यत्तु त्वचि पित्तं तस्मिन्भ्राजकोऽग्निरिति संज्ञा सोऽभ्यंगपरिषेकावगाहावलेपनादीनां क्रियाद्रव्याणां पक्ता छायानाञ्च प्रकाशकः । सु० सू० २१ ।

रसरक्तादिधातूनां पाचकान् पित्ताग्नीनाह—

सप्तभिर्देहधातारो धातवो द्विविधं पुनः
यथास्वमग्निभिः पाकं यान्ति किट्टप्रसादवत्
रसाद्रक्तं ततो मांसं मांसान्मेदस्ततोऽस्थि च
अस्थ्नो मज्जा ततः शुक्रं शुक्राद्गर्भः प्रजायते ।
तेजो रसानां सर्वेषां मनुजानां यदुच्यते
पित्तोष्मणः स रागेण रसो रक्तत्वमृच्छति ।
वाय्वग्नितेजसा रक्तमूष्मणा चाभिसंयुतम्
स्थिरतां प्राप्य मांसं स्यात् स्वोष्मणा पक्वमेव तत्
स्वतेजोम्बुगुणस्निग्धोद्रिक्तं मेदोऽभिजायते ।
पृथिव्यग्न्यनिलादीनां संघातः स्वोष्मणा कृतः
खरत्वं प्रकरोत्यस्य जायतेऽस्थि ततो नृणाम् ।

किञ्च—पाचिता पित्ततापेन रसाद्या धातवः क्रमात्
शुक्रत्वं यान्ति मासेन तथा स्त्रीणां रजो भवेत् ।

शा । पू० ख० । ६ । ११ ।

किट्टपाचकान्पित्ताग्नीनाह—

किट्टमन्नस्य विरमूत्रं रसस्य च कफोऽसृजः
पित्तं, मांसस्य स्वमलो मलः स्वेदस्तु मेदसः ।
प्रसादकिट्टे धातूनां पाकादेवात्रिगर्हिते
परस्परोपसंस्तम्भाद्धत्तो देहं परस्परम् ।
इति भौतिकधात्वन्नपक्तॄणां कर्म भाषितम् ।

एषां पित्ताग्नीनामन्नपाचकोऽग्निर्मुख्य इत्याह—

अन्नस्य पक्ता सर्वेषां पक्तॄणामधिको मतः
तन्मूलास्ते हि तद्वृद्धिक्षयवृद्धिक्षयात्मिकाः ।

पित्तस्य विशेषस्थानान्याह—

स्वेदो रसो लसीका रुधिरमामाशयश्च पित्तस्थानानि तत्रापि आमाशयो विशेषेण पित्तस्थानम् । च० । सू० । २० । ८ ।

किञ्च—पित्तस्य यकृत्प्लीहानौ हृदयं दृष्टिस्त्वक् पक्वाशयो आमाशयश्चेति स्थानानि । सु० । सू० । २१ ।

पित्तस्य प्रकोपहेतवः—

द्रव्याण्याह—आग्नेयमेव यद् द्रव्यं तेन पित्तमुदीर्यते ।

रसाः—कट्वम्ललवणाः पित्तं जनयन्ति । च० सू० ।

पृथिव्यग्निगुणभूयिष्ठत्वादम्लः । सु० । सू० । ४१ ।

अम्लो रसोऽत्यर्थमुपभुज्यमानः कफं विलापयति पित्तमभिवर्धयति रक्तं दूषयति मांसंविदहति कायं शिथिलीकरोति क्षीणक्षतकृशदुर्बलानां श्वयथुमापादयति, अपि च क्षताभिहतदष्टभग्नशूनच्युतावमूत्रितपरिसर्पितमर्दितछिन्नभिन्नविश्लिष्टविद्धोत्पिष्टादीनि पाचयत्याग्नेयस्वभावात्परिदहति कण्ठमुरो हृदयं च ।

च० । सू० । २६ । २ ।

किञ्च—प्रायोऽम्लं पित्तजननं दाडिमामलकादृते ।

वा० । सू० । १० ।

किञ्च—सलिलाग्निगुणभूयिष्ठत्वाल्लवणः । सु० । सू० । ४१ ।

लवणो रसोऽत्यर्थमुपभुज्यमानः पित्तं रक्तं च कोपयति तर्षयति मूर्छयति तापयति दाहयति कुष्णाति मांसानि, प्रगालयति कुष्ठानि, विषं वर्धयति, शोफान्स्फोटयति दन्तांश्च्यावयति पुँस्त्वमुपहन्ति इन्द्रियाण्युपरुणद्धि वलीपलितखालित्यमापादयति च लोहितपित्त अम्लपित्त

वीसर्पवातरक्तविचर्चिका इन्द्रलुप्तप्रभृतीन् विकारानुपजनयति। च० । सू० । २६ । ३ ।

किञ्च—वाय्वग्निभूयिष्ठत्वात्कटुकः । च० । सू० । २६ ।

किञ्च—औष्ण्यतैक्ष्ण्यरौक्ष्यलाघववैशद्यगुणलक्षणं पित्तं तस्य समानयोनिः कटुको रसः सोऽस्यौष्ण्यादौष्ण्यं वर्धयति तैक्ष्ण्यात्तैक्ष्ण्यं रौक्ष्याद्रौक्ष्यं लघवाल्लाघवं वैशद्याद्वैशद्यमिति । सु० । सू० । ४६ ।

किञ्च—क्षाररसोऽपि कटुकलवणभूयिष्ठमनेकरससमुत्पन्नं द्रव्यम् ।

गुणाश्च—

तत्र ये इमे गुणा वीर्यसंज्ञकाः शीतोष्णस्निग्धरूक्षमृदुतीक्ष्णपिच्छिलविशदास्तेषां तीक्ष्णोष्णावाग्नेयौ ।

सु० । सू० । ४१ ।

विपाकः—पित्तमम्लाच्च जायते । शा० ।

ऋतुः—वर्षास्वोषधयस्तरुण्योऽल्पवीर्या आपश्चाप्रसन्नाः क्षितिमलप्रायाः ता उपयुज्यमाना नभसि मेघावतते जलप्रक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातविष्टम्भिताग्नीनां विदह्यन्ते विदाहात् पित्तसञ्चयमापादयन्ति ।

सु० । सू० । ६ ।

किञ्च—अद्भिरम्लविपाकाभिरोषधीभिश्च तादृशम्
पित्तं याति चयं कोपं न तु कालस्य शैत्यतः ।

वा० । सू० । १२ २७ ।

किन्तु—वर्षाशीतोचितागांनां सहसैवार्करश्मिभिः

तप्तानामाचितं पित्तं प्रायः शरदि कुप्यति ।

चo । सूo । ६ । ४१ ।

किञ्च—वर्षासु चीयते पित्तं शरत्काले प्रकुप्यति । शाo ।

आयुः—बाले विवर्धते श्लेष्मा मध्यमे पित्तमेवतु ।

सुo सूo । ३५ ।

अन्यान्कोपहेतूनाह—

क्रोधशोकभय–आयास–उपवास–विदग्ध–मैथुनोपगमनकट्वम्ललवणक्षार तीक्ष्णोष्णलघुविदाहितिलतैलपिण्याककुलत्थसर्षपातसीहरितकशाकगोधामत्स्याजाविकमांसदधितक्रकूर्चिकामस्तुसौवीरकसुराविकाराम्लफलकट्वरार्कप्रभृतिभिः पित्तं प्रकोपमापद्यते ।

तदुष्णैरुष्णकाले च मेघान्ते च विशेषतः
मध्याह्ने चार्धरात्रे च जीर्यत्यन्ने च कुप्यति ।

सुo । सूo । २१ ।

पित्तप्रकोपस्य लक्षणान्याह --

औष्ण्यं, तैक्ष्ण्यं, लाघवमनतिस्नेहो वर्णश्च पाण्डुररुणवर्जो गन्धश्च विस्रो रसौ च कटुकाम्लौ, पित्तस्यात्मरूपाणि एवं विधत्वाच्च कर्मणः स्वलक्षणमिदमस्य भवति । तं तं शरीरावयवमाविशतो दाहोष्मपाकस्वेदक्लेदकोथस्रावरागाः यथास्वं च गन्धवर्णरसादिभिर्निर्वर्तनं पित्तस्य कर्माणि तैरन्वितं पित्तविकारमेवाध्यवस्येत् ।

चo । सूo । १५ ।

पित्तविकाराश्चत्वारिंशदत ऊर्ध्वं व्याख्यास्यन्ते ।

तद्यथा ओषश्च, प्लोषश्च, दाहश्च, दवथुश्च, धूमकश्च

अम्लकश्च, विदाहश्च, अन्तर्दाहश्च, अंसदाहश्च, ऊष्माधिक्यं च, अतिस्वेदश्च, अंगगन्धश्च, अंगावयवदरणश्च, शोणितक्लेदश्च, मांसक्लेदश्च, त्वग्दाहश्च, मांसदाहश्च, त्वङ्मांसदरणं च, चर्मदरणं च, रक्तकोठाश्च, रक्तविस्फोटाश्च, रक्तपित्तं च, रक्तमण्डलानि च, हरितत्वं च, हारिद्रत्वं च, नीलिकाश्च, कक्षा च, कामला च, तिक्तास्यता च, पूतिमुखता च, तृष्णाया आधिक्यं च, अतृप्तिश्च, आस्यपाकश्च गलपाकश्च, अक्षिपाकश्च, गुदपाकश्च, मेढ्रपाकश्च, जीवादानं च, तमः प्रवेशश्च, हरितहारिद्रमूत्रनेत्रवर्चस्त्वं चेति चत्वारिंशत्पित्तविकाराः पित्तविकाराणामपरिसंख्येयानामाविष्कृततमा व्याख्याताः।

सर्वेष्वपि खल्वेतेषु पित्तविकारेष्वन्येषु चानुक्तेषु पित्तस्येदमात्मरूपमपरिणामि कर्मणश्च स्वलक्षणं यत्तदुपलभ्य तदवयवं वा विमुक्तसन्देहाः पित्तविकारमेवाध्यवस्यन्ति कुशलाः। च०। सू ।२०।१५।

किञ्च—पित्तं पुनर्ज्वरमतिसारमन्तर्दाहं तृष्णामदभ्रमप्रलपनानि करोति। च०। वि०।२।

स्थानभेदाल्लक्षणान्याह—

रक्ते—पित्तात्पीतासितं रक्तं सौष्ण्यात्स्त्यायति वै चिरात्। च०। सू०।२४।

किञ्च—पित्तं प्रकुपितं शरीरमनुसर्पद्यदेव यकृत्प्लीहप्रभवाणां लोहितवहानां स्रोतसां मुखान्यासाद्य प्रतिपद्यते तदेव लोहितं दूषयति। च०। नि०।१।

किञ्च—पित्तलस्याचितं पित्तं यथोक्तैः स्वैः प्रकोपनैः।

दूषयित्वा तु रक्तादीन्पाण्डुरोगाय कल्पते ॥
किञ्च—पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते।
तस्य पित्तमसृग्मांसं दग्ध्वा रोगाय कल्पते ॥३४॥
हारिद्रनेत्रः सुभृशं हारिद्रत्वङ्नखाननः।
रक्तपीतशकृन्मूत्रो भेकवर्णो हतेन्द्रियः ॥ ३५ ॥
दाहाविपाकदौर्बल्यसदनारुचिकर्षितः।
कामला बहु पित्तैषा कोष्ठशाखाश्रया मता।
च०। चि०। १६। ३६।

किञ्च—पित्तं विदग्धं स्वगुणैर्विदहत्याशुशोणितम्।
ततः प्रवर्तते रक्तमूर्ध्वंचाधोद्विधापि वा। मा. निदान।
शिरसि—मूर्छा पित्ततमःप्राया। सु० शा० ४।

किञ्च—पित्तं शिरसि संदुष्टं शिरोरोगाय कल्पते।
दह्यते रुज्यते तेन शिरः शीतेन शूयते ॥
दह्येते चक्षुषी तृष्णा भ्रमः स्वेदश्च जायते। च०। सू०।१७।
अग्नौ—अग्निरन्नस्य पाचकः पित्तेन तीक्ष्णो भवति। यः प्रभूतमप्युपयुक्तमन्नमाशु पचति स तीक्ष्णः। स एवाभिवर्धमानोऽत्यग्निरित्याभाष्यते। स मुहुर्मुहुः प्रभूतमप्युपयुक्तमन्नमाशुतरं पचति पाकान्ते च गलताल्वोष्ठशोषदाहसन्तापान् जनयति। सु०। सू०। ३५।

अम्लपित्तं च जनयतीत्याह—
विरुद्धदुष्टाम्लविदाहिपित्तप्रकोपिपानान्नभुजो विदग्धम्।
पित्तं स्वहेतूपचितं पुरा यत्तदम्लपित्तं प्रवदन्ति सन्तः ॥
मा० नि।

पित्तगुल्मं जनयतीत्याह—

आन्त्रैकदेशे पित्तेन विदह्यमानः सधूममिवोद्गारमुद्गिरत्यम्लान्वितं गुल्मावकाशश्चास्य दह्यते दूयते धूप्यते ऊष्मायते स्विद्यति क्लिद्यति मृदुशिथिल इव चास्पर्शासहोऽल्परोमाञ्चो भवति ज्वरभ्रमदवथुपिपासा गलवदनतालुशोषप्रमोहविड्भेदाश्च भवन्ति । च० । नि० । ३ ।

अतिसारं जनयतीत्याह—

अतिमात्रभोक्तुः पित्तं पुनर्ज्वरमतीसारमन्तर्दाहं तृष्णामदभ्रमप्रलपनानि करोति । च० । वि० । २ ।

त्वचि—यस्य पित्तं प्रकुपितं त्वचि रक्तेऽवतिष्ठते ।

रागं सशोथं जनयन्पिडका तस्य जायते । च० । सू० ।१८।

किञ्च—त्वचि पित्तं पुनर्दाहस्वेदक्लेदकोथकण्डूस्रावपाकरागानुत्पादयति । च० । नि० ६ ।

किञ्च त्वक्शोथमाह—

मृदुःसगन्धोऽसितपीतरागवान्भ्रमज्वरस्वेदतृषामदान्वितः ।

य उष्यते स्पृष्टरुगक्षिरागकृत्स पित्तशोथोभृशदाहपाकवान् ।

च० । सू० । १७ ।

मुखे मुखरोगमाह—

तृष्णाज्वरस्फोटकतालुदाहा धूमायनं चाप्यवदीर्णता च ।

पित्तात्समूर्च्छा विविधा रुजश्च वर्णाश्च शुक्लारुणवर्णवर्ज्याः ।

च० । चि० । २६

ओष्ठौ—आचितौ पिडिकाभिस्तु सर्षपाकृतिभिर्भृशम् ।

सदाहपाकसंस्रावौ नीलौ पीतौ च पित्ततः ॥

सु० । नि० । १६

जिह्वा--पित्तेन पीता परिदह्यते च चिता सरक्तैरपि कराटकैश्च।
सु० । नि० । १६ ।
कराठे--तालुकराठपरिशोषः पित्ताद्धक्तुमसूयते।
च० । चि० । ८ ।
नासायाम्--नासाग्रपाकज्वरवक्त्रशोषतृष्णोष्णपीतस्रवणानि पित्तात्। च० । चि० । २६ । १०६।
श्वासमार्गे--पीतनिष्ठीवनात्त्वं तिक्तास्यत्वं स्वरामयः।
उरो धूमायनं तृष्णा दाहो मोहोऽरुचिर्भ्रमः। १५ ।
प्रततं कासमानश्च ज्योतींषीव च पश्यति
श्लेष्माणं पित्तसंसृष्टं निष्ठीवति च पैत्तिके।
च० । चि० । १८ । १६ ।
नेत्रयोः--पित्तात्तु दाहार्तिरुजोऽतिरागाः पीतोपदेहः सुभृशोष्णमस्रम्। च० । चि० । २६ ।
कर्णयोः--शोफः सरागो दरणं विदाहः सपीतपूतिस्रवणं च पित्तात्। च० । चि० । २६ ।
हृदये--पित्तात्तमो दूयनदाहमोहाः सन्त्रासतापज्वरपीतभावाः। च० । चि० । २६ ।
मूत्रमार्गे--पीतं सरक्तं सरुजं सदाहं कृच्छ्रान्मुहुर्मूत्रयतीह पित्तात्। च० । चि० । २६ । ३८ ।
अराडे--पक्वोदुम्बरसंकाशां ज्वरदाहोष्मवतीं चाशुसमुत्थानपाकां पित्तवृद्धिमाचक्षेत। सू० । नि० । १२ ।
योनौ--दाहपाकज्वरोष्णार्ता नीलपीतासितार्तवा।
भृशोष्णकुणपस्रावा योनिः स्यात्पित्तदूषिता।
क्षीरे--कृष्णनीलपीतताम्रावभासं तिक्ताम्लकटुकानुरसं कुण-

परुधिरगन्धि भृशोष्णं पित्तविकाराणां कर्तृ पित्तोपसृष्टं क्षीरमभिज्ञेयम् । च० । शा० । ८ ।

किञ्च—पित्तमुष्णादिभिः क्रुद्धं स्तन्याशयमभिप्लुतम् ।

करोति स्तन्यवैवर्ण्यं नीलपीतासितादिकम् । २४३ ।

विवर्णगात्रः स्विन्नः स्यात्तृष्णालुर्भिन्नविद् शिशुः ।

नित्यमुष्णशरीरश्च नाभिनन्दति तत्स्तनम् । २४४ ।

पूर्ववत्कुपिते पित्ते दौर्गन्ध्यं क्षीरमृच्छति ।

पाण्ड्वामयस्तत्पिबतः कामला च भवेच्छिशोः ।

च० । चि० । ३० । २४५ ।

शुक्रे—सनीलमथवा पीतमत्युष्णं पूतिगन्धि च ।

दहल्लिंगं विनिर्याति शुक्रं पित्तेन दूषितम् ।

च० । चि० । ३० । १४१ ।

जन्मनैव पित्तप्रकोपलक्षणान्यधिकानि स्युः पित्तप्रकृतिर्यस्यात्तस्य लक्षणान्याह—

पित्तमुष्णं द्रवं विस्रमम्लं कटुकं च । तस्यौष्ण्यात्पित्तला भवन्ति उष्णासहाः शुष्कसुकुमारावदातगात्राः प्रभूतपिप्लुव्यंगतिलकपिडकाः क्षुत्पिपासावन्तः क्षिप्रवलीपलितखालित्यदोषाः प्रायो मृद्वल्पकपिलश्मश्रुलोमकेशाः, तैक्ष्ण्यात् तीक्ष्णपराक्रमाः तीक्ष्णाग्नयः प्रभूताशनपानाः क्लेशासहिष्णवो दन्दशूकाः, द्रवत्वाच्छिथिलमृदुसन्धिबन्धमांसाः प्रभूतसृष्टस्वेदमूत्रपुरीषाश्च, विस्रत्वात् प्रभूतपूतिवक्षःकक्षास्कन्धास्यशिरः शरीरगन्धाः, कट्वम्लत्वात् अल्पशुक्रव्यवायापत्याः । त एवं गुणयोगात्पित्तला मध्यबला मध्यायुषो मध्यज्ञानविज्ञानवित्तोपकरणवन्तश्च भवन्ति । च० । वि० ८ ।

किञ्च—स्वेदनो दुर्गन्धः पीतशिथिलांगः, ताम्रनखनयनतालुजिह्वोष्ठपाणिपादतलो दुर्भगो वलीपलितखालित्यजुष्टः बहुभुक् उष्णद्वेषी क्षिप्रप्रकोपप्रसादो मध्यमबलो मध्यमायुश्च भवति।

मेधावी निपुणमतिः विमृश्यवक्ता
तेजस्वी समितिषु दुर्निवारवीर्यः
सुप्तः सन् कनकपलाशकर्णिकारान्
सम्पश्येदपि च हुताशविद्युदुल्काः।
न भयात्प्रणमेदनतेष्वमृदुः
प्रणतेष्वपि सान्त्वनदानरुचिः
भवतीह सदा व्यथितास्यगतिः
स भवेदिह पित्तकृतप्रकृतिः। सु०। शा०। ४।

तस्य पित्तरोगाः शीघ्रमुत्पद्यन्त इत्याह—

पित्तलस्य पित्तप्रकोपणोक्तान्यासेवमानस्य क्षिप्रं पित्तं प्रकोपमापद्यते न तथेतरौ। तदस्य प्रकोपमापन्नं यथोक्तैर्विकारैः शरीरमुपतपति बलवर्णसुखायुषामुपघाताय।
च०। सू०। ७।

पित्तप्रकोपशामकचिकित्सामाह—

सस्नेहमुष्णं तीक्ष्णं च द्रवमम्लं सरं कटु
विपरीतगुणैः पित्तं द्रव्यैराशु प्रशाम्यति। च०। सू०। १।

द्रव्याणि—भूम्यम्बुवायुजैः पित्तं क्षिप्रमाप्नोति निर्वृतिम्।
सु०। सू०। ४१।

य इमे गुणा वीर्यसंज्ञकाः शीतोष्णस्निग्धरूक्षमृदुतीक्ष्णपिच्छिलविशदास्तेषां शीतपिच्छिलावम्बुगुणभूयिष्ठौ।

तोयाकाशगुणाभूयिष्ठं मृदुत्वम् । (अत एव) शीतमृदुपिच्छिलाः पित्तघ्नाः । सु० । सू० । ४१ ।

रसाः—मधुरतिक्तकषायाः पुनः पित्तं शमयन्ति ।
सु० । सू० । ४२ ।

मधुररसस्य गुणाः पूर्वमुक्तास्तिक्तरसद्रव्याणां सामान्यान् गुणानाह—

तिक्तो रसः स्वयमरोचिष्णुररोचकघ्नो विषघ्नः कृमिघ्नो मूर्छादाहकण्डूतृष्णाप्रशमनः, त्वङ्मांसयोः स्थिरीकरणो ज्वरघ्नोदीपनः पाचनः स्तन्यशोधनो—लेखनः क्लेदमेदोवसामज्जलसीकापूयस्वेदमूत्रपुरीषपित्तश्लेष्मोपशोषणो रूक्षः शीतो लघुश्च । च० । सू० । २६ । ५ ।

कषायरसद्रव्याणां सामान्यगुणानाह—

कषायो रसः संशमनः संग्राही संधारणः पीडनो रोपणः शोषणः स्तम्भनः श्लेष्मरक्तपित्तप्रशमनः शरीरक्लेदस्योपभोक्ता रूक्षः शीतो गुरुश्च । च० । सू० । २६ । ६ ।

त्रयाणां रसानां शैत्यस्य तुलनां कुर्वन्नाह--

मध्योत्कृष्टावराः शैत्यात्कषायस्वादुतिक्तकाः ।
तिक्तात्कषायो मधुरः शीताच्छीततरः परः ।
च० । सू० । २६ । ५२ ।

किन्तु गुणाः प्रधाना न रसा इत्याह—

दृष्टे तुल्यरसेप्येवं द्रव्ये द्रव्ये गुणान्तरम् ।
मधुरं किञ्चिदुष्णं स्याद् कषायं तिक्तमेव च ।
यथा महत्पञ्चमूलं यथा चानूपमामिषम् ॥ ४५ ॥
अर्कागुरुगुडूचीनां तिक्तानामुष्णमुच्यते ॥ ४६ ॥

कषायः स्तम्भनः शीतः सोऽभयात्वन्यथा मता ।

च० । सू० । २६ । ४८ ।

किञ्च—कटुका पिप्पली पित्तं शमयति मृदुवीर्यत्वात् । अम्लमामलकं, लवणरसं सैन्धवं च । तिक्ता काकमाची पित्तं वर्धयति उष्णवीर्यत्वात् मधुरा मत्स्याश्च ।

अतएव-ये रसाः पित्तशमना भवन्ति यदि तेषु वै ।
तैक्ष्ण्योष्ण्यलघुताश्चैव न ते तत्कर्मकारिणः ॥सु०।सू०।४०।

विपाकः—पित्तमम्लाच्च जायते । शा० । पूर्वखण्ड । २ ।

पित्तप्रकोपस्य सामान्यचिकित्सामाह —

तम्पित्तविकारं मधुरतिक्तकषायशीतैरुपक्रमैरुपक्रमेत स्नेहविरेकप्रदेहपरिषेक अभ्यंग अवगाहादिभिः पित्तहरैर्मात्रां कालं च प्रमाणीकृत्य। विरेचनं तु सर्वोपक्रमेभ्यः पित्ते प्रधानतमं मन्यन्ते भिषजः । च० । सू० । २० । १६

कीदृशैर्विरेचनं कारयेदित्याह—

कषायमधुरैः पित्ते । वा० । सू० । १८

किञ्च—पित्तस्यावजयनं सर्पिष्पानं, सर्पिषा च स्नेहनमधश्च दोषहरणं, मधुरतिक्तकषायशीतानां चौषधानामभ्यवहार्याणामुपयोगो, मृदुमधुरसुरभिशीतहृदयानां गन्धानाञ्चोपसेवा, शीतवारिभिरभिप्रोक्षणं श्रुतिसुखमृदुमधुरमनोऽनुमतानां च गीतवादित्राणां श्रवणं चाभ्युदयानां सुहृद्भिश्च संयोगः शैलान्तरपुलिनशिशिरसदनवसनव्यजनपवनानां सेवा रम्याणां चोपवनानां, सुखशिशिरसुरभिमारुतोपवातानामुपसेवनम्, सौम्यानां च सर्वभावानामिति । च. वि. । ६ । १५

पित्तधातोः क्षये चिकित्सामाह—

पित्तक्षयेऽम्ललवणकटुकक्षारोष्णतीक्ष्णानाम् द्रव्याणां कर्माणि यद्यद् तद्वृद्धिकरं तत्तदनुसेव्यम्। च.। शा.। ६।

स्थानभेदात्पित्तप्रकोपोपचारपद्धतिमाह—

रक्ते-कुर्याच्छोणितरोगेषु रक्तपित्तहरीं क्रियाम्।
विरेकमुपवासं वा स्रावणं शोणितस्य च। १८
बलदोषप्रमाणाद्वा विशुद्धया रुधिरस्य वा।
रुधिरं स्रावयेज्जन्तोराशयं प्रसमीक्ष्य वा। च. सू.।२४।१६।

किञ्च-विरेचनैर्घृतक्षीरपानैः सेकैः सबस्तिभिः।
शीतैः निर्वापणैश्चापि रक्तपित्तोत्तरं जयेत्। च. वि. २६।४५

अग्नौ—
तीक्ष्णेऽग्नौ मधुरस्निग्धशीतैर्विरेकैश्च प्रतिकुर्वीत।सु.सू.३५।

आन्त्रे—
पित्तं वा पित्तगुल्मं वा ज्ञात्वा पक्वाशयस्थितम्।
कालविन्निर्हरेत्सद्यः सतिक्तैः क्षीरबस्तिभिः॥ ३४॥
पयसा वा सुखोष्णेन सतिक्तेन विरेचयेत्।
भिषगग्निबलापेक्षी सर्पिषा तैल्वकेन वा॥ ३५॥
तृष्णाज्वरपरीदाहशूलस्वेदाग्निमार्दवे।
गुल्मिनामरुचौ चापि रक्तमेवावसेचयेत्॥ ३६॥
हृतदोषं परिम्लानं जाङ्गलैस्तर्पितं रसैः।
समाश्वस्तं सशेषार्तिं सर्पिषा पुनराचरेत्॥ च. वि.।५।३८

उदरे-पित्तोदरे तु बलिनं पूर्वमेव विरेचयेत्।
दुर्बलं त्वनुवास्यादौ शोधयेत्क्षीरबस्तिना॥ ६८॥
सञ्जातबलकायाग्निं पुनः स्निग्धं विरेचयेत्।

पयसा सत्रिवृत्कल्केनोरुबूकशृतेन वा ।
सातलात्रायमाणाभ्यां शृतनारग्वधेन वा। च. चि. १३ ७०।

पित्तोदरिणं तु मधुरगणविपक्केन सर्पिषा स्नेहयित्वा श्यामात्रिफलात्रिवृद्विपक्केन अनुलोम्य शर्करामधुघृतप्रगाढेन न्यग्रोधादिकषायेणास्थापयेदनुवासयेच्च पायसेनोपनाहयेदुदरं भोजयेच्चैनं विदारिगन्धादिसिद्धेन पयसा । सु. चि. । १४ ।

आमाशये—पित्तछर्दिन्निराकुर्वन्नाह—

पित्तात्मिकायामनुलोमनार्थं द्राक्षाविदारीक्षुरसैः त्रिवृत्स्यात्।
कफाशयस्थं त्वतिमात्रवृद्धं पित्तं हरेत्स्वादुभिरूर्ध्वमेव ॥
च. चि. । २० । २६ ।

पित्तजतृषायामाह—

पैत्ते द्राक्षाचन्दनखर्जूरोशीरमधुयुतं तोयम् । च. चि.२२।४१।

पैत्तिकाशिरोरोगे—

पैत्ते घृतं पयः सेकाः शीता लेपाः सनावनाः ।
जीवनीयानि सर्पींषि पानान्नं चापि पित्तनुत् ।च.चि.२६।१७।

कंठे-पैत्तिके तु विरेकः स्यात्पयश्च मधुरैः शृतम् ।
सर्पिर्गुडाजीवनीयं वासासिद्धं घृतं तथा ॥ च. चि. २६ ।

श्वासमार्गे—

पैत्तिके सकफे कासे वमनं सर्पिषा हितम् ।
तथा मदनकाश्मर्यमधूकक्वथितैर्जलैः ॥ ८३ ॥
यष्ट्याह्वफलकल्कैर्वा विदारीक्षुरसायुतैः ।
हृतदोषस्ततः शीतं मधुरं च क्रमं भजेत् ॥ ८४ ॥
पैत्ते तनुकफे कासे त्रिवृतां मधुरैर्युताम् ।
दद्याद्घनकफे तिक्तैर्विरेकार्थे युतां भिषक् ॥ ८५ ॥

स्निग्धशीतस्तनुकफे रूक्षशीतः कफे घने ।
क्रमः कार्यः परं भोज्यैः स्नेहैर्लेहैश्च शस्यते । च. चि. १८।८३।

हृदये—
शीताः प्रदेहाः परिषेचनं च तथा विरेको हृदि पित्तदुष्टे ।
द्राक्षासिताक्षौद्रपरूषकैः स्याच्छुद्धे तु पित्तापहमन्नपानम्॥८८॥
यष्ट्याह्विकातिक्तकरोहिणीभ्यां कल्कं पिबेच्चापि सिताजलेन।
क्षतेषु सर्पींषि हितानि सर्पिर्गुडाश्च ये तान्प्रसमीक्ष्य सम्यक् ८९
दद्याद्भिषग्धन्वरसांश्च गव्यक्षीराशिनां पित्तहृदामयेषु ।
तैरेव सर्वे प्रशमं प्रयान्ति पित्तामयाः शोणितसंश्रया ये ॥९०॥
द्राक्षाबलाश्रेयसि शर्कराभिः खर्जूरवीरर्षभकोत्पलैश्च ।
काकोलिमेदायुगजीवकैश्च क्षीरे च सिद्धं महिषीघृतं स्यात् ।९१

च. चि. । २६

नेत्रयोः—
पित्तस्यन्दे पैत्तिके चाधिमन्थे रक्तास्रावः स्रंसनञ्चापि कार्यम्।
अक्ष्णोः सेकालेपनस्याञ्जनानि पैत्ते च स्याद्यद्विसर्पे विधानम्॥

सु. उ. । १०

मूत्रमार्गे—
सेकावगाहाः शिशिराः प्रदेहा ग्रैष्मो विधिर्बस्तिपयोविरेकाः।
द्राक्षाविदारीक्षुरसैर्घृतैश्च कृच्छ्रेषु पित्तप्रभवेषु कार्याः ॥४६॥
शतावरीकाशकुशाश्वदंष्ट्राविदारीशालीक्षुकशेरुकाणाम् ।
क्वाथं सुशीतं मधुशर्कराभ्यां युक्तं पिबेत् पैत्तिकमूत्रकृच्छ्री ॥

च. चि. । २६ । ५०

शुक्रे–अभयामलकीयं च पैत्ते शस्तं रसायनम् । च. चि. ।३०।१४।
क्षीरे–यष्टीमधुकमृद्वीकापयस्याः सिन्धुवारिकाः ।
शीताम्बुना पिबेत्कल्कं क्षीरवैवर्ण्यनाशनम् ॥ २७१ ॥

द्राक्षामधुककल्केन स्तनौ वास्याः प्रलेपयेत् ।
प्रक्षाल्य वारिणा चैव निर्दुह्यात्तौ पुनः पुनः ॥ २७२ ॥
विषाणिकाजश्रृङ्गौ च त्रिफलां रजनीं वचाम् ।
पिबेत्क्षीराम्बुना पिष्ट्वा क्षीरदौर्गन्ध्यनाशनम् ॥ २७३ ॥
लिह्याद्वाप्यभयाचूर्णं सव्योषं माक्षिकप्लुतम् ।
क्षीरदौर्गन्ध्यनाशार्थं धात्री पथ्याशिनी तथा ॥
च. । चि. । ३० । २७ ।

पित्तप्रकोपजनकशरदृतौ पथ्यापथ्यमाह —

तत्रान्नपानं मधुरं लघुशीतं सतिक्तकम् ।
पित्तप्रशमनं सेव्यं मात्रया सुप्रकाङ्क्षितैः ॥ ४२ ॥
शालीन्सयवगोधूमान्सेव्यानाहुर्घनात्यये ॥ ४३ ॥
तिक्तस्य सर्पिषः पानं विरेको रक्तमोक्षणम् ।
धाराधरात्यये कार्यमातपस्य च वर्जनम् ॥ ६ । ४३ ॥
वसां तैलमवश्यायमौदकानूपमामिषम् ।
क्षारं दधि दिवास्वप्नं प्राग्वातं चात्र वर्जयेत्॥च.।सू.।६।४४।
रात्रिजागरणं चैव मैथुनं चापि वर्जयेत् ॥ सु. । उ. । ६४ ।

पित्तप्रकोपहराण्याहारद्रव्याणि --

शालयः—मधुरा वीर्यतः शीता लघुपाका बलावहाः ।
पित्तघ्नाल्पानिलकफाः स्निग्धा बद्धाल्पवर्चसः॥सु.।सू.।४६।
मुद्गः—कषायमधुरो रूक्षः शीतः पाके कटुर्लघुः ।
विशदः श्लेष्मपित्तघ्नो मुद्गः सूप्योत्तमो मतः ॥ च.।सू.।२७।
मकुष्ठकः—मधुरा मधुराः पाके ग्राहिणो रूक्षशीतलाः ।
मकुष्ठकाः प्रशस्यन्ते रक्तपित्तज्वरादिषु ॥ च. । सू. । २७ ।
जम्बुफलं—जाम्बवं कफपित्तघ्नं ग्राहिवातकरं परम् ।

दाडिमं—रूक्षाम्लं दाडिमं यत्तु तत्पित्तानिलकोपनम्।
मधुरं पित्तनुत्तेषां तद्धि दाडिममुत्तमम् ॥च.। सू.। १४८।
आमलकी–विद्यादामलके सर्वान् रसान् लवणवर्जितान् ॥१४५
स्वेदमेदः कफोत्क्लेदपित्तरोगविनाशनम् ॥च.।सू.।२७।१४६।
कूष्माण्डम्—वल्लीफलानां प्रवरं कूष्माण्डं वातपित्तजित्।वा.
इक्षुः—इक्षो रसो गुरुः स्निग्धो बृंहणः कफमूत्रकृत्।
वृष्यः शीतोऽस्रपित्तघ्नः स्वादुपाकरसः सरः ॥ वा.। सू.
ततो मत्स्यण्डिकाखण्डशर्कराविमलाः परम्।
यथायथैषां वैमल्यं भवेच्छैत्यं तथा तथा ॥ च.। सू.।
शीताम्बु—मूर्छादिपित्तदाहेषु विषे रक्ते मदात्यये।
श्रमे भ्रमे विदग्धेन्ने तमके वमथौ तथा।
ऊर्ध्वगे रक्तपित्ते च शीतमम्बु प्रशस्यते। भा. प्र.।

पित्तप्रकोपहराणि भैषज्य द्रव्याणि —

दूर्वानन्ता निम्बवासात्मगुप्ता
गुन्द्राभीरुः शीतपाकी (बला) प्रियंगुः।
न्यग्रोधादिः पद्मकादिः स्थिरे द्वे
पद्मं वन्यं (वेतसम्) सारिवादिश्चपित्तम् ।वा.।सू.६

विदार्यादिः पूर्वमुक्तः—
विदार्यादिर्गणो हृद्यो बृंहणो वातपित्तहा।
सारिवादिमाह—
सारिवोशीरकाश्मर्यमधूकशिशिरद्वयम् (चन्दनद्वयम्)
यष्टी परूषकं हन्ति वातपित्तास्रतृड्ज्वरान्। वा. सू. ११।
पद्मकपुण्ड्रौ वृद्धि तुगर्द्ध्यः शृंग्यमृतादशजीवनसंज्ञाः।
स्तन्यकरा घ्नन्तीरणपित्तं प्रीणनजीवन बृंहणवृष्याः ॥ १२॥

अञ्जनादिगणमाह—

अञ्जनं फलिनी मांसी पद्मोत्पल रसाञ्जनम् ।
सैलामधुक नागाह्वं विषान्तर्दाह पित्तनुत् ॥ १४ ॥

पटोलादिमाह—

पटोलकटुरोहिणी चन्दनं
मधुस्रवगुडूचिपाठान्वितम् ।
निहन्ति कफकुष्ठज्वरान्
विषं वमिमरोचकं कामलाम् । वा. । सू. १५ ॥

गुडूच्यादिमाह— गुडूचीपद्मकारिष्टधानका रक्तचन्दनम् ।
पित्तश्लेष्मज्वरच्छर्दिदाहतृष्णाघ्नमग्निकृत् ॥ वा. । सू. । १६

प्रियंग्वादिमाह—प्रियंगुपुष्पाञ्जनयुग्मपद्मा
पद्याद्रजो योजनवल्ल्यनन्ता (मञ्जिष्ठा अनन्तमूलञ्च)
मानद्रुमो (शाल्मली) मोचरसः समङ्गा
पुन्नाग शीतं मदनीयहेतुः (धातकी) ॥वा. सू. । ३७ ।

अम्बष्ठादिमाह—अम्बष्ठा मधुकं नमस्करी
नन्दीवृक्षपलाशकच्छुराः ।
रोध्रं धातकिविल्वपेशिके
कट्वंगः कमलोद्भवं रजः ॥ ३८ ॥
गणौ प्रियङ्ग्वम्बष्ठादी पक्वातीसारनाशनौ ।
सन्धानीयौ हितौ पित्ते व्रणानामपि रोपणौ ॥ वा.।सू.।३९

न्यग्रोधादिमाह—न्यग्रोधपिप्पल सदाफलरोध्रयुग्मं
जम्बूद्वयार्जुन कपीतन सोमवल्काः ।
प्लक्षाम्र वंजुल प्रियाल पलाशनन्दी
कोलीकदम्ब विरला मधुकं मधूकम् ॥ ४१ ॥

न्यग्रोधादिर्गणो व्रण्यः संग्राही भग्नसाधनः
मेदः पित्तास्रतृड्दाहयोनिरोगानिवर्हणः ॥
वा. । सू. । ४२।

उत्पलादिमाह--उत्पलरक्तोत्पलकुमुदसौगन्धिककुवलयपुण्डरीकाणि मधुकश्चेति ।

उत्पलादिरयं दाहपित्तरक्तविनाशनः ।
पिपासा विषहृद्रोगछर्दि मूर्छाहरोगणः ॥ सु. । सू. ।

त्रिफलामाह—हरीतक्यामलकविभीतकानि त्रिफला ।

त्रिफलाकफपित्तघ्नीमेहकुष्ठविनाशनी
चक्षुष्यादीपनी चैव विषमज्वरनाशनी ॥ सु. । सू. ।

तृणपञ्चकमाह—

कुशकाशनलदर्भकाण्डेक्षुका तृणपञ्चकः ।
मूत्रदोषविकारञ्च रक्तपित्तं तथैव च
सोयं प्रयुक्तः क्षीरेण शीघ्रमेव विनाशयेत् ॥ सु. । सू. ।

लाक्षादिमाह—लाक्षारेवतकुटजाश्वमारकट्फलहरिद्राद्वयनिम्बसप्तच्छदमालत्यस्त्रायमाणा चेति ।

कषायस्तिक्तमधुरः कफपित्तार्तिनाशनः ।
कुष्ठक्रिमिहरश्चैव दुष्टव्रणविशोधनः ॥

लोहमाह--लोहं तिक्तं सरं शीतं मधुरं तुवरं गुरु
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत् ।
कफपित्तं गरं शूलं शोथार्शः प्लीहपाण्डुताः ।
मेदो मेह क्रमीन् कुष्ठं तत्किट्टं तद्वदेव च ॥ भा. प्र. ।

यशदमाह--यशदं तुवरं तिक्तं शीतलं कफपित्तहृत् ।
चक्षुष्यं परमं मेहान् पाण्डुं श्वासं च नाशयेत् ॥ भा. प्र. ।

श्लेष्मप्रकरणम्

श्लेष्मधातुः

श्लेष्मा इति शब्दस्य व्युत्पत्तिमाह—

श्लिष आलिंगन इति धातुस्तस्य कृद्विहितेन प्रत्ययेन श्लेष्मा इति रूपं भवति। सु. । सू. । २१।

श्लेष्मण उत्पत्तिमाह—

अम्भः पृथिवीभ्यां श्लेष्मा । वा. संग्रह। सु. अ० २०।

पार्थिवानामाप्यानाञ्च द्रव्याणां गुणानाह—

तत्र द्रव्याणि गुरुखरकठिनमन्दस्थिरविशदसान्द्र-स्थूलगन्धगुणबहुलानि पार्थिवानि तान्युपचयसंघात-गौरवस्थैर्यकराणि । द्रवस्निग्धशीतमन्दमृदुपिच्छिलरस-गुणबहुलान्याप्यानि तान्युत्क्लेदस्नेहबन्धविष्यन्दप्रह्लादकराणि। च. । सू. । २६।१०।

किञ्च—पृथ्वीसोमगुणबहुलानि गुरूणि । च. । सू. । ५

शीतापिच्छिलावम्बुगुणभूयिष्ठौ । सु० । सू० । ४१

पृथिव्यम्बुगुणभूयिष्ठः स्नेहः । सु० । सू० । ४१ ।

किञ्च—पृथिव्यम्बुगुणभूयिष्ठं बृंहणं भवति । सु० । सू० । ४१।

तमोगुणाधिकश्च स इत्याह—सत्वतमो बहुला आपः। तमो बहुला पृथ्वी। सु० । सू० । १

स एव शरीरमनसोरुभयोः पोषणस्य मूलहेतुरित्याह—

श्लेष्मा सौम्यः । सु० । सू० । ४२

सोम एव शरीरे श्लेष्मान्तर्गतः कुपिताकुपितः शुभाशुभानि करोति। तद्यथा दार्ढ्यं शैथिल्यमुपचयं कार्श्यमुत्साहमालस्यं वृषतां क्लीबतां बुद्धिं मोहमेवमादीनि चापराणि द्वन्द्वानीति। च० । सू० । १२ । १२

किञ्च—वृद्धिर्हितर्पणात् श्लेष्मणानुगता । वा० । सू० । ११

किञ्च—प्रायो मन्दं स्थिरं श्लक्ष्णं द्रव्यं बृंहणमुच्यते ।
च० । सू० । २२ । १३।

स्नेहमंगेषु सन्धीनां स्थैर्यं बलमुदीर्णताम् ।
करोत्यन्यान् गुणान् श्चापि बलासः स्वाः शिराश्चरन् ॥
सु० । शा०

स्नेहोबन्धः स्थिरत्वं च गौरवं वृषता बलम् ।
क्षमाधृतिरलोभश्च कफकर्मा विकारजम् ॥च. सू. १८ । ५३
प्राकृतस्तु बलं श्लेष्मा विकृतो मल उच्यते ।
स चैवोजः स्मृतः काये स च पाप्मोपदिश्यते ॥
च० । सू० । १७ । १६६

ओजः सर्वशरीरस्थं शीतं स्निग्धं स्थिरं मतम् ।
सोमात्मकं शरीरस्य बलपुष्टिकरं मतम् ॥ शा०

संधिसंश्लेषणस्नेहनरोपणपूरणबलस्थैर्यकृत् श्लेष्मा पञ्चधा प्रविभक्त उदककर्मणा अनुग्रहं करोति ।

तस्य विशेषस्थानान्याह—

उरः कण्ठशिरः क्लोमपर्वाण्यामाशयो रसः ।
मेदो घ्राणं च जिह्वा च कफस्य सुतरामुरः ॥ वा. । सू.१२
कफश्चामाशये मूर्ध्नि कण्ठे हृदि च सन्धिषु ।

तिष्ठन् करोति देहस्य स्थैर्यं सर्वांगपाटवम् ॥
क्लेदनः स्नेहनश्चैव रसनश्चावलम्बनः ।
श्लेषकश्चेति नामानि कफस्योक्तान्यनुक्रमात् ॥

आमाशयस्थमाह—

आमाशयः चतुर्विधस्याहारस्याधारः । स च तत्रौदकै गुणैराहारः प्रक्लिन्नो भिन्नसंघातः सुखजरश्च भवति ।
माधुर्यात्पिच्छिलत्वाच्च प्रक्लेदित्वात्तथैव च ।
आमाशये संभवति श्लेष्मा मधुरशीतलः ।

स तत्रस्थ एव शेषाणां श्लेष्माशयानां शरीरस्य च उदककर्मणा अनुग्रहं करोति । सु० । सू० २१

उरःस्थमाह—उरस्थस्त्रिकसन्धारणमात्मवीर्येणान्नरससहितेन हृदयावलम्बनं करोति ।

रसनास्थमाह—जिह्वामूलकण्ठस्थो जिह्वेन्द्रियस्य सौम्यत्वात् सम्यक् रसज्ञाने वर्त्तते ।

शिरःस्थमाह—शिरःस्थः स्नेहसन्तर्पणाधिकृतत्वात् इन्द्रियाणामात्मवीर्येणानुग्रहं करोति ।

सन्धिस्थमाह—सन्धिस्थस्तु श्लेष्मा सर्वसन्धिसंश्लेषात् सर्वसन्ध्यनुग्रहं करोति । सु० । सू० । २१

श्लेष्मणः क्षये दौर्बल्यं भवतीत्याह—

श्लेष्मक्षये रूक्षता अन्तर्दाह—आमाशयेतराशयशिरसांशून्यता—सन्धिशैथिल्यम्—तृष्णा—दौर्बल्यं प्रजागरणश्च सु० । सू० । १५ । ६

श्लेष्मजनका एवात्युपयुक्तास्तं प्रकोपयन्ति इति श्लेष्म-प्रकोप हेतुमाह--

द्रव्याणि—वसुधाजलजाताभ्यां बलासः परिवर्धते। सु.सू.४१

रसाः—मधुराम्ललवणाः श्लेष्माणं जनयन्ति। सु.। सू.। ४२

तत्र भूम्यम्बुगुणबाहुल्यान्मधुरः। भूम्यग्निबाहुल्या-दम्लः तोयाग्निगुणबाहुल्याल्लवणः।

किञ्च—मधुराम्लवणाः स्निग्धाः गुरवश्च॥ सु. सू. ४२

किञ्च—पृथिव्यापश्च गुर्व्यः शेषाणि लघूनि॥ सु. सू. ४०

मधुररसद्रव्याणां दुर्गुणानाह—

मधुररस एवात्यर्थमुपयुज्यमानः स्थौल्यं मार्दवमा-लस्यमतिस्वप्नं गौरवमनन्नाभिलाषमग्निदौर्बल्यमास्यक-ण्ठमांसाभिवृद्धिं श्वास कास प्रतिश्यायालसकशीतज्वरा-नाहास्यमाधुर्यवमथुसंज्ञास्वरप्रणाशगलगण्डमाला श्ली-पद गलशोफवस्ति धमनी गण्डोपलेपाद्यामयामभिष्यन्द-मित्येवं प्रभृतीन् कफजान् विकारानुपजनयति। च.सू.२६।१

किञ्च—पटोः कषायस्तस्माच्च मधुरः परमं गुरुः। वा. सू. १०

किञ्च—माधुर्यस्नेह गौरव शैत्य पैच्छिल्यगुण लक्षणः श्लेष्मा तस्य समानयोनिर्मधुरो रसः सोऽस्य माधुर्यान्माधुर्यं बर्धयति स्नेहात्स्नेहं गौरवाद्गौरवं शैत्याच्छैत्यं पैच्छिल्या-त्पैच्छिल्यमिति। सु० सू० ४२

अपवादमाह—मधुरं श्लेष्मलं प्रायो जीर्णाच्छालियवाहते।
मुद्गाद् गोधूमतः क्षौद्रात्सितताया जांगलाभिषात्॥

विपाकः—द्विविध एव पाको मधुरः कटुकश्च।
तयोर्मधुराख्यो गुरुः कटुकाख्यो लघुरिति॥ सु. सू. ४२

किञ्च—द्रव्येषु पच्यमानेषु येष्वम्बुपृथिवीगुणाः ।
निर्वर्तन्तेऽधिकास्तत्र पाको मधुर उच्यते ॥ सु सू ४० ॥

किञ्च—मधुराज्जायते श्लेष्मा । शा० पू० ख०

ऋतुः—ओषधयः कालपरिणामात् परिणतवीर्या बलवत्यो हेमन्ते भवन्ति । आपश्च प्रसन्नाः स्निग्धा अत्यर्थं गुरवस्ता उपयुज्यमाना मन्दकिरणत्वाद्भानोः सतुषारपवनोपस्तम्भितदेहानां देहिनां अविदग्धाः स्नेहाच्छैत्याद् गौरवाद् उपलेपाच्च श्लेष्मणः संचयमापादयन्ति स संचयो वसन्ते अर्करश्मिप्रविलापित ईषत्स्तब्धदेहानां देहिनां श्लैष्मिकान् व्याधीन् जनयति । सु० सू० ६॥

किञ्च—हेमन्ते निचितः श्लेष्मा दिनकृद्भाभिरीरितः ।
कायाग्निं बाधते रोगांस्ततः प्रकुरुते बहून् ॥
च० सू० ६ । २२॥

देशः—बहूदकनिम्नोन्नतनदीवर्षगहनो मृदुशीतानिलो बहुमहापर्वतवृक्षो मृदुसुकुमारोपचितशरीरमनुष्यप्रायः कफवातरोगभूयिष्ठश्चानूपः । सु० सू० ३५॥

किञ्च—जांगलं वातभूयिष्ठं आनूपं तु कफोल्बणम् ॥
वा० सू० १॥

आयुः—बाले विवर्धते श्लेष्मा मध्यमे पित्तमेव तु ।
भूयिष्ठं वर्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत् ॥ सु० सू० ३५॥

अन्ये हेतवः—दिवास्वप्नाव्यायाम अलस मधुराम्ललवणशीतस्निग्धगुरुपिच्छिलअभिष्यन्दिहायनकयवकनैषधोत्कटमाषमहामाषगोधूमतिलपिष्टविकृतिदधिदुग्धकृशरापायसेक्षुविकारानूपौदकमांसवसाबिसमृणालकशेरुकशृंगा-

टकमधुरवल्लीफलसमशनाध्यशनप्रभृतिभिः श्लेष्मा प्रकोपमापद्यते।

स शीतैः शीतकाले च वसन्ते च विशेषतः।
पूर्वाह्ने च प्रदोषे च भुक्तमात्रे प्रकुप्यति। सु० सू० २१॥

दिवास्वप्नाच्छ्लेष्मप्रकोपमाह--

ग्रीष्मवर्ज्येषु कालेषु दिवास्वप्नात्प्रकुप्यतः।
श्लेष्मपित्ते दिवास्वप्नस्तस्मात्तेषु न शस्यते ॥ ४४ ॥
मेदस्विनः स्नेहनित्याः श्लेष्मलाः श्लेष्मरोगिणः।
दूषीविषार्ताश्चदिवा न शयीरन् कदाचन ॥ ४५ ॥
हलीमकः शिरः शूलं स्तैमित्यं गुरुगात्रता।
अङ्गमर्दोऽग्निनाशश्च प्रलेपो हृदयस्य च ॥ ४६ ॥
शोथारोचक हृल्लास पीनसार्धावभेदकाः।
कोठाश्च पिडकाः कण्डूस्तन्द्रा कासो गलामयाः ॥ ४७ ॥
स्मृतिबुद्धिप्रमोहश्च संरोधःस्रोतसां ज्वरः।
इन्द्रियाणामसामर्थ्यं विषवेगप्रवर्तनम् ॥ ४८ ॥
भवेन्नृणां दिवास्वप्नस्याहितस्य निषेवणात् ॥ ४९ ॥
च० सू० २१॥

श्लेष्मप्रकोपलक्षणान्याहः—

श्वैत्यशैत्यकण्डूस्थैर्यगौरवस्नेहस्तम्भसुप्तिक्लेदोपदेह-बन्धमाधुर्यचिरकारित्वानि श्लेष्मणः कर्माणि, तैरन्वितं श्लेष्मविकारमेवाध्यवस्येत् ॥ १८ ॥

श्लेष्मविकाराश्च विंशतिरत ऊर्ध्वं व्याख्यास्यामः 'तद् यथा तृप्तिश्च तन्द्रा च निद्राधिक्यं च स्तैमित्यं च गुरु-गात्रता च आलस्यं च मुखमाधुर्यं च मुखस्रावश्च श्लेष्मो-

द्गिरणं च मलस्याधिक्यं च कण्ठोपलेपश्च बलासश्च हृदयोपलेपश्च धमनीप्रतिचयश्च गलगण्डश्च अतिस्थौल्यं च शीताग्निता च उदर्दश्च श्वेतावभासता च श्वेतमूत्रनेत्रवर्चस्त्वं चेति विंशति श्लेष्मविकाराः श्लेष्मविकाराणामपरिसंख्येयानामाविष्कृततमाः व्याख्याताः ॥ १७ ॥ च० सू० २१॥

सर्वेष्वपि खल्वेतेषु श्लेष्मविकारेष्वन्येषु चानुक्तेषु श्लेष्मण इदमात्मरूपमपरिणामि कर्मणश्च स्वलक्षणं यदुपलभ्य तदवयवं वा विमुक्तसन्देहाः श्लेष्मविकारमेवाध्यवस्यन्ति कुशलाः। च० सू० २१

हेतुस्थानभेदाच्छ्लेष्मप्रकोपलक्षणान्याह —

शिरसि—श्लेष्मा शिरसि सन्दुष्टः शिरोरोगाय कल्पते ॥२४॥
शिरोमन्दरुजं तेन सुषुप्तिस्तिमिराद्धकम्
भवत्युत्पद्यते तन्द्रा तथालस्यमरोचकः ॥ च० सू० १७।२५

किञ्च—मधुरस्निग्धगुर्वम्लसेवनाच्चिन्तनाद् भयात्।
शोकाद् व्याध्यनुषङ्गाच्च वायुनोदीरितः कफः ॥ २५ ॥
यदासौ समवस्कन्द्य हृदयं हृदयाश्रयान्।
समावृणोति ज्ञानादीन् तदा तन्द्रोपजायते॥ २६ ॥
हृदये व्याकुलीभावो वाक्चेष्टेन्द्रियगौरवम्।
मनो बुद्धयप्रसादश्च तन्द्राया लक्षणं मतम् ॥ च० सि० ६॥

किञ्च—तमोवातकफात्तन्द्रा निद्रा श्लेष्मतमोभवा। सु०शा०४॥

किञ्च—शिरो भवेद्यस्य कफोपदिग्धं
गुरु प्रतिष्टब्धमतो हिमं च।
शूनाक्षिकूटं वदनं च यस्य
शिरोऽभितापः स कफप्रकोपात्। मा० नि०।

अग्नौ—अग्नि रन्नस्य पाचकः श्लेष्मणा मन्दो भवति यः स्वल्पमप्युपयुक्तमुदरशिरोगौरवकासश्वासप्रसेकछर्दिगात्रसदनानि कृत्वा महता कालेन पचति स मन्दः ।

सु० सू० ३५।

आमाशये—

स्निग्धातिगुर्वामविदाहिभोज्यैः
स्वप्नादिभिश्चैव कफोऽतिवृद्धः ।
उरः शिरो मर्मरसायनीश्च
सर्वाः समावृत्य वमिं करोति ॥ १२ ॥
तन्द्रास्यमाधुर्यकफप्रसेक
सन्तोषनिद्रारुचिगौरवार्तः ।
स्निग्धं घनं स्वादु कफं विशुद्धं
सलोमहर्षोऽल्परुजं वमेत्तु ॥१३॥ च०।चि २३।

पक्वाशये—

स्तैमित्यशीतज्वर गात्रसाद
हृल्लास कासारुचि गौरवाणि
शैत्यं रुगल्पा कठिनोन्नतत्वं
गुल्मस्य रूपाणि कफात्मकस्य॥ च० चि० ५।

किञ्च—क्रुद्धः श्लेष्मा गुरुमधुरशीतस्निग्धः स्रस्तोऽग्निमुपहत्य सौम्यस्वभावात् पुरीषाशयमुपगत्योपक्लेद्य पुरीषमतिसाराय कल्पते ॥ ६ ॥

तस्य रूपाणि स्निग्धं श्वेतं पिच्छिलं तन्तुमदामं गुरु दुर्गंधं श्लेष्मोपहितमनुबन्धशूलमल्पाल्पमभीक्ष्णमतिसार्यते सप्रवाहिकं गुरूदरगुदबस्तिवंक्षणोद्देशः कृतापकृत-

संगो भवति सलोमहर्षः सोत्क्लेशो निद्रालस्यपरीतः सदनोऽन्नद्वेषी चेति श्लेष्मातिसारः । च० चि० १६ ।१०।

किञ्च—क्रुद्धेन श्लेष्मणा स्रोतःस्वाहतेष्वावृतोऽनिलः ।
तमेव पीडयन् कुर्यादुदरं बहिरन्त्रगः ॥ ३० ॥

तस्य रूपाणि गौरवारोचकाविपाकाङ्गमर्दसुप्तिपाणिपादमुष्कोरुशोफोत्क्लेशनिद्राकासश्वासाः शुक्लत्वं च नखनयनवदनत्वङ्मूत्रवर्चसामपि चोदरं शुक्लराजीशिरासन्ततं गुरुस्तिमितस्थिरं कठिनं च भवति एतच्छ्लेष्मोदरं विद्यात् । च०चि० १३ । ३१।

किञ्च—श्लेष्मजानि श्वेतानि महामूलानि स्थिराणि वृत्तानि स्निग्धानि न भिद्यन्ते न स्रवन्ति कण्डूबहुलानि गुदाङ्कुराणि भवन्ति । सु० नि० २।

ओष्ठयोः—सवर्णाभिस्तु चीयेते पिडिकाभिरवेदनौ ।
कण्डूमन्तौ कफाच्छूनौ पिच्छिलौ शीतलौ गुरू ॥
सु० नि० १६

दन्तेषु—शोणितं दन्तवेष्टेभ्यो यस्याकस्मात्प्रवर्तते ।
शीतादो नाम स व्याधिः कफशोणित संभवः ॥
सु० नि० १६

दन्तयोस्त्रिषु वा यस्य श्वयथुः सरुजो महान् ।
दन्तपुप्पुटको ज्ञेयः कफरक्तनिमित्ततः ॥ सु० नि १६

मुखे—कण्डूर्गुरुत्वं सितविज्जलत्वं
स्वेदोऽरुचिर्जाड्यकफप्रसेकौ
उत्क्लेशमन्दानलता च तन्द्रा
रुजश्चमन्दाः कफवक्त्ररोगे ॥ च० चि० २६ । १२१।

कण्डूयुतैरल्परुजैः सवर्णै-
र्यस्याचितं चापि स वै कफेन ॥ सु० नि० १६।

जिह्वायाम्—
कफेन गुर्वी बहुलाचिता च
मांसोद्गमैः शाल्मलिकण्टकाभैः।
जिह्वातले यःश्वयथुः प्रगाढः
सोऽलाससंज्ञः कफरक्तमूर्तिः। सु० नि० १६।

तालौ—श्लेष्मासृग्भ्यां तालुमूलात्प्रवृद्धो
दीर्घः शोफो ध्मातवस्तिप्रकाशः।
तृष्णा कासश्वासकृत्संप्रदिष्टो
व्याधिर्वैद्यैः कण्ठशुण्डीति नाम्ना ॥सु० नि० १६।
कूर्मोत्सन्नोऽवेदनोऽशीघ्रजन्मा-
ऽरक्तो ज्ञेयः कच्छपः श्लेष्मणा स्यात्।
पद्माकारं तालुमध्ये तु शोफं
विद्याद्रक्तादर्बुदं प्रोक्तलिंगम् ॥
दुष्टं मांसं श्लेष्मणा नीरुजं च
ताल्वन्तःस्थं मांससंघातमाहुः ॥
नीरुक् स्थायी कोलमात्रःकफा-
त्स्यात्मेदोयुक्तात्पुप्पुटस्तालुदेशे ॥ सु० वि० १७।

गलेरोहिणीमाह—स्रोतोनिरोधन्यपि मन्दपाका
गुर्वी स्थिरा सा कफसंभवा वै। सु० नि० १६।

किञ्च—
कोलास्थिमात्रःकफसंभवो यो ग्रन्थिर्गले कण्टकशूकभूतः।
खरः स्थिरः शस्त्रनिपातसाध्यः तं कण्ठशालूकमिति ब्रुवन्ति॥

बलास एवायतमुन्नतं च शोफं करोत्यन्नगतिं निवार्य ।
तं सर्वथैवाऽप्रतिवार्यवीर्यं विवर्जनीयं बलयं वदन्ति ॥
शोथो महानन्न जलावरोधी तीव्रज्वरो वातगतेर्निहन्ता ।
कफेन जातो रुधिरान्वितेन गले गलौघः परिकीर्त्यतेऽसौ ॥

सु० नि० १६।

नासायाम्—

कासारुचिस्रावघन प्रसेकाः कफादुगुरुः स्रोतसि चापि कण्डूः ॥

च० चि०२६ । १० ६।

कण्ठे—कफान्मदो विबद्धश्च स्वरः खुरखुरायते ॥ च०चि०८।

श्वासमार्गे-वृद्धः श्लेष्मानिलं रुद्ध्वा कफकासं करोति हि॥१७

मन्दाग्नित्वारुचिच्छर्दिपीनसोत्क्लेशगौरवैः ।
लोमहर्षाऽस्यमाधुर्य क्लेदसंसदनैर्युतम् ॥ १८ ॥
बहुलं मधुरं स्निग्धं निष्ठीवति घनं कफम् ।
कासमानो ह्यरुग्वक्षः सम्पूर्णमिव मन्यते ॥ १९ च० चि० १८।

नेत्रयोः—

उष्णाभिनन्दा गुरुताऽक्षिशोथः कण्डूपदेहावतिशीतता च
स्रावो मुहुः पिच्छिल एव चापि कफाभिपन्ने नयने भवन्ति ॥

मा० नि०।

रक्ते—ईषत्पाण्डु कफादुदुष्टं पिच्छिलं तन्तुमद्धनम् । च०सू०२४।

किञ्च—गैरिकोदकप्रतीकाशं स्निग्धं शीतलं बहुलं पिच्छिलं चिरस्रावि मांसपेशीप्रभं श्लेष्मदुष्टं रक्तम् ॥

सु० सू० १४।

त्वचि—कुष्ठेषु श्लेष्मा श्वैत्यशैत्यस्थैर्यकण्डूगौरवोत्सेधोपस्नेहोपलेपान् करोति । च० सि० ५।

कफशोथमाह--गुरुः स्थिरः पाण्डुररोचकान्वितः
प्रसेकनिद्रावमिवह्निमान्द्यकृत् ॥
स कृच्छ्रजन्मप्रशमो निपीडितो
न चोन्नमेद्रात्रिबली कफात्मकः
च० नि १२। १४।

कफविद्रधिमाह—
शरावसदृशः पाण्डुः शीतः स्तब्धोऽल्पवेदनः।
चिरोत्थानप्रपाकश्च सकण्डुश्च कफोत्थितः॥ सु० नि०।

कफव्रणमाह--
प्रततं च कण्डूबहुलः स्थूलो घनः स्तब्धः।
शिरास्नायुजालावततः कठिनः पाण्डुवभासो
मन्दवेदनः शुक्लशीतसान्द्रपिच्छिलस्रावी गुरुश्चेति
कफात् व्रणः। सु० चि० १।

अण्डे—कठिनामल्पवेदनां शीतां कण्डूमतीं श्लेष्मवृद्धिमाचक्षते। सु० नि० १२।

योनौ—कफोऽभिष्यन्दिभिर्वृद्धो योनिं चेद् दूषयेत्स्त्रियाः।
सशीतां पिच्छिलां कुर्यात् कण्डूग्रस्ताल्पवेदनाम्॥ १३॥
पाण्डुवर्णां तथापाण्डु पिच्छिलार्तववाहिनीम्॥
च० चि० ३०।

गुर्वादिभिर्हेतुभिश्च पूर्ववत्कुपितः कफः।
प्रदरं कुरुते तस्य लक्षणं तत्त्वतः शृणु॥ २१७॥
पिच्छिलं पाण्डुवर्णं च गुरु स्निग्धं च शीतलम्।
स्रवत्यसृक् श्लेष्मलं च तथा मन्दरुजाकरम्॥२१८॥
छर्द्यरोचकहृल्लासश्वासकाससमन्वितम्।२१९॥ च०चि०३०।

क्षीरे—अत्यर्थं शुक्लमतिमाधुर्योपपन्नं लवणानुरसं घृततैल-

वसामज्जगन्धि पिच्छिलं तन्तुमदुदकपात्रेऽवसीदति श्लेष्मविकाराणां कर्तृश्लेष्मोपसृष्टं क्षीरमभिज्ञेयम्।

च० शा० ८। ५६।

किञ्च—क्रुद्धो गुर्वादिभिः श्लेष्मा क्षीराशयगतः स्त्रियाः।
स्नेहान्वितात्तत्क्षीरमतिस्निग्धं करोति सः॥ २४६॥
छर्दनः कुन्थनस्तेन लालालुर्जायते शिशुः।
नित्योपदिग्धैः स्रोतोभिर्निद्राक्लमसमन्वितः॥ २४७॥
श्वासकासपरीतस्तु प्रसेकतमकान्वितः।
अभिभूय कफः स्तन्यं पिच्छिलं कुरुते यदा॥ २४८॥
लालालुः शूनवक्त्राक्षिर्जडः स्यात्तत् पिबन् शिशुः।
कफः क्षीराशयगतो गुरुत्वात् क्षीरगौरवम्॥ २४९॥
अतिस्नेहान्वितं पीत्वा बालो हृद्रोगमृच्छति॥ च.चि.३०।

शुक्रे—श्लेष्मणा बद्धमार्गं तु भवत्यत्यर्थपिच्छिलम्॥

च.। चि.। ३०। १४२॥

मूत्रमार्गे—

वस्तेः सलिङ्गस्य गुरुत्वशोथौ मूत्रं सपिच्छं कफमूत्रकृच्छ्रे।

च. चि. २६। ३५॥

सर्वाङ्गे—

संतर्पयतिः यः स्निग्धैर्मधुरैर्गुरुपिच्छिलैः।
नवान्नैर्नवमद्यैश्च मांसैश्चानूपवारिजैः।
गोरसैर्गौडिकैश्चान्नैः पिष्टकैश्चातिमात्रशः।
चेष्टाद्वेषी दिवास्वप्नशय्यासनसुखे रतः
रोगास्तस्योपजायन्ते संतर्पणनिमित्तजाः॥
प्रमेहकण्डू पिडकाः कोठपाण्ड्वामयज्वराः

कुष्ठान्यामप्रदोषाश्च मूत्रकृच्छ्रमरोचकम् ।
तन्द्रा क्लैव्यमति स्थौल्यमालस्यं गुरुगात्रता ॥
इन्द्रियस्रोतसां रोधो बुद्धेर्मोहः प्रमीलकः ।
शोफाश्चैवंविधाश्चान्ये शीघ्रमप्रतिकुर्वतः ॥ च. सू.

किञ्च—चतस्रोऽश्मर्यो भवन्ति श्लेष्माधिष्ठानाः । श्लेष्मणा वातेन पित्तेन शुक्रेण चेति । तत्रासंशोधनशीलस्य अपथ्यकारिणः प्रकुपितः श्लेष्मा मूत्रसम्पृक्तोऽनुप्रविश्य वस्तिमश्मरीं जनयति । प्रायेणैतास्तिस्रोऽश्मर्यः दिवास्वप्नसमशनाध्यशनशीतस्निग्धगुरुमधुराहारप्रियत्वात् विशेषेण बालानां भवन्ति ।

किञ्च—शरीरक्लेदस्तु श्लेष्ममेदोविमिश्रः प्रविशन्मूत्राशये मूत्रत्वमापद्यमानः श्लैष्मिकैरेभिर्दशभिर्गुणैरुपसृज्यते वैषम्ययुक्तैः तद्यथा—श्वेतशीतमूर्तपिच्छिलाच्छस्निग्धगुरुमधुरसान्द्रप्रसादमन्दैः तत्र येन गुणेनैकेनानेकेन वा भूयस्तरमुपसृज्यते तत्समाख्ये गौणं नामविशेषं प्राप्नोति ।
च. नि. ४ । १०॥

जन्मनैव श्लेष्मप्रकोपलक्षणान्याधिकानि स्युः श्लेष्मप्रकृतिर्वा स्यात्तस्य लक्षणानि—

श्लेष्मा हि स्निग्धश्लक्ष्णमृदुमधुरसारसान्द्रमन्दस्तिमितगुरुशीतपिच्छिलाच्छः । तस्य स्नेहात् श्लेष्मलाः स्निग्धाङ्गाः, श्लक्ष्णत्वात् श्लक्ष्णाङ्गाः मृदुत्वाद्दृष्टिसुखसुकुमारावदातगात्राः माधुर्यात्प्रभूतशुक्रव्यवायापत्याः सारत्वात् सारसंहतस्थिरशरीराः, सान्द्रत्वादुपचितपरिपूर्णसर्व-

गात्राः मन्दत्वान्मन्दचेष्टाहारविहाराः स्तैमित्यादशीघ्रारम्भाल्पक्षोभविकाराः गुरुत्वात्साराधिष्ठितावस्थितगतयः शैत्यादल्पक्षुत्तृष्णासंतापस्वेददोषाः पिच्छिलत्वात् सुश्लिष्टसारसान्धिबन्धनाः तथाऽच्छत्वात्प्रसन्नदर्शनाननाः प्रसन्नवर्णस्वराश्च। त एवं गुणयोगाच्छ्लेष्मला बलवन्तो वसुमन्तो विद्यावन्त ओजस्विनः शान्ता आयुष्मन्तश्च भवन्ति। च. वि. ८। ९८॥

किञ्च—दूर्वेन्दीवरनिस्त्रिंशार्द्रारिष्टशरकाण्डानामन्यतमवर्णः सुभगः प्रियदर्शनो मधुरप्रियः कृतज्ञो धृतिमान् सहिष्णुरलोलुपो बलवान् चिरग्राही दृढवैरश्च भवति।

शुक्लाक्षः स्थिरकुटिलातिनीलकेशः
लक्ष्मीवान् जलदमृदंगसिंहघोषः।
सुप्तः सन् स कलहंसचक्रवाकान्
सम्पश्येदपि च जलाशयान् मनोज्ञान्॥
रक्तान्तनेत्रः सुविभक्तगात्रः स्निग्धच्छविः सत्त्वगुणोपपन्नः।
क्लेशक्षमो मानयिता गुरूणां ज्ञेयो बलासप्रकृतिर्मनुष्यः॥
दृढशास्त्रमतिः स्थिरमित्रधनः
परिगण्य चिरात् प्रददाति बहु।
परिनिश्चितवाक्यपदः सततं
गुरुमान करश्च भवेत् स सदा॥ सु० शा० ४।

किञ्च—गम्भीरबुद्धिः स्थूलाङ्गः स्निग्धकेशो महाबलः।
स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः।
शा० पू० ख०।

किञ्च—श्लेष्मलस्यापि श्लेष्मप्रकोपणोक्तान्यासेवमानस्य क्षिप्रं

श्लेष्मा प्रकोपमापद्यते न तथेतरौ दोषौ। तदस्य प्रकोपमापन्नो यथोक्तैर्विकारैः शरीरमुपतपति बलवर्ण सुखायुषामुपघाताय। च. सू. ७।

किञ्च—श्लेष्मलस्य श्लेष्मनिमित्ता व्याधयः प्रायेण बलवन्तश्च भवन्ति। च. चि. ६।

वातादिप्रकृतिकाः शीघ्रं रुग्णा भवन्तीत्याह—

समपित्तानिलकफाः केचिद्गर्भादितो नराः।
दृश्यन्ते वातलाः केचिद् पित्तलाः श्लेष्मलास्तथा ॥३६॥
तेषामनातुरा पूर्वे वातलाद्याः सदातुराः।
दोषानुशयिता ह्येषां देहप्रकृतिरुच्यते ॥ ४० ॥
विपरीतगुणस्तेषां स्वस्थवृत्तेर्विधिर्हितः ॥ ४१॥ च. सू. ७।

कफप्रकोपशामकचिकित्सा

गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिलाः।
श्लेष्मणः प्रशमं यान्ति विपरीतगुणैर्गुणाः। च. सू. १।६१।

कफप्रकोपशामकानि द्रव्याणि--

खतेजोऽनिलजैः श्लेष्मा शममेति शरीरिणाम्। सु. सू. ४।

आकाशीयगुणानि द्रव्याणि—

श्लक्ष्णसूक्ष्ममृदुव्यवायिविविक्तमव्यक्तरसं आकाशीयं तन्मार्दवसौषिर्यलाघवकरमिति।

तेजोगुणानि--

उष्णतीक्ष्णसूक्ष्मरूक्षखरलघुविशदं ईषदम्ललवणं कटुकरसप्रायं तैजसम् तद्दहनपचनदारणतापन प्रकाशनप्रभावर्णकरमिति।

वायव्यगुणानि—

सूक्ष्मरूक्षखरशिशिरलघुविशदं ईषत्तिक्तकं विशेषतः कषायरसमिति वायवीयं तद्वैशद्यलाघव ग्लपन विरूक्षण विचारणकरमिति । सु. सू. ४१।

किञ्च--लघूनि द्रव्याणि वाय्वग्निगुण बहुलानि भवन्ति । च. सू. ५।

वायुगुणभूयिष्ठं रौक्ष्यम्
क्षितिसमीरणगुणभूयिष्ठं वैशद्यम् ।

अत एव—तीक्ष्णरूक्षविशदाः श्लेष्मघ्नाः । लघुपाकश्च श्लेष्मघ्नः । सु. सू. ४१।

रसाः—वाय्वग्निगुणबाहुल्यात्कटुकः । वाय्वाकाशगुणबाहुल्यात्तिक्तः पृथिव्यनिलगुणबाहुल्यात्कषाय इति ।

अत एव—कटुतिक्तकषायाः श्लेष्मघ्नाः । सु. सू. ४२।

कटुरसस्य गुणानाह—

कटुको रसो वक्त्रं शोधयति अग्निं दीपयति' भुक्तं शोषयति, घ्राणानास्रावयतिचक्षुर्विरेचयतिस्फुटीकरोतीन्द्रियाणि, अलसकश्वयथूपचयोदर्दाभिष्यन्दस्नेहस्वेदक्लेदमलानुपहन्ति, रोचयत्यशनं कण्डूर्विनाशयति व्रणानवसादयति कृमीन् हिनस्ति मांसं विलिखति शोणित संघातं भिनत्ति बन्धांश्छिनत्ति मार्गान्विवृणोति श्लेष्माणं शमयति लघुरुष्णो रूक्षश्च । च. सू. २६ । ४॥

किञ्च--माधुर्यस्नेहगौरवशैत्यपैच्छिल्यगुणलक्षणः श्लेष्मा तस्य पुनरन्ययोनिः कटुकोरसः स श्लेष्मणः प्रत्यनीकत्वात् कटुकत्वान्माधुर्यमाभिभवति रौक्ष्यात्स्नेहं लाघ-

वाद् गौरवमौष्ण्यात् शैत्यं वैशद्यात् पैच्छिल्यमिति ।

सु. सू. ४२।

तिक्तरसद्रव्याणां सामान्यगुणानाह—

तिक्तो रसः स्वयमरोचिष्णुररोचकघ्नो विषघ्नः कृमिघ्नो मूर्च्छादाहकण्डूतृष्णाप्रशमनः त्वङ्मांसयोः स्थिरीकरणो ज्वरघ्नो दीपनः पाचनः स्तन्यशोधनो लेखनः क्लेदमेदो-वसामज्जलसीकापूयस्वेदमूत्रपुरीषपित्तश्लेष्मो शोषणो रूक्षः शीतो लघुश्च । च. सू. २६ । ५॥

कषायरसस्य सामान्यगुणानाह--

कषायो रसः संशमनः संग्राही सन्धारणः पीडनो रोपणः शोषणः स्तम्भनः श्लेष्मरक्तपित्तप्रशमनः शरीरक्लेद-स्योपभोक्ता रूक्षः शीतो गुरुश्च । च. सू. २६ ।६॥

किञ्च—तिक्तः कटुः कषायश्च रूक्षा बद्धमलास्तथा ॥ ३७ ॥
वायुरम्लः कटुस्तस्यात्तस्मादपि च तिक्तकः ।

वा. सू. १० । ३६॥

विपाकः—कटुतिक्तकषायाणां विपाकः प्रायशः कटुः ।

वा. सू. ६॥

किञ्च—द्विविध एव पाको मधुरः कटुकश्च तेषां मधुराख्यो गुरुः कटुकाख्यो लघुरिति । सु. सू. ४० ।

कफप्रकोपशमनार्थं सामान्यचिकित्सामाह—

तस्यावजयनं विधियुक्तानि तीक्ष्णोष्णानि संशोधनानि रूक्षप्रायाणि चाभ्यवहार्याणि कटुतिक्तकषायोपहितानि तथैव धावनलङ्घनप्लवनपरिसरणजागरणनियुद्धव्यवाय-व्यायामोन्मर्दन स्नानोत्सादनानि विशेषतस्तीक्ष्णनां दीर्घ-

कालस्थितानां मद्यानामुपयोगः सधूमपानः सर्वशश्चोपवासः तथोष्णवासः सुखप्रतिषेधश्च सुखार्थमेवेति ।

च. वि. ६ । १६॥

श्लेष्मरोगं कटुतिक्तकषायतीक्ष्णोष्णरूक्षैरुपक्रमैरुपक्रमेत स्वेदनवमनशिरोविरेचनव्यायामादिभिः श्लेष्महरैर्मात्रां कालं च प्रमाणीकृत्य, वमनं तु सर्वोपक्रमेभ्यः श्लेष्मणि प्रधानतमं मन्यन्ते भिषजः तद्ध्यादित एवामाशयमनुप्रविश्य केवलं वैकारिकं श्लेष्ममूलमपकर्षति। तत्रावजिते श्लेष्मण्यपि शरीरान्तर्गताः श्लेष्मविकाराः प्रशान्तिमापद्यन्तेयथा भिन्ने केदारसेतौ शालियवषष्टिकादीन्यभिष्यन्दमानान्यम्भसा प्रशोषमापद्यन्ते तद्वदिति।

च० सू० २० १६॥

कफप्रकोपशामकं लङ्घनमाह—

चतुष्प्रकारा संशुद्धिः पिपासा मारुतातपौ ।
पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् ॥ १८ ॥
प्रभूतश्लेष्मपित्तास्रमलाः संसृष्टमारुताः ।
बृहच्छरीरा बलिनो लङ्घनीया विशुद्धिभिः ॥ १६ ॥
येषां मध्यबलाः रोगाः कफपित्तसमुत्थिताः ।
वम्यतीसारहृद्रोगविसूच्यलसकज्वराः ॥ २० ॥
विबन्धगौरवोद्गारहृल्लासारोचकादयः ।
पाचनैस्तान् भिषक् प्राज्ञः प्रायेणादावुपाचरेत् ॥ २१ ॥
एत एव यथोद्दिष्टा येषामल्पबला गदाः ।
पिपासानिग्रहैस्तेषामुपवासैश्च ताञ्जयेत् ॥ २२ ॥
रोगाञ्जयेन्मध्यबलान् व्यायामातपमारुतैः ।

बलिनां किं पुनर्येषां रोगाणामवरं बलम् ॥ २३ ॥
त्वग्दोषिणां प्रमूढानां स्निग्धाभिष्यन्दिबृंहिणाम् ।
शिशिरे लङ्घनं शस्तमपि वातविकारिणाम् ॥ २४ ॥

च. सू. २२॥

कफप्रकोपशामकं वमनमाह—

कफे विदध्याद्वमनं संयोगे वा कफोल्वणे ।
कफे तीक्ष्णोष्णकटुकैः पित्ते स्वादुहिमैरिति ।
वमेत् स्निग्धाम्ललवणैः संसृष्टे मरुता कफे ॥ वा. सू. १८

विषशोषस्तन्यदोषविषममन्दाग्न्युन्मादापस्मारश्लीपदार्बुदविदारिकामेदोमेहगरज्वरारुच्यपच्यामातीसारहृद्रोगचित्तविभ्रमविसर्पविद्रध्यजीर्णमुखप्रसेकहृल्लासश्वासकासपीनसपूतिनासकण्ठौष्ठवक्त्रपाककर्णस्रावाधिजिह्वोपजिह्विकागलशुण्डिकाधःशोणितपित्तिनः कफस्थानजेषु विकारेष्वन्येषु कफव्याधिपरीतेषु वमनं कारयेत् ॥

सु. चि. ३३।

कफप्रकोपशामकधूमपानमाह—

जत्रूर्ध्वकफवातोत्थविकाराणामजन्मने
उच्छेदाय च जातानां पिबेद्धूमं सदात्मवान् ॥
स्निग्धो मध्यः सतीक्ष्णश्च वाते वातकफे कफे ॥

वा. । सू. । १६।

किञ्च—कासश्वासारोचकास्योपलेपस्वरभेदमुखास्रावबमथु तन्द्रानिद्राहनुमन्यास्तम्भपीनसशिरोरोगकर्णाक्षिशूलवातनिमित्ताश्चास्य मुखरोगा न भवन्ति ।

सु० चि० ४०।

कफशामकनस्यमाह—

ऊर्ध्वजत्रुविकारेषु विशेषान्नस्यमिष्यते ।
विरेचनं बृंहणं शमनं च त्रिधापि तत् ॥ वा. सू. २० । २॥

शिरोविरेचनं श्लेष्मणाभिव्याप्ततालुकण्ठशिरसामरोचकशिरोगौरवशूलपीनसार्द्धावभेदकक्रमिप्रतिश्यायापस्मारगन्धाज्ञानेष्वन्येषु चोर्द्धजत्रुगतेषु कफजेषु विकारेषु शिरोविरेचनद्रव्यैस्तत्सिद्धेन वा स्नेहेनेति ॥ सु. चि. ४०॥

कफहरं गण्डूषं कवलञ्चेत्याह—

आशुक्षाराम्बुगण्डूषो भिनत्ति श्लेष्मणश्चयम् ॥ ६ ॥
सुखोष्णोदकगण्डूषैर्जायते वक्त्रलाघवम् ॥ १० ॥

किञ्च—मन्याशिरःकर्णमुखाक्षिरोगाः
प्रसेककण्ठामयवक्त्रशोषाः ।
हृल्लासतन्द्रारुचिपीनसाश्च
साध्या विशेषात्कवलग्रहेण ॥ वा. सू. २२ । १२

कफहरं स्वेदमाह—

तापोष्मस्वेदौ विशेषतः श्लेष्मघ्नौ । उपनाहस्वेदो वातघ्नः । कफमेदोन्विते वायौ निवातातपगुरुप्रावरण नियुद्धाध्वव्यायामभारहरणामर्षैः स्वेदमुत्पादयेदिति ॥
सु. चि. । ३२ ॥

श्लेष्मक्षये चिकित्सामाह—

श्लेष्मक्षये स्निग्धमधुरसान्द्रपिच्छिलानां द्रव्याणां, कर्मापि च यद्यद्यस्य धातोर्वृद्धिकरं तत्तदासेव्यम् ।
च० शा० ६ । ११ ॥

स्थानभेदाच्चिकित्साभेदमाह—

कफजे शिरोरोगे—

कफजे स्वेदितं धूमनस्य प्रधमनादिभिः ।
शुद्धं प्रलेपपानान्नैः कफघ्नैः समुपाचरेत्॥ च०चि०२६।१८०॥
शिरोविरेकैर्वमनैः तीक्ष्णैर्गण्डूषधारणैः ॥ सु० उ० २६।

किञ्च—स्तम्भसुप्तिगुरुत्वाद्याः श्लैष्मिका ये शिरोगदाः ।
शिरसो रेचनं तेषु नस्तः कर्म प्रशस्यते ॥ च० चि० ६।६७।

कफजन्यमन्दाग्नौ—

मन्देऽग्नौ कटुतिक्तकषायैः वमनैश्च प्रतिकुर्वीत ॥सु०सू०३५।

आमाशये—

आमाशयोत्क्लेशभवा हि सर्वाश्छर्द्यो मता लङ्घनमेव तस्मात्।
प्राक्कारयेन्मारुतजां विमुच्य संशोधनं वा कफपित्तहारि ॥२०॥
चूर्णानि लिह्यान्मधुनाऽभयानां हृद्यानि वा यानि विरेचनानि२१
कफात्मिकायां वमनं प्रशस्तं सपिप्पलीसर्षपनिम्बतोयैः ।
पिण्डीतकैः सैन्धवसंप्रयुक्तैर्वम्यां कफामाशयशोधनार्थम् ॥
च० चि० २०।

अन्त्रेषु—श्लेष्मातिसारे प्रथमं हितं लङ्घनपाचनम् ।
योज्यश्चामातिसारघ्नो यथोक्तो दीपनो गणः ॥ १०८ ॥
लंघितस्यानुपूर्व्यां च कृतायां न निवर्तते ।
कफजो यद्यतीसारः कफघ्नैस्तमुपाचरेत्॥ च०चि०१६।१०६।

किञ्च—शीतलैर्गुरुभिः स्निग्धैर्गुल्मे जाते कफात्मके ।
अवम्यस्याल्पकायाग्नेः कुर्याल्लंघनमादितः ॥ ४६ ॥
मन्दोऽग्निर्वेदना मन्दा गुरुस्तिमितकोष्ठता
सोत्क्लेशा चारुचिर्यस्य स गुल्मी वमनोपगः ॥ ५० ॥

उष्णैरेवोपचर्यश्च कृते वमनलङ्घने।
योज्याश्चाहारसंसर्गा भेषजैः कटुतिक्तकैः॥ ५१॥
सानाहं सविबन्धं च गुल्मं कठिनमुन्नतम्।
दृष्ट्वाऽऽदौ स्वेदयेद् युक्त्या स्विन्नं च विलयेद् भिषक्॥५२॥
लङ्घनोल्लेखने स्वेदे कृतेऽग्नौ संप्रधुक्षिते।
कफगुल्मे पिबेत्काले सक्षारकटुकं घृतम् ॥५३ च० चि० ५।

उदररोगे—
स्निग्धं स्विन्नं विशुद्धं तु कफोदरिणमातुरम्।
संसर्जयेत् कटुक्षारयुक्तैरन्नैः कफापहैः॥ ७२॥
गोमूत्रारिष्टपानैश्च शमयेत्तु कफोदरम्॥ ७३च० चि० १३।

नासायाम्—
धूमः शस्तोऽवपीडश्च कटुभिः कफपीनसे॥ च० चि० २६।

कण्ठे—कफजे स्वरभेदे तु तीक्ष्णं मूर्धविरेचनम्।
विरेको वमनं धूमो यवान्न कटुसेवनम्॥च० चि० २६।२८२।

श्वासमार्गे—
बलिनं वमनैरादौ शोधयेत्कफकासिनम्।
यवान्नैः कटुरूक्षोष्णैः कफघ्नैश्चाप्युपाचरेत्॥ १०८॥
पिप्पलीक्षारिकैर्यूषैः कौलत्थैर्मूलकस्य च।
लघून्यन्नानि भुञ्जीत रसैर्वा कटुकान्वितैः॥१०९च० चि० १८।

हृदये—
स्विन्नस्य वान्तस्य विलङ्घितस्य क्रिया कफघ्नी कफमर्मरोगे।
कौलत्थधान्यैश्च रसैर्यवान्नैः पानानि तीक्ष्णानि सशर्कराणि ९६।
मूत्रे श्रृताः कट्फलशृंगवेरपीतद्रुपथ्यातिविषाः प्रदेयाः।
कृष्णा शठीपुष्करमूलरास्ना वचाभयानागरचूर्णकं च॥ ९७॥

प्राश्याऽथवाऽगस्त्यहरीतकी च रसायनं ब्राह्ममथामलक्याः।
६६॥ च० चि० २६।

मूत्रमार्गे—

क्षारोष्णतीक्ष्णौषधमन्नपानं स्वेदो यवान्नं वमनं निरूहाः।
तक्रं सतिक्तौषधसिद्धतैलमभ्यङ्गपानं कफमूत्रकृच्छ्रे॥
च० चि० २६।५४।

योनौ—योन्याः श्लेष्मप्रदुष्टायाः वर्तिः संशोधनी हिता॥७०॥
पिपल्या मरिचैः माषैः शताह्वा कुष्ठसैन्धवैः।
वर्तिस्तुल्या प्रदेशिन्या धार्या योनिविशोधनी॥ ७२॥
पिपल्ययोरजाः पथ्या प्रयोगा मधुना हिताः।
श्लेष्मलायां कटुप्रायाः समूत्रावस्तयो हिताः॥ ८४॥
च० चि० ३०।

क्षीरे—पाययेत्पिच्छिलक्षीरां शार्ङ्गेष्टामभयां वचाम्।
मुस्ता नागरपाठाश्च पीताः स्तन्यविशोधनाः॥ २७७॥
तक्रारिष्टमपि पिबेदर्शसां यन्निदर्शितम्।
बिदारी बिल्वमधुकैः स्तनौ चास्याः प्रलेपयेत्॥ २७८॥
त्रायमाणामृतानिम्बपटोलत्रिफलाशृतम्।
गुरुक्षीरा पिबेदेतत्स्तन्यदोषविशुद्धये॥ २७९॥
पिबेद्वा पिप्पलीमूलचव्यचित्रकनागरम्॥ २८०॥
च० चि० ३०।

शुक्रे—मागध्यमृतलोह्वानां त्रिफलाया रसायनम्॥ १४९॥
कफोत्थितं शुक्रदोषं हन्याद् भल्लातकस्य च॥ १५०॥
च० चि० ३०।

नेत्रयोः—
स्यन्दाधिमन्थौ कफजौ प्रवृद्धौ जयेत् सिराणामथ मोक्षणेन
स्वेदावपीडांजनधूमसेकप्रलेपयोगैः कवलग्रहैश्च ।
रूक्षैस्तथाश्च्योतनसंविधानैः तथैव रूक्षैः पुटपाकयोगैः ॥
त्र्यहात् त्र्यहाच्चाप्यवतर्पणान्ते प्रातस्तयोस्तिक्तघृतं प्रशस्तम् ।
तदन्नपानं च समाचरेद्धि यच्छ्लेष्मणो नैव करोति वृद्धिम् ॥
सु० उ० ११।

कफजन्यशोथे—
कफोत्थितं क्षारकटूष्णसंयुतैः समूत्रतक्रासवयुक्तिभिर्जयेत् ।
च० चि० १२ । १६

किञ्च—कफे तु कृष्णासिकतापुराण-
पिण्याकशिग्रुत्वगुमाप्रलेपः ।

सर्वांगगतानां संतर्पणसमुत्पन्नानां चिकित्साविधिमाह—
शस्तमुल्लेखनं तत्र विरेको रक्तमोक्षणम् ।
व्यायामश्चोपवासश्च धूमाश्च स्वेदनानि च ॥ ८ ॥
सक्षौद्रश्चाभयाप्राशः प्रायो रूक्षान्नसेवनम् ।
चूर्णप्रदेहा ये चोक्ताः कण्डूकोठविनाशनाः ॥ ९ ॥
त्रिफलारग्वधं पाठां सप्तपर्णं सवत्सकम् ।
मुस्तं निम्बं समदनं जलनोत्क्वथितं पिबेत् ॥ १० ॥
तेन मेहादयो यान्ति नाशमभ्यस्यतो ध्रुवम् ।
मात्राकालप्रयुक्तेन संतर्पणसमुत्थिताः ॥ ११ च. सू. २३ ।

वसन्ते श्लेष्मप्रकोपशामक चिकित्सामाह—
ततोऽम्लमधुरस्निग्धलवणानि गुरूणि च ।
वर्जयेद्वमनादीनि कर्माण्यपि च कारयेत् ॥

षष्टिकान्नं यवान् शीतान् मुद्गान् नीवारकोद्रवान् ।
लावादिविष्किररसैर्दद्यात् यूषैश्च युक्तितः ॥
पटोलनिम्बवार्ताकुतिक्तकैश्च हिमात्यये ।
सेवेन्मध्वासवारिष्टान् सीधुमाध्वीकमामवान् ॥
व्यायाममञ्जनं धूमं तीदणं च कवलग्रहम् ।
सुखाम्बुना च सर्वार्थान् सेवेत कुसुमागमे ॥
तीदणरूत्तकटुक्षारकषायं कोष्णमद्रवम् ।
यवमुद्गमधुप्रायं वसन्ते भोजनं हितम् ॥
व्यायामोऽत्र नियुद्धाध्वशिला निर्वातजो हितः
उत्सादनं तथा स्नानं भ्रमणं काननानि च ।
सेवेत निर्हरेच्चापि हेमंतोपचितं कफम् ।
शिरोविरेकवमननिरूहकवलादिभिः ।
वर्जयेन्मधुरस्निग्धदिवास्वप्नगुरुद्रवान् ॥ सु. उ. ६४।

श्लेष्मप्रकोपहराण्याहारद्रव्याणि—

यवाः—रूक्षः शीतो गुरुः स्वादुः बहुवातशकृद्यवः ।
स्थैर्यकृत्सकषायस्तु बल्यः श्लेष्मविकारनुत् ॥ च. सू. २७।

भृष्टतण्डुलः—
लघुः सुगन्धिः कफहा विज्ञेयो भृष्टतण्डुलः ॥ सु. सू.

कारवेल्लम्—कारवेल्लं सकटुकं दीपनं कफजित्परम् ।
वार्ताकं कटुतिक्तोष्णं मधुरं कफवातजित् ॥ वा. सू. ६।२०

आर्द्रकम्—रोचनं दीपनं वृष्यमार्द्रकं विश्वभेषजम् ।
वातश्लेष्मविबन्धेषु रसस्तस्योपदिश्यते ॥ च. सू.

मरिचम्—रसे पाके च कटुकं कफघ्नं मरिचं लघु । वा.

जीरकद्वयम्—कटुश्लेष्मानिलहरं गन्धाढ्यं जीरकद्वयम् । सु.

मधु—चक्षुष्यं छेदि तृड् श्लेष्मविषहिध्मास्रपित्तनुत् ।
मेहकुष्ठक्रिमिच्छर्दिश्वासकासातिसारनुत् ॥
व्रणशोधनसंधानरोपणं वातलं मधु । वा. सू.

किञ्च—लघुत्वात्कफघ्नं पैच्छिल्यान्माधुर्यात्कषायभावाच्च वातपित्तघ्नम् ॥ सु. ।

मद्यम्—सर्वं पित्तकरं मद्यमम्लं दीपनरोचनम् ।
भेदनं कफवातघ्नं हृद्यं वस्तिविशोधनम् ॥ सु सू.

मूलकयूषः—श्वासकासप्रतिश्यायप्रसेकारोचकज्वरान् ।
हन्ति मूलकयूषस्तु कफमेदोगलामयान् ॥ सु. सू. ।

उष्णाम्बु—पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे
आध्माने स्तिमिते कोष्ठे सद्यः शुद्धौ नवज्वरे ।
अरुचिग्रहणीगुल्मश्वासकासेषु विद्रधौ ।
हिक्कायां स्नेहपाने च शीताम्बु परिवर्जयेत् ॥ भा. प्र.

श्लेष्मप्रकोपहराणि भैषज्यद्रव्याणि

आरग्वधादिरर्कादिर्मुष्ककाद्यसनादिकः ।
सुरसादिः समुस्तादिर्वत्सकादिर्वलासजित् ॥ ७ ॥

आरग्वधादिमाह—आरग्वधेंद्रयवपाटलिकाकतिक्ता
निंबामृता मधुरसास्रुववृक्षपाठाः
भूनिंबसैर्यकपटोलकरंजयुग्मं
सप्तच्छदाग्निसुषवीफलवाणघोंटाः ॥ १७ ॥
आरग्वधादिर्जयति छर्दिकुष्ठविषज्वरान् ।
कफं कंडूं प्रमेहं च दुष्टव्रणविशोधनः ॥ १८ ॥

अर्कादिमाह—
अर्कालर्कौ नागदन्ती विशल्या

भार्गी रास्ना वृश्चिकाली प्रकीर्या (करञ्जः)
प्रत्यक् पुष्पा पीततैलोदकीर्या (करञ्जविशेषः)
श्वेतायुग्मं तापसानां च वृक्षः ॥ २८ ॥
अयमर्कादिको वर्गः कफमेदोविषापहः
कृमिकुष्ठप्रशमनो विशेषाद् व्रणशोधनः ॥ २६ ॥

मुष्ककादिमाह—

मुष्ककस्नुग्वरा द्वीपिपलाशधवशिंशपाः ।
गुल्ममेहाश्मरीपाण्डु मेदोऽर्शः कफशुक्रजित् ॥ ३२ ॥

असनादिमाह—असनतिनिशभूर्ज श्वेतवाहप्रकीर्या ।
खदिरकदरभंडीशिंशपामेषशृंग्यः ।
त्रिहिमतलपलाशा जोंगकः शाकशालौ ।
क्रमुकधवकुलिंगच्छागकर्णाश्वकर्णाः ॥ १६ ॥
असनादिर्विजयते श्वित्रकुष्ठकफकृमीन् ।
पाण्डुरोगं प्रमेहं च मेदोदोषनिबर्हणः ॥ २० ॥

सुरसादिमाह—

सुरसयुगफणिज्झं कालमालाविडंगं ।
खरबुस(खरपुष्पा) वृषकर्णी कट्फलं कासमर्दः ।
क्षवकसरसिभार्गी कामुका काकमाची ।
कुलहलविषमुष्टी भूस्तृणो भूतकेशी ॥ ३० ॥
सुरसादिगणः श्लेष्ममेदःकृमिनिषूदनः ।
प्रतिश्यायारुचिश्वासकासघ्नो व्रणशोधनः ॥ ३१ ॥

मुस्तादिमाह—मुस्ता वचाग्निद्विनिशाद्वितिक्ता—
भल्लातपाठात्रिफलाविषाख्याः
कुष्ठं त्रुटी हैमवती च योनि-

स्तन्यामयघ्ना मलपाचनाश्च ॥ ४० ॥
एष मुस्तादिको नाम्ना गणः श्लेष्मनिषूदनः ॥ सु.

वत्सकादिमाह—

वत्सकमूर्वाभार्गीकटुका मरिचं घुणप्रिया च गंडीरम् ।
एलापाठाऽजाजी कट्वंगफलाजमोदसिद्धार्थवचाः ॥ ३३ ॥

वा. सू. १५

जीरकहिंगु विडंग पशुगन्धा पंचकोलकं हन्ति
चलकफमेदःपीनसगुल्मज्वरशूलदुर्नाम्नः ॥ ३४ ॥

लोध्रादिमाह—

रोध्रशावरकरोध्रपलाशा
जिंगणीसरलकट्फलयुक्ताः ।
कुत्सितांव(कदम्ब)कदलीगतशोकाः
सैलवालु परिपेलवमोचाः ॥ २६ ॥

एष रोध्रादिको नाम मेदःकफहरो मतः ।
योनिदोषहरः स्तम्भी वर्ण्यो विषविनाशनः ॥

वा० सू० १५ । २७ ।

पिपल्यादिमाह—

पिप्पलीपिप्पलीमूलचव्यचित्रकशृंगवेरमरिचहस्तिपिप्पलीहरेणुकैलाजमोदेन्द्रयवपाठाजीरकसर्षपमहानिम्बफलहिंगुभार्गीमधुरसातिविषावचाविडंगानि कटुरोहिणी चेति।

पिप्पल्यादिः कफहरः प्रतिश्यायानिलारुचीः ।
निहन्याद्दीपनो गुल्मशूलघ्नश्चामपाचनः ॥ सु० सू०

शालसारादिमाह—

शालसाराजकर्णखादिरकदरकालस्कन्धक्रमुकभूर्ज-

मेषशृंगीतिनिशचन्दन कुचन्दनाशिंशपाशिरीषासनधवार्जुनतालशाकनक्तमालपूतीकाश्वकर्णागुरूणि कालीयकञ्चेति ॥

शालसारादिरित्येष गणः कुष्ठविनाशनः ।
मेहपाण्ड्वामयहरः कफमेदो विशोषणः ॥ सु. सू.

ऊषकादिमाह—

ऊषकसैन्धवशिलाजतुकासीसद्वयहिंगूनि तुत्थकञ्च ।
ऊषकादिः कफं हन्ति गणो मेदोविशोषणः
अश्मरीशर्करामूत्रकृच्छ्रगुल्मप्रणाशनः ॥

कांस्यमाह—

तिक्तं कांस्यं लेखनं च चक्षुष्यं कफवातजित् ।

ताम्रमाह—

पित्तापहं श्लेष्महरं च शीतं तद्रोपणं स्याल्लघु लेखनं च
पाण्डूदरार्शोज्वरकुष्ठकासश्वासक्षयान्पीनसमम्लपित्तम्
शोथं कृमिं शूलमपाकरोति प्राहुः परं बृंहणमल्पमेतत् ॥
भा० प्र०

वंगमाह—

वंगं लघु सरं रूक्षमुष्णं मेहकफकृमीन् ।
निहन्ति पाण्डुं सश्वासं चक्षुष्यं पित्तलं मनाक् ॥ भा० प्र०

किञ्च—कटुक्रिमिघ्ने लवणे त्रपुसीसे विलेखने ॥ सुश्रुत ।

शिलाजतुमाह-

शिलाजं कटुतिक्तोष्णं कटुपाकं रसायनम् ॥ ८१ ॥
छेदि योगवहं हन्ति कफमेदोश्मशर्कराः ।
मूत्रकृच्छ्रं क्षयं श्वासं वातार्शांसि च पाण्डुताम् ॥ ८२ ॥

अपस्मारं तथोन्मादं शोथं कुष्ठोदरक्रमीन् ॥ ८३ ॥ भा० प्र०

गन्धकमाह—

गन्धकः कटुकास्तिक्तो वीर्योष्णस्तुवरः सरः ।
पित्तलः कटुकः पाके कण्डूवीसर्पजन्तुजित् ॥
हन्ति कुष्ठक्षयप्लीहकफवातान् रसायनः ॥ भा० प्र०

हरितालमाह—

हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम् ।
कंडु कुष्ठास्यरोगास्र कफपित्तकचव्रणान् ॥ १३१ ॥

मनःशिलामाह—

मनःशिला गुरुर्वर्ण्या सरोष्णा लेखना कटुः ।
तिक्ता स्निग्धा विषश्वासकासभूतकफास्रनुत् ॥ १३४ ॥
भा० प्र०

टंकणमाह—

टंकणोऽग्निकरो रूक्षः कफघ्नो वातपित्तकृत् ॥ १४१ भा० प्र०

स्फटिकीमाह—

स्फटिका तु कषायोष्णा वातपित्तकफव्रणान् ॥ १४२ ॥
निहन्ति श्वित्रवीसर्पान् योनिसंकोचकारिणी ॥ १४३ ॥
भा० प्र० ।

शङ्खमाह-शंखो नेत्र्यो हिमः शीतो लघुः पित्तकफास्रजित् १५८

कपर्दमाह-कपर्दिका हिमा नेत्रहिता स्फोटक्षयापहा ॥ १५६ ॥
कर्णस्रावाग्निमांद्यघ्नी पित्तास्रकफनाशिनी ॥ १५७ ॥ भा० प्र०

इति कफप्रकरणं समाप्तम् ।

समुदिता धातुरूपावातपित्तश्लेष्माणः—

वातपित्तश्लेष्माण एव देहसंभवहेतवस्तैरेवाव्यापन्नैः शरीरमिदं धार्यत अगारमिव स्थूणाभिस्तिसृभिरतश्च त्रिस्थूणमाहुरेके। एभिरेव शोणितचतुर्थैः सम्भवस्थितिप्रलयेष्वप्यविरहितं शरीरं भवति। सु० सू० २१।

त एवं प्रकृतिभूताः पुरुषमव्यापन्नेन्द्रियं बलवर्णसुखोपपन्नमायुषा महतोपपादयन्ति ॥

नर्ते देहः कफादस्ति न पित्तान्न च मारुतात्।
शोणितादपि वा नित्यं देह एतैस्तु धार्यते॥ सु० सु० २१।

त्रयो दोषा धातवश्च पुरीषं मूत्रमेव च
देहं सन्धारयन्त्येते ह्यव्यापन्ना रसैर्हितैः॥ सु० उ० ६६।

प्रकृतिभूतानां खलु वातादीनां फलमारोग्यं तस्मादेषां प्रकृतिभावे प्रयतितव्यं बुद्धिमद्भिः॥ च० शा० ५।

एषां समत्वं यच्चापि भिषग्भिरवधार्यते।
न तत् स्वास्थ्यादृते शक्यं वक्तुमन्येन हेतुना॥ सु० सू० १६

समदोषः समाग्निश्च समधातुमलाक्रियः।
प्रसन्नात्मेन्द्रियमनः स्वस्थ इत्यभिधीयते॥ सु० उ० ६४।

तेषां सर्वांगगत्वमाह—

प्राणोदकान्नरसरुधिरमांसमेदोऽस्थि मज्जशुक्रमूत्रपुरीषस्वेदवहानि स्रोतांसि शरीरे। वातपित्तश्लेष्मणां पुनः सर्वशरीरचराणां सर्वस्रोतांस्ययनभूतानि॥

च० वि० ५। ६।

वातपित्तकफा देहे सर्वस्रोतोऽनुसारिणः।
वायुरेव हि सूक्ष्मत्वात् द्वयोस्तत्राप्युदीरणः॥
च० चि० २८

तेषां कार्यमाह—

लोके वाय्वर्कसोमानां दुर्विज्ञेया यथा गतिः।
तथा शरीरे वातस्य पित्तस्य च कफस्य च॥ च० चि० २८
विसर्गादानविक्षेपैः सोमसूर्यानिला यथा।
धारयन्ति जगद्देहं कफपित्तानिलास्तथा॥ सु० सू० २१

बाल्यतारुण्यवार्धक्येषु कस्य कस्य प्राबल्यं भवतीत्याह—

बालमपरिपक्वधातुगुणमजातव्यञ्जनं सुकुमारमक्लेशसहमसम्पूर्णबलं श्लेष्मधातुप्रायमाषोडशवर्षम्। विवर्धमानधातुगुणं पुनः प्रायेणानवस्थितसत्त्वमात्रिंशद्वर्षमुपादिष्टम्। मध्यं पुनः समर्थागतबलवीर्यपौरुषपराक्रमग्रहणधारणस्मरणवचनविज्ञानसर्वधातुगुणं बलस्थितमवस्थितसत्वमविशीर्यमाणधातुगुणं पित्तधातुप्रायमाषष्ठिवर्षमुद्दिष्टम्। अतः परं परिहीयमाणधात्विन्द्रियबलपौरुषपराक्रमग्रहणधारणस्मरणविज्ञानं भ्रश्यमानधातुगुणं वातधातुप्रायं क्रमेण जीर्णमुच्यते आवर्षशतम्॥ च० शा०

सर्वशरीरचरास्तु वातपित्तश्लेष्माणो हि सर्वस्मिन् शरीरे कुपिताकुपिताः शुभाशुभानि कुर्वन्ति। प्रकृतिभूताः शुभान्युपचयबलवर्णप्रसादादीनि। अशुभानि पुनः विकृतिमापन्नानि विकारसंज्ञकानि। च० सू० २०।

शरीरधातूनामेव वातपित्तश्लेष्माणो दुष्टा दूषयितारो भवन्ति दोषत्वाद् वातादीनाम् । च० शा० ६ ।

दोषरूपा वातपित्तश्लेष्माणः—

नित्याः प्राणभृतां देहे वातपित्तकफास्त्रयः ।
विकृताः प्रकृतिस्था वा तान्बुभुत्सेत पण्डितः ॥
च० सू० १८ । ५०॥

शरीरदूषणाद्दोषा धातवो देहधारणात् ।
वातपित्तकफा ज्ञेया मलिनीकरणान्मलाः ॥ शा०
विकारो धातुवैषम्यं साम्यं प्रकृतिरुच्यते ॥ च० सू० ६

त्रिविधां गतिमाह—

क्षयं स्थानं च वृद्धिश्च दोषाणां त्रिविधा गतिः ॥
च० सू० १७ । १११॥

तेषां हीनानां लक्षणमाह—

वाते पित्ते कफे चैव न्यूने लक्षणमुच्यते ।
कर्मणां प्राकृताद्धानिर्वृद्धिर्वाऽपि विरोधिनाम् ॥
च० सू० १८ । ५४॥

क्षयः पुनरेषामतिसंशोधनातिसंशमनवेगविधारणासात्म्यान्नमनस्तापव्यायामानशनातिमैथुनैर्भवति ॥
सु० सू० १५ ।

समावस्थामाह—

स्वस्थानस्य समता विकारासंभवः शमः ॥ च० सू० १२।

तेषां संचयप्रकोपसंचारादीनाह—

दोषप्रकृतिवैशेष्यं नियतं वृद्धिलक्षणम् ॥ च० सू०१८।५५
चयोः वृद्धिः स्वधाम्न्येव प्रद्वेषो वृद्धिहेतुषु ॥ २२ ॥

विपरीतगुणेच्छा च कोपस्तून्मार्गगामिता ।
लिंगानां दर्शनं ह्येषामस्वास्थ्यं रोगसंभवः॥वा. सू. १२।२३।

स्वस्थाने संचितानां दोषाणां स्तब्धपूर्णकोष्ठता पीतावभासता मन्दोष्मता च अङ्गानां गौरवमालस्यं चयकारणविद्वेषश्चेति लिङ्गानि भवन्ति। तत्र प्रथमः क्रियाकालः। सु० सू० २१।

प्रकोपणैः पुनः प्रकोपात् कोष्ठतोदसंचरणाम्लिका पिपासापरिदाहान्नद्वेषहृदयोत्क्लेदाश्च जायन्ते। तत्र द्वितीयः क्रिया कालः। सु० सू० २१।

तेषामेभिरातङ्कविशेषैः प्रकुपितानां पर्युषितािकिण्वोदकपिष्टसमवाय इवोद्रिक्तानां प्रसरो भवति। तेषां वायुर्गतिमत्वात् प्रसरणहेतुः सत्यपि अचैतन्ये। स हि रजोभूयिष्ठो रजश्च प्रवर्तकं सर्वभावानाम्। यथा महानुदकसंचयोऽतिवृद्धः सेतुमवदार्य अपरेण उदकेन व्यामिश्रः सर्वतः प्रधावति एवं दोषाः कदाचिदेकशो द्विशः समस्ताः शोणितसहिता वा अनेकधा प्रसरन्ति। तद्यथा वातः पित्तम्। श्लेष्मा शोणितम्। वातपित्ते। वातश्लेष्माणौ। पित्तश्लेष्माणौ। वातशोणिते। पित्तशोणिते। श्लेष्मशोणिते। वातपित्तशोणितानि। वातश्लेष्मशोणितानि। पित्तश्लेष्मशोणितानि। वातपित्तकफाः। वातपित्तकफशोणितानि इत्येवं पंचदशधा प्रसरन्ति।

एवं प्रकुपितानां प्रसरतां च वायोर्विमार्गगमनाटोपौ। ऊषाचोषपरिदाहधूमायनानि पित्तस्य। अराच·

काविपाकाङ्गासादछर्दिश्चेति श्लेष्मणो लिंगानि भवन्ति तत्र तृतीयः क्रियाकालः ।

अत ऊर्ध्वं स्थानसंश्रयं व्याख्यास्यामः—

एवं कुपितास्तां स्तान् शरीरप्रदेशानागत्य तां स्तान् व्याधीन् जनयन्ति । ते यदोदरसन्निवेशं कुर्वन्ति तदा गुल्मविद्रध्युदराग्निसंगानाहविसूचिकातिसारप्रभृतीन् जनयन्ति । वस्तिगता प्रमेहाश्मरीमूत्राघातमूत्रदोषप्रभृतीन् । मेढ्रगता निरुद्धप्रकश उपदंशशूकप्रभृतीन् । गुदगता भगन्दरार्शःप्रभृतीन् । वृषणगता वृद्धीः । ऊर्ध्वजत्रुगतास्तु ऊर्ध्वजान् । त्वङ्मांसशोणितस्था क्षुद्ररोगान् कुष्ठानि विसर्पांश्च । मेदोगता ग्रन्थ्यपची अर्बुद गलगण्डालजीप्रभृतीन् । अस्थिगता विद्रध्यनुशयीप्रभृतीन् । पादगताः श्लीपदवातशोणितवातकण्टकप्रभृतीन् । सर्वाङ्गगता ज्वरसर्वांगरोगप्रभृतीन् । तेषामेवमभिनिविष्टानां पूर्वरूपप्रादुर्भावः । तत्र पूर्वरूपगतेषु चतुर्थः क्रियाकालः ।

अत ऊर्ध्वं व्याधिदर्शनं भवति । शोफार्बुदग्रन्थिविद्रधिवीसर्पप्रभृतीनां प्रव्यक्तलक्षणता ज्वरातीसारप्रभृतीनाञ्च । तत्र पंचमः क्रियाकालः । सु० सू० २१

तत्र वायोः पित्तस्थानगतस्य पित्तवत् प्रतीकारः । पित्तस्य कफस्थानगतस्य कफवत् । कफस्य वातस्थानगतस्य वातवत् । एष क्रियाविभागः । सु० सू० २१

तेषां हेतुस्थानभेदेन रोगविशेषजनकत्वमाह—

अत एव वातपित्तश्लेष्माणः स्थानविशेषे प्रकुपिताः व्याधिविशेषान् अभिनिर्वर्तयन्ति । च० सू० २८

नास्ति रोगो विना दोषैः यस्मात्तस्माद् विचक्षणः ।
अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत् ॥ सु० सू० ३५ ।
तथा प्रकृतिसामान्यं विकारेषूपदिश्यते ॥ ४५ ॥
विकारनामाकुशलो न जिह्रीयात्कदाचन ।
न हि सर्वविकाराणां नामतोऽस्ति ध्रुवा स्थितिः ॥ ४६ ॥
स एव कुपितो दोषः समुत्थानविशेषतः ।
स्थानान्तरगतश्चैव जनयत्यामयान् बहून् ॥४७॥ च०सू० १८।
कृत्स्नेऽर्धेऽवयवे वापि यत्राङ्गे कुपितो भृशम् ।
दोषो विकारं नभसि मेघवत्तत्र वर्षति ॥ सु० सू० २१ ।
नात्यर्थं कुपितश्चापि लीनो मार्गेषु तिष्ठति ।
निष्प्रत्यनीकः कालेन हेतुमासाद्य कुप्यति ॥ सु० सू० २१।
कुपितानां हि दोषाणां शरीरे परिधावताम् ।
यत्र सङ्गः स्ववैगुण्यात् व्याधिस्तत्रोपजायते ॥

दोषधातुमलसंसर्गात् आयतनविशेषात् निमित्ततश्चैषां विकल्पा भवन्ति दोषदूषितेष्वत्यर्थं धातुषु संज्ञा क्रियते रसजोऽयं शोणितजोऽयं मांसजोऽयं मेदोजोऽयं अस्थिजोऽयं मज्जजोऽयं शुक्रजोऽयं व्याधिरिति ।

सु० सू० २४ संज्ञा प्रकरण ।

स्थानविशेषे प्रकोपस्योदाहरणमाह—

यस्य श्लेष्मा प्रकुपितो जिह्वामूलेऽवतिष्ठते ।
आशु सञ्जनयेच्छोथं जायतेऽस्योपजिह्विका ॥ २२ ॥
यस्य श्लेष्मा प्रकुपितः तिष्ठत्यन्तर्गले स्थितः ।
आशु संजनयञ्शोथं जायतेऽस्य गलग्रहः ॥ २३ च० सू० १८।
यस्य पित्तं प्रकुपितं सरक्तं त्वचि सर्पति ।

शोथं सरागं जनयन्विसर्पस्तस्य जायते ॥ २५ ॥
यस्य पित्तं प्रकुपितं त्वचि रक्तेऽवतिष्ठते ।
रागं सशोथं जनयन् पिडिका तस्य जायते ॥ २६ ॥
यस्य पित्तं प्रकुपितं शंखयोरवतिष्ठते ।
श्वयथुः शंखको नाम दारुणस्तस्य जायते ॥ २८ ॥
यस्य वायुः प्रकुपितो गुल्मस्थाने च तिष्ठति ।
शोथं सशूलं जनयन् गुल्मस्तस्योपजायते ॥ ३१ ॥
यस्य वायुः प्रकुपितः शोथशूलकरश्चरन् ।
वंक्षणात् वृषणौ याति वृद्धिस्तस्योपजायते ॥ ३२ ॥
यस्य वातः प्रकुपितः कुक्षिमाश्रित्य तिष्ठति ।
नाधो व्रजति नाप्यूर्ध्वं चानाहस्तस्य जायते ॥

च० सू० १८ । ३४

रसादिषु प्रकोपमाह—

अश्रद्धा चारुचिश्चास्य वैरस्यमरसज्ञता ।
हृल्लासो गौरवं तन्द्रा साङ्गमर्दो ज्वरस्तमः ॥ ८ ॥
पाण्डुत्वं स्रोतसां रोधः क्लैब्यं सादः कृशाङ्गता ।
नाशोऽग्ने रयथाकालंवलयः पलितानि च ॥ ९ ॥
रसप्रदोषजा रोगा, वक्ष्यन्ते रक्तदोषजाः ।
कुष्ठवीसर्पपिडका रक्तपित्तमसृग्दरः ॥ १० ॥
गुदमेढ्रास्यपाकश्च प्लीहा गुल्मोऽथ विद्रधी ।
नीलिका कामला व्यङ्गं विप्लवस्तिलकालकाः ॥ ११ ॥
दद्रुश्चर्मदलं श्वित्रं पामा कोठास्रमण्डलम् ।
रक्तप्रदोषाज्जायन्ते, शृणु मांसप्रदोषजान् ॥ १२ ॥
अधिमांसार्बुदं कीलगलशालूकशुण्डिकाः ।

पूतिमांसालजीगण्डगण्डमालोपजिह्विकाः ॥ १३ ॥
विद्यात् मांसाश्रयान्, मेदःसंश्रयांस्तु प्रचक्ष्महे ।
निदानानि प्रमेहाणां पूर्वरूपाणि यानि च ॥ १४ ॥
अध्यस्थिदन्तदन्तास्थिभेदशूलं विवर्णता ।
केशलोमनखश्मश्रुदोषाश्चास्थिप्रकोपजाः ॥ १५ ॥
रुक्पर्वणां भ्रमो मूर्च्छा दर्शनं तमसो मलाः ।
अरुषां स्थूलमूलानां पर्वजानां च दर्शनम् ॥ १६ ॥
मज्जप्रदोषाच्छुक्रस्य दोषात्क्लैब्यमहर्षणम् ।
रोगिणं क्लीवमल्पायुं विरूपं वा प्रजायते ॥ १७ ॥
न वा संजायते गर्भः पतति प्रस्रवत्यपि ।
शुक्रं हि दुष्टं सापत्यं सदारं वाधते नरम् ॥ १८ ॥
इन्द्रियाणि समाश्रित्य प्रकुप्यन्ति यदा मला ।
उपतापोपघाताभ्यां योजयन्तीन्द्रियाणि ते ॥ १६ ॥
स्नायौ शिराकण्डरयोर्दुष्टाः क्लिश्यन्ति मानवम् ।
स्तम्भसंकोचखल्लीभिर्ग्रन्थिस्फुरणसुप्तिभिः ॥ २० ॥
मलानाश्रित्य कुपिता भेदशोषप्रदूषणम् ।
दोषा मलानां कुर्वन्ति संगोत्सर्गावतीव च ॥२१च०सू० २०।

दोषाणां सन्निपाते लक्षणान्याहु—

वृद्धिक्षयकृतश्चान्यो विकल्प उपदेक्ष्यते ॥ ४३ ॥
वृद्धिरेकस्य समता चैकस्यैकस्य संक्षयः ।
द्वन्द्ववृद्धिक्षयश्चैकस्यैकवृद्धिर्द्वयो क्षयः ॥ ४४ ॥
प्रकृतिस्थं यदा पित्तं मारुतः श्लेष्मणः क्षये ।
स्थानादादाय गात्रेषु यत्र तत्र विसर्पति ॥ ४५ ॥
तदा भेदश्च दाहश्च तत्र तत्रानवस्थितः ।

गात्रदेशे भवत्यस्य श्रमो दौर्बल्यमेव च ॥ ४६ ॥
साम्ये स्थितं कफं वायुः क्षीणे पित्ते यदा बली ।
कर्षेत्कुर्यात्तदा शूलं सशैत्यस्तम्भगौरवम् ॥ ४७ ॥
यदानिल प्रकृतिगं पित्तं कफपरिक्षये ।
संरुणद्धि तदा दाहः शूलं चास्योपजायते ॥ ४८ ॥
श्लेष्माणं हि समं पित्तं यदा वातपरिक्षये ।
निपीडयेत्तदा कुर्यात् सतन्द्रागौरवं रुजम् ॥ ४९ ॥
प्रवृद्धो हि यदा श्लेष्मा पित्ते क्षीणे समीरणम् ।
रुन्ध्यात्तदा प्रकुर्वीत शीतकं गौरवं रुजम् ॥ ५० ॥
समीरणे परिक्षीणे कफःपित्तं समत्वगम् ।
कुर्वीत संनिरुन्धानो मृद्वग्नित्वं शिरोग्रहम् ॥ ५१ ॥
निन्द्रां तन्द्रां प्रलापं च हृद्रोगं गात्रगौरवम् ।
नखादीनां च पीतत्वं ष्ठीवनं कफपित्तयोः ॥ ५२ ॥
हीनवातस्य तु कफः पित्तेन सहितश्चरन् ।
करोत्यरोचकापाकौ सदनं गौरवं तथा ॥ ५३ ॥
हृल्लासमास्यस्रवणं दूयनं पाण्डुतां मदम् ।
विरेकस्य हि वैषम्यं वैषम्यमनलस्य च ॥ ५४ ॥
क्षीणपित्तस्य तु श्लेष्मा मारुतेनोपसंहितः ।
स्तम्भं शैत्यं च तोदं च जनयत्यनवास्थितम् ॥ ५५ ॥
गौरवं मृदुतामग्नेर्भक्ताश्रद्धां प्रवेपनम् ।
नखादीनां च शुक्लत्वं गात्रपारुष्यमेव च ॥ ५६ ॥
हीने कफे मारुतस्तु पित्तं तु कुपितं द्वयम् ।
करोति यानि लिंगानि शृणु तानि समासतः ॥ ५७ ॥

भ्रममुद्वेष्टनं तोदं दाहं स्फोटनवेपने ।
अङ्गमर्दं परीशोषं दूयनं धूपनं तथा ॥ ५८ ॥
वातपित्तक्षये श्लेष्मा स्रोतांस्यभिदधद् भृशम् ।
चेष्टाप्रणाशं मूर्च्छां च वाक्सङ्गं च करोति हि ॥ ५९ ॥
श्लेष्मवातक्षये पित्तं देहौजःस्रंसयेच्चरत् ।
ग्लानिमिन्द्रियदौर्बल्यं तृष्णां मूर्छां क्रियाक्षयम् ॥ ६० ॥
पित्तश्लेष्मक्षये वायुर्मर्माण्यभिनिपीडयन् ।
प्रणाशयति संज्ञां च वेपयत्यथवा नरम् ॥ ६१ ॥
दोषाः प्रवृद्धाःस्वं लिङ्गं दर्शयन्ति यथा बलम् ।
क्षीणा जहति लिङ्गं स्वं समाः स्वं कर्म कुर्वते ॥ ६२ ॥

च० सू० १७ ।

दोषाणां सामतां निरामतां चाह—

ऊष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितम् ।
दुष्टमामाशयगतं रसमामं प्रचक्षते ॥
आमेन तेन संयुक्ता दोषा दूष्याश्च दूषिताः ।
सामा इत्युपदिश्यन्ते ये च रोगास्तदुद्भवाः ॥
स्रोतोरोधबलभ्रंशगौरवानिलमूढताः ।
आलस्यापक्तिनिष्ठीवमलभेदारुचिक्लमाः ।
लिङ्गं मलानां सामानां निरामाणां विपर्ययः ॥
वायुः सामो विबन्धाग्निसादतन्द्रान्त्रकूजनैः ।
वेदनाशोथनिस्तोदैः क्रमशोऽङ्गानि पीडयेत् ॥
विचरेद् युगपच्चापि गृह्णाति कुपितो भृशम् ।
स्नेहाद्यैर्वृद्धिमाप्नोति सूर्यमेघोदये निशि ॥
निरामो विशदो रूक्षो निर्विबन्धोऽल्पवेदनः ।

विपरीतगुणैः शान्ति स्निग्धैर्याति विशेषतः ॥
दुर्गन्धं हरितं श्यावं पित्तमम्लं स्थिरं गुरु ।
अम्लिका कण्ठहृद्दाहकरं सामं विनिर्दिशेत् ॥
आताम्रं पीतमत्युष्णं रसे कटुकमस्थिरम् ।
पक्वं विगन्धं विज्ञेयं रुचिपक्तबलप्रदम् ॥
आविलस्तन्तुलः स्त्यानः कण्ठदेशेऽवतिष्ठते ।
सामो बलासो दुर्गन्धः क्षुदुद्गारविघातकृत् ।
फेनवान्पिण्डितः पाण्डुर्निःसारो गन्ध एव च ।
पक्वः स एव विज्ञेयः छेदवान् वक्त्रशुद्धिकृत् ॥ मा० नि० ।

दोषाणां प्रकोपस्य रोगोत्पत्तेर्वा कारणान्याह—

रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता ॥ वा० सू० १

सर्वेषां च व्याधीनां वातपित्तश्लेष्माण एव मूलं तल्लिङ्गत्वात् दृष्टफलत्वादागमाच्च । यथा हि कृत्स्नं विकारं जातं विश्वरूपेणावस्थितं सत्वरजस्तमांसि न व्यतिरिच्यन्ते एवमेव कृत्स्नं विकारजातं विश्वरूपेणावस्थितमव्यतिरिच्य वातपित्तश्लेष्माणो वर्तन्ते ॥ सु० सू० २४।

सर्व एव निजविकाराः नान्यत्र वातपित्तकफेभ्यो निर्वर्तन्ते यथा शकुनिः सर्वां दिशमपि परिपतन् स्वां छायां नातिवर्तते तथा स्वधातुवैषम्यनिमित्ताः सर्वविकाराः वातपित्तकफान्नातिवर्तन्ते वातपित्तश्लेष्मणां पुनः समुत्थानस्थानसंस्थानप्रकृतिविशेषानभिसमीक्ष्य तदात्मकानपि च सर्वविकारान् तानेवोपदिशन्ति बुद्धिमन्त इति ।

स्वधातुवैषम्यनिमित्तजा ये विकारसंघावहवः शरीरे।
न ते पृथक् पित्तकफानिलेभ्यः चागन्तवस्त्वेव ततो विशिष्टाः॥

कारणभेदेन विविधा रोगा इत्याह—

चत्वारो रोगा भवन्ति—आगन्तुवातपित्तश्लेष्मनिमित्ताः। द्विविधा पुनः प्रकृतिरेषां, आगन्तुनिजविभागात्। द्विविधं चैषामधिष्ठानं मनःशरीरविशेषात्। विकाराः पुनरेषामपरिसंख्येयाः प्रकृत्यधिष्ठानलिङ्गायतनविकल्पविशेषात्, तेषामपरिसंख्येयत्वात्। मुखानि तु खल्वागन्तोर्नखदन्तपतनाभिचाराभिशापाभिषङ्गव्यधबन्धपीडन रज्जुदहनमन्त्राशनिभूतोपसर्गादीनि। निजस्य तु मुखं वातपित्तश्लेष्मणां वैषम्यम्॥ ४॥

द्वयोस्तु खल्वागन्तुनिजयोः प्रेरणमसात्म्येन्द्रियार्थसंयोगः प्रज्ञापराधः परिणामश्चेति॥ ५॥

सर्वेऽपि तु खल्वेतेऽभिप्रवृद्धाश्चत्वारो रोगाः परस्परमनुबध्नन्ति न चान्योन्यसंदेहमापद्यन्ते॥ ६॥

आगन्तुर्हि व्यथापूर्वसमुत्पन्नो जघन्यं वातपित्तश्लेष्माणं वैषम्यमापादयति। निजे तु वातपित्तश्लेष्माणः पूर्वं वैषम्यमापद्यन्ते जघन्यं व्यथामभिनिर्वर्तयन्ति।
७ च० सू० २०।

किञ्च—त्रयो रोगा निजागन्तुमानसाः। निजः शरीरदोषसमुत्थः। आगन्तुर्भूतविषवाय्वग्निसम्प्रहारादिसमुत्थः। मानसः पुनरिष्टस्यालाभात् लाभाच्चानिष्टस्य। च० सू० २१।

आगन्तुरन्वेति निजं विकारं निजस्तथाऽऽगन्तुमतिप्रवृद्धः।
तत्रानुबन्धं प्रकृतिं च सम्यक् ज्ञात्वा ततः कर्म समारभेत॥
च० सू० २०।

आगन्तूनौपसर्गिकरोगानाह—

प्रसङ्गाद् गात्रसंस्पर्शान्निःश्वासात्सहभोजनात्
सहशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात् ।
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च
औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम् ॥ सु० नि० ५।

किञ्च-आगन्तुरनुबन्धो हि प्रायशो विषमे ज्वरे ॥ च० चि० ३

आगन्तूनामपि कारणमाह—

ये भूतविषवाय्वग्निसम्प्रहारादिसम्भवाः
नृणामागन्तवो रोगाः प्रज्ञा तेष्वपराध्यति ॥ च० सू० ७।

जनपदोध्वंसकरोगाणां कारणमाह—

ये तु जनपदमुध्वंसयन्ति ते तु खल्विमे भावा तद् यथा वायुरुदकं देशः काल इति ।

वैगुण्यमुपपन्नानां देशकालानिलाम्भसाम्
गरीयस्त्वं विशेषेण हेतुमत्संप्रचक्षते ।
वाताज्जलं जलाद्देशं देशात्कालं स्वभावतः
विद्याद्दुष्परिहार्यत्वाद् गरीयस्तरमर्थवित् ।

वाय्वादीनां यद् वैगुण्यमुपपद्यते तस्य मूलमधर्मः तन्मूलं चासत्कर्म पूर्वकृतम् । तयोर्योनिः प्रज्ञापराध एव ।

च० । वि० । ३ ॥

प्रज्ञापराधादीन् सामान्यान् रोगहेतूनाह—

धीधृतिस्मृतिविभ्रंशः संप्राप्तिः कालकर्मणाम् ।
असात्म्यार्थागमश्चेति ज्ञातव्या दुःखहेतवः ॥ ९८ ॥
विषमाभिनिवेशो यो नित्यानित्ये हिताहिते ।
ज्ञेयः सः बुद्धिविभ्रंशः समं बुद्धिर्हि पश्यति ॥ ९९ ॥

विषयप्रवणं चित्तं धृतिभ्रंशान्न शक्यते ।
नियन्तुमहितादर्थाद्धृतिर्हि नियमात्मिका ॥ १०० ॥
तत्त्वज्ञाने स्मृतिर्यस्य रजोमोहावृतात्मनः ।
भ्रश्यते स स्मृतिभ्रंशः स्मर्तव्यं हि स्मृतौ स्थितम् १०१ ।
धीधृतिस्मृतिविभ्रष्टः कर्म यत्कुरुतेऽशुभम् ।
प्रज्ञापराधं तं विद्यात्सर्वदोषप्रकोपणम् ॥ १०२ ॥
उदीरणं गतिमतामुदीर्णानां च निग्रहः ।
सेवनं साहसानां च नारीणां चातिसेवनम् ॥ १०३ ॥
कर्मकालातिपातश्च मिथ्यारम्भश्च कर्मणाम् ।
विनयाचारलोपश्च पूज्यानां चाभिधर्षणम् ॥ १०४ ॥
ज्ञातानां स्वयमर्थानां अहितानां निषेवणम् ।
परमौन्मादिकानां च प्रत्ययानां निषेवणम् ॥ १०५ ॥
अकालादेशसंचारौ मैत्री संक्लिष्टकर्मभिः ।
इन्द्रियोपक्रमोक्तस्य सद् वृत्तस्य च वर्जनम् ॥ १०६ ॥
ईर्ष्यामानभयक्रोधलोभमोहमदभ्रमाः ।
तज्जं वा कर्म यत्क्लिष्टं क्लिष्टं यद्देहकर्म च ॥ १०७ ॥
यच्चान्यदीदृशं कर्म रजोमोहसमुत्थितम् ।
प्रज्ञापराधं तं शिष्टा ब्रुवते व्याधिकारणम् ॥ १०८ ॥
बुद्ध्या विषमविज्ञानं विषमं च प्रवर्तनम् ।
प्रज्ञापराधं जानीयान्मनसो गोचरं हि तत् ॥ १०९ ॥
निर्दिष्टा कालसम्प्राप्तिर्व्याधीनां हेतुसंग्रहे ।
चयप्रकोपप्रशमाः पित्तादीनां यथा पुरा ॥ ११० ॥
मिथ्यातिहीनलिङ्गाश्च वर्षान्ता रोगहेतवः ।
जीर्णभुक्तप्रजीर्णान्नकालाकालस्थितिश्च या ॥ १११ ॥

पूर्वमध्यापराह्णाश्च रात्र्या यामास्त्रयश्च ये ।
तेषु कालेषु नियता ये रोगास्ते च कालजाः ॥ ११२ ॥
अन्येद्युष्को द्व्यहग्राही तृतीयकचतुर्थकौ ।
स्वे स्वे काले प्रवर्तन्ते काले ह्येषां बलागमः ॥ ११३ ॥
एते चान्ये च ये केचित्कालजाः विविधा गदाः ।
अनागते चिकित्स्य स्ते बलकालौ विजानता ॥ ११४ ॥
कालस्य परिणामेन जरामृत्युनिमित्तजाः ।
रोगाः स्वाभाविका दृष्टाः स्वभावो निष्प्रतिक्रियः ॥११५॥
निर्दिष्टं दैवशब्देन कर्म यत्पौर्वदेहिकम् ।
हेतुस्तदपि कालेन रोगाणामुपलभ्यते ॥ ११६ ॥
न हि कर्म महत्किञ्चित् फलं यस्य न भुज्यते ।
क्रियाघ्नाः कर्मजा रोगाः प्रशमं यान्ति तत्क्षयात् ॥ ११७ ॥
अत्युग्रशब्दश्रवणाच्छ्रवणात् सर्वशो न च ।
शब्दानां चातिहीनानां भवन्ति श्रवणाजडाः ॥ ११८ ॥
परुषोद्भीषणाशस्ताप्रियव्यसनसूचकैः ।
शब्दैः श्रवणसंयोगो मिथ्यायोगः स उच्यते ॥ ११९ ॥
असंस्पर्शोऽतिसंस्पर्शो हीनसंस्पर्श एव च ।
स्पृश्यानां संग्रहेणोक्तः स्पर्शनेन्द्रियबाधकः ॥ १२० ॥
यो भूतविषवातानामकालेनागतश्च यः ।
स्नेहशीतोष्णसंस्पर्शो मिथ्यायोगः स उच्यते ॥ १२१ ॥
रूपाणां भास्वतां दृष्टिर्विनश्यति हि दर्शनात् ।
दर्शनाच्चातिसूक्ष्माणां सर्वशश्चाप्यदर्शनात् ॥ १२२ ॥
द्विष्टभैरवबीभत्सदूरातिश्लिष्टदर्शनात् ।
तामसानां च रूपाणां मिथ्यासंयोग उच्यते ॥ १२३ ॥

अन्यादानमनादानमोक सात्म्यादिभिश्च यत् ।
रसानां विषमादानमल्पदानं च दूषणम् ॥ १२४ ॥
अतिमृद्वतितीक्ष्णानां गन्धानामुपसेवनम् ।
असेवनं सर्वशश्च घ्राणेन्द्रियविनाशनम् ॥ १२५ ॥
पूतिभूतविषाद्विष्टा गन्धा ये चाप्यनार्तवाः ।
तैर्गन्धैर्घ्राणसंयोगो मिथ्यायोगः स उच्यते ॥ १२६ ॥
असात्म्यमिति तद्विद्यात् यन्न याति सहात्मताम् ॥१२७॥
मिथ्याहीनातियोगेभ्यो यो व्याधिरुपजायते ॥ १२८ ॥
सुखहेतुर्यतस्त्वेकः समयोगः सुदुर्लभः ॥ १२९ ॥

च. शा. १

इत्थं खलु निदानदोषदूष्यविशेषेभ्यो-
विकाराणां प्रादुर्भावो भवति ॥ ४ ॥

यदा ह्येते त्रयो निदानादिविशेषाः परस्परं नानुबध्नन्ति अथवा अयथाप्रकर्षादबलीयांसो वानुबध्नन्ति न तदा विकाराभिनिर्वृतिः । चिराद्वाप्यभिनिर्वर्तन्ते । तनवो वा भवन्ति अथवाप्ययथोक्तसर्वलिङ्गा इति ॥

च. नि. । ४ । ५ ।

न च सर्वाण्यपथ्यानि तुल्यदोषकराणि । न च सर्वे दोषास्तुल्यबलाः । न च सर्वाणि शरीराणि व्याधिक्षमत्वे समर्थानि । तदेव ह्यपथ्यं देशकालसंयोगवीर्यप्रमाणातियोगाद् भूयस्तरमपथ्यं सम्पद्यते स एव दोषः संसृष्टयोनिर्विरुद्धोपक्रमो गम्भीरानुगतः प्राणायतनसमुत्थो मर्मोपघाती वा भूयान् कष्टतमः क्षिप्रकारितमश्च सम्पद्यते। शरीराणि चातिस्थूलानि अति कृशानि अनि-

विष्टमांसशोणितास्थीनि दुर्बलानि असात्म्याहारोपचितान्यल्पाहाराणि अल्पसत्वानि वा भवन्ति अव्याधिसहानि। विपरीतानि पुनर्व्याधिसहानि। एभ्यश्चैवापथ्याहारदोषशरीरविशेषेभ्यो व्याधयो मृदवो दारुणाः क्षिप्रसमुत्थाश्चिरकारिणश्च भवन्ति। च. सू. २८। ६।

मलरूपाः वातपित्तश्लेष्माणः

प्रकुपिता वातपितश्लेष्माणो मलरूपा भवन्तीत्याह—

शरीरधातवस्तु द्विविधाः संग्रहेण मलभूताः प्रसादभूताश्च तत्र मलभूतास्ते शरीरस्य ये बाधकराः स्युः तद् यथा शरीरच्छिद्रेषूपदेहा पृथग्जन्मानो बहिर्मुखाः परिपक्वाश्च धातवः प्रकुपिताश्च वातपित्तश्लेष्माणो ये चान्येऽपि केचिच्छरीरे तिष्ठन्ति भावाः शरीरस्योपघातायोपपद्यन्ते सर्वांस्तान्मलान् संप्रचक्ष्महे। चरक। शा०। ६।

स्वाभाविका मलरूपा वातपित्तश्लेष्माणोऽपि भवन्तीत्याह—

तत्राहारप्रसादाख्यो रसः किट्टं च मलाख्यमभिनिर्वर्तते। किट्टात् मूत्रस्वेदवातपित्तश्लेष्माणः कर्णाक्षिनासिकाऽस्यलोमकूप प्रजननमलाः केशश्मश्रुलोमनखादयश्चावयवाः पुष्यन्ति। च. सू. २८। ४

कस्य धातोः किं मलमित्याह—

किट्टमन्नस्य विण्मूत्रे रसस्य च कफोऽसृजः।
पित्तं मांसस्य खमलो मलःस्वेदस्तु मेदसः॥ च. नि.। १६।

पक्वाशयस्थं मलरूपं वातमाह—

पक्वाशयं तु प्राप्तस्य शोष्यमानस्य वह्निना।
परिपिण्डितपक्वस्य वायुः स्यात्कटुभावतः॥ चरक।